Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

080549

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080549

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

January, 1944 Reg. No. C. 1073
Digitized by Arya Samaj Foundation Chennai and eGangotri

080549

प्रणकालय
गुरुकुल कांगड़ी

सम्पादकः—
महामहोपाध्याया-
नन्तकृष्णशास्त्री
सहकारिसम्पादकः—
श्रीउपेन्द्रमोहन-
सांख्यतीर्थः



संस्कृत-साहित्य-
परिषदो मासिकं
मुखपत्रम्

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रति
भावालोकैर्मनःपद्मं प्रकाशयतु धी

080549

January, 1944 | १८६५-शकीये पौषे | २६श-वर्षस्य ९म-संख्या | Vol. XXVI, No. 9

देवभाषापरिषदोऽयोध्यानगराधिवेशने चतुर्दशे

सभापतीनां

महामहोपाध्याय-श्रीयुक्तानन्तकृष्णशास्त्रिणामभिभाषणम् ।

आचार्यवर्याः ! महाराजाः ! पण्डितप्रवराः ! अन्ये चात्रोपस्थिताः सदस्याः ! श्रीमतां सर्वेषामाज्ञया 'केवलमाज्ञामात्रं परिपालनीयम्, बलाबल-परीक्षा तु परस्तादि'ति सेनानीनीतिमात्रशरणः सभापतिपदमिदमधि-तिष्ठामि, जानन्नपि नाहमर्हास्येतस्य महतः कार्यस्य निर्वहणाधिकारम्, आशासे च—परिषदोऽधिवेशनमिदमयोध्यानगरे भगवतः श्रीरामचन्द्रस्य कृपया सुसम्पन्नं भविष्यतीति ।।

अयोध्यानगर्यैव हि—"भगवान पूर्णावतारः श्रीरामचन्द्र एव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं ब्रह्मे"ति वादस्य रामतापन्याद्युपनिषद्व्यवस्थापितस्य केवलाद्वैत-रीत्या रत्नप्रभाकार-रामानन्दसरस्वती-नारायणसरस्त्याद्याद्दतस्याद्वैतसम्प्र-दायस्यैवावान्तरसम्प्रदायरूपस्य, चिदचिद्विशिष्टरामब्रह्मवादाख्यस्य भग-वद्रामानुजसम्प्रदायावान्तरभेदस्य श्रीरामानन्दादिप्रवर्तितस्य, स्वतन्त्रस्य वा संप्रदायान्तरस्याधिष्ठानम्, सदा सर्वत्र रामनामश्रवणेन राममय्येव प्रतिभान्ती, लीलामानुषविग्रहस्य परमात्मनः श्रीरामचन्द्रस्य सहायत-याऽवतीर्णानां देवानामेव पुरीत्वेन "देवानां पूरयोध्ये"ति देवपुरीत्या-म्नायमाना च देवभाषापरिषदः—समुचितं स्थानम्, यत्र सुगृहीत-नामानो रामब्रह्मवादसम्प्रदायाचार्या देवभाषाप्रचारमेव स्वलक्ष्यं मनसि निधाय प्रधानप्रधानपुस्तकालय-विद्यालयादिद्वारा रात्रिन्दिवं देवभाषाम्, तन्मुखेनावगतान् तत्तद्धर्मांश्च सेवन्ते, इति दूरादेव गन्धो वाति, इत्ययोध्या-नगर्यामस्यां परिषदोऽस्या अधिवेशनप्रसङ्गेन देवभाषापरिषदोऽस्याः कैङ्कर्यार्थमवसरप्राप्त्या सत्यमात्मानं धन्यधन्यं मन्ये ॥

॥ देवभाषाध्ययनावश्यकता ॥

सर्वाणि विद्यास्थानानि, नीतिग्रन्थाः, काव्य-नाटकालङ्कारादिनिबन्धाः, गणित-भूगोलायुर्वेदादिशास्त्राणि संस्कृतभाषायां निबद्धानि यावन्ति, न तावन्ति भाषान्तरेषु वर्तन्ते । भाषान्तरीयनिबन्धानामपि मूलभित्तिः संस्कृत-निबन्धा एव, इति भाषान्तरेण लोकव्यवहारं निश्चितरूपेण चिकीर्षतामपि संस्कृतभाषाध्ययनं महत एवोपकाराय । संस्कृतभाषेयं सत्यं साम्प्रतं मृतेव दृश्यते व्यवहाराभावेन, परं तु, विश्वसिमि, व्यवहारपथे नीयमाना-ऽमृतैव दृश्येत । उज्जीवनमात्रं हि तस्याः साम्प्रतं काम्यते, नोत्पादनम् । भारतीया हि सर्वेऽत्यन्तं संस्कृतभाषानभिज्ञा अपि विनैवार्थज्ञानं भगवदा-राधनादिप्रसङ्गेषु संस्कृतपदान्युच्चारयन्तीति न सर्वथा व्यवहाराविषया संस्कृतभाषा तेषाम् । इदमेवात्र सूच्यते—यद् दैविकेषु कार्येष्वर्थज्ञान-पूर्वकव्यवहारार्थं संस्कृतभाषाऽभ्यसनं महते श्रेयसे भवति, अन्यथा तु व्यवहर्ताऽयं स्थाणुरेव, यतः—"स्थाणुरयं भारहारः किलाभूदधीत्य वेदं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न विजानाति योऽर्थम् । योऽर्थज्ञ इत् सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूत-पाप्मा" । तेन चैहिकव्यवहारोऽपि फलति—"आम्राश्च सिक्ताः पितरश्च तृप्ता" इति । अतो व्यवहारपथं संस्कृतभाषा यथाऽऽगच्छेत्, तथा प्राणपणेन प्रयतनीयं सर्वैरपि वैदिकधर्माधिकारिभिस्तान्त्रिकधर्माधिकारिभिरन्यैश्च । इदं तु रहस्यं दुरपह्नवम्—अत्यन्तशक्तौ मुख्यधर्मेऽधिकारः, तदभावे गौणधर्मे, तदभावे त्वापद्धर्म इति । अयं मुख्यधर्मोऽयं गौणधर्मोऽयमापद्धर्म इति तु ज्ञानार्थमन्ततो गत्वा धार्मिकग्रन्थानामध्ययनमावश्यकमेव, इति कथं भारतीयानां मुख्यगौणापद्धर्माधिकारिणाम्, तान्त्रिकधर्माधिकारिणां वा तन्मूलसंस्कृतभाषामयनिबन्धानामध्ययनम्, संस्कृतभाषायाः प्रचारो वा न सप्रयोजनं स्यात् ?

॥ देवभाषापरिषदः समादरणीयता ॥

सदुःखमिदं निवेद्यते—यद् दार्शनिकानि साहित्यालङ्कारिकादीनि पौराणिकानि नैतिकादीनि च तत्त्वान्याङ्गलादिभाषान्तरे निबद्धानि यथा विशेषतः संस्कृतविभागपरीक्षादिष्वपि सर्वेषु विश्वविद्यालयेषु बहुमूल्यानि मन्यन्ते, न तथा संस्कृतभाषायाम् । अत्र सर्वत्र संस्कृतपण्डितानां संस्कृतभाषाप्रचारे, संस्कृतविभागे शुद्धसंस्कृतप्राधान्यव्यवस्थापनार्थे प्रयतने च दृढसंकल्पाभाव एव कारणम् । इतः परं तु स्वलक्ष्यसिद्धये यान् कानपि प्रकारान परिषदियमनुष्ठानपद्धतावानेतुं यदि प्रयतेत, तर्हि यदि नाद्य, न वा श्वः, न वा बहुषु वत्सरेषु, तथापि कदाचन तु कृतकृत्या स्यादेव । अचिरेण लक्ष्यफलादर्शनं तु सर्वत्र संस्थासु समानम् । चिरकालसाध्यान्यपि लक्ष्याणि मासद्वयप्राप्याणीति प्रतिज्ञां बहुषु संस्थासु प्रत्यहमेव पश्यामः—"क्षमस्व कतिचिन्मासान मीलयित्वा विलोचने ।" इति । इदं तु दुरपह्नवं तत्त्वम्—यद् देवभाषापरिषदियं न तथा प्रतिजानाति—संस्कृतभाषाया राष्ट्रभाषात्वं मासद्वयसाध्यम्, वत्सरद्वयसाध्यमिति वा । अतो यदि तानि संस्थान्तराणि यथाप्रतिज्ञातकालं फलाप्राप्तावपि नोपहासपात्राणि, कथं केवलं देवभाषापरिषदियं परिहासपात्रं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यात ? अकृतिसाध्यं वा साधयितुमिच्छति ? अतो वयं विश्वसिमः—यत् कृते प्रयत्ने यदि न प्रतिज्ञातेऽपि समये यथावदेव फलति, न फलतु नाम, कालान्तरे तु फलिष्यत्येव, यतः फलमत्र नोत्पाद्यमङ्कुरादिप्ररोपणादिद्वारा, किन्त्वावरणनिरसनेन केवलमभिव्यञ्जनीयम्, यत्राल्पीयानेव प्रयत्नोऽपेक्ष्यते समुत्साहपूर्वकः। समुत्साहस्त्वयमनुत्साहमूलनाशनेनोत्साहवर्धनेन च नियमेन भविता, यदि संस्कृतभाषाया अपि सर्वेषु विद्यालयेषु राजकीयेषु तत्तत्संस्थासम्बन्धिषु छात्रालयेषु लौकिकवैदिकसभास्थानेषु च समानं स्थानं भारतीयैः प्राप्येत ॥

॥ देवभाषापरिषदावश्यकता ॥

साम्प्रतं हि भारते वर्षे बहवः परिषदः, सभाः, सङ्घविशेषा वा वर्तन्ते —राष्ट्रीयसभा (काङ्ग्रेस), हिन्दुमहासभा, मुस्लिमलीग्, सनातनधर्मसभा, वर्णाश्रमस्वराज्यसङ्घः, प्राच्यविद्यासम्मेलनम्, देवभाषापरिषदिति। तत्र हिन्दु-मोहम्मदीयसदस्यसमुदायरूपराष्ट्रीयसभाया उद्देश्यं विधेयं च हिन्दुपक्षपातेन मोहम्मदपक्षपातेन वा तदा तदा तत्तज्जातीनां कार्यनिर्वाहकसमितिसभ्यानां मतेन नान्यथा भवितुमर्हतीति स्वस्वजातिबलरक्षाऽविरोधेन राजनीतिक्षेत्रे चरमं लक्ष्यं प्राप्तव्यमिति मत्वा हिन्दुमहासभा मुस्लिमलीग्सभा च राष्ट्रीयसभातो भेदेन तत्तन्नेतृभिः प्रवर्तिता। प्रधानं लक्ष्यं तु समानमेव तिसृणामपि सभानाम् ॥

वर्णाश्रमस्वराज्यसङ्घस्तु वर्णानामाश्रमाणां च हिन्द्ववान्तराणां हितमेव काङ्क्षति, न तु सर्वेषां हिन्दूनाम्, सर्वासां प्रजानां वा साधारण्येनेति तन्नाममात्रदर्शनेन प्रतिभाति। अत एव तस्य लक्ष्येण बहूनामेवास्ति विरोधः। सनातनधर्मसभा तु राजनीतिक्षेत्रं न स्वलक्ष्यं मनुते, किन्तु स्वधर्मरक्षणमात्रम्, तदविरोधेन राजनीतिक्षेत्रव्यवस्था तु तया राष्ट्रीयसभाद्यधीनैव मन्यते। "अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिरि"ति नीतिस्तस्या अवलम्बः ॥

प्राच्यविद्यासम्मेलनं तु चरितविमर्शकपद्धत्या तत्तत्साहित्य-दर्शन-पुराणे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिहासादिसमालोचनमात्रं स्वलक्ष्यं मन्यते, न तु धर्माधर्मप्रवर्तनं लेशतोऽपि। तद्धि नामतः प्राच्यविद्यासंमेलनमपि कार्यतः पाश्चात्यविद्यासंमेलनमेव। साम्प्रतं तु काश्यां षड्रतिद्वयस्यापि समं स्थानमत्रेष्यत इति तु सन्तोषस्थानमिदम्। देवभाषापरिषत्तु, विश्वसिमि, सनातनधर्मसभाकृत्यं राष्ट्रीयसभाकृत्यं चोभयं व्यवस्थापयितुमेव, इति राजनीतिक्षेत्रं धर्माविरोधेन सर्वसाधारणमेकरूपम्, तदर्थं संस्थानान्तरानावश्यकता चानया परिषदा व्यवस्थापनीयैव मन्येत, यदि सर्वेऽपि सदस्यास्तथैवानुमन्येरन्, इत्यनया प्रणाल्या स्वलक्ष्यस्य स्थिरीकरणे सर्वेऽपि भारतीया देवभाषापरिषदमिमां हृदयेनानुग्रहीष्यन्ति ॥

भारतीयानां स्वराज्यलक्ष्यमपि यदि परिपालनीयमेकस्या एव भाषाया व्यवस्थापनेन, तर्हि प्रान्तीयभाषा न काऽपि सर्वदेशसम्मता तत्र सांप्रतं स्यात्। हिन्दीभाषायाः प्राधान्यमेकत्र, बङ्गभाषायाः प्राधान्यमन्यत्र, महाराष्ट्रादिभाषाप्राधान्यमपरत्रेति सर्वदेशीया न कापि भारतीयभाषा देवभाषां विना। इयं हि न भारतवर्षस्यैव भाषा, किन्तु लोकान्तरस्यापि, यत खलु देवानामाश्रयः ॥

विदितमिदं सर्वेषाम्—यत संस्कृतभाषाया मृततुल्याया राष्ट्रभाषात्वव्यवस्थापनाख्ये लक्ष्ये बहूनां मतभेदा बहुप्रकारा वर्तन्ते। केचन वार्तामेतां श्रुत्वा हसन्ति केवलम्। अन्ये तु "ब्रह्मविद् ब्रह्मैव भवती"ति प्रतिपादितब्रह्मभावतुल्यमिदं लक्ष्यमिति। वयं तु मन्यामहे—नेतृणामैकमत्ये न किमप्यत्रासाध्यं नाम—यद्याङ्गलभाषायाः साम्प्रतं भारतवर्षे प्रचारकथायां क्षिप्येत दृष्टिः। कुतो वेयमागता ? कथं वा समुन्नतिं सर्वदेशव्यापिनीं सा प्रापदिति ? यदि मन्यते – राष्ट्रमपि तदधीनमिति तस्या एतावती समुन्नतिरिति, तर्हि किं वोत्तरम्—कथं वा राष्ट्रं तदधीनं संवृत्तमिति प्रश्नस्य ? यदि औदार्यमौदासीन्यमेव वा प्राचीनानां संस्कृताभिमानिनां राष्ट्रपतीनां तत्र कारणम्, तर्हि प्रयत्यताम्, औदासीन्यमौदार्यं वा परित्यज्य राष्ट्रमप्यात्मसात्कर्तुं राष्ट्रीयसभानां सहयोगेन, प्राप्यतां भाषाऽपि भारतीयानामेव देवभाषाख्या समुन्नतिम्, उद्घुष्यतां चोच्चैस्तरां सर्वतः—"भारते भातु भारती"ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ देवभाषाया राष्ट्रभाषात्वसंभावना ॥

अयमाशयः—देवभाषापरिषदो मुख्यं लक्ष्यं संस्कृतभाषाया राष्ट्रभाषात्वमधिकृत्य सत्यमस्ति मतभेदो बहूनाम्—यतः केचन मन्यन्ते—प्रस्तावोऽयमुन्मत्तानामेवेति। परे तु मन्यन्ते—अयं वादो ब्रह्मभाववादतुल्य इति। अपरे तु मन्यन्ते—स्वाप्निकोऽयं भाव इति। इतरे तु मन्यन्ते—असद्वाद एवायमिति। अन्ये तु—विरलाः केचन साहसिका दृढसंकल्पा असाध्यपदमेवासत्कल्पं मन्वाना न किमप्यसाध्यं नाम, सत्युत्साहे सति वा समुचिते प्रयत्ने—इति। वयं तु पृच्छामः—यदि साहसिकानामप्ययं प्रस्तावोऽनादरबुद्धावपि परीक्षाव्याजेन कियन्तञ्चन कालमनुष्ठानपर्यवसायितां नीयते—"न हि कल्याणकृत कश्चिद् दुर्गतिं तात गच्छति," "न मे भक्तः प्रणश्यति" इति वा नीतिमवलम्ब्य, कार्यान्तराणां स्वामिमतानामनुपरोधेनैव च, तर्हि का वा हानिर्नो भविष्यतीति। यदि साहसिकानामेवायं पक्षः फलति, तदाऽमृतस्यैव संप्राप्तिः, मृतस्यैव वा। यदि तु परेषाम्—तर्हि प्रत्यहमस्माभिः कार्यान्तरोपरोधेनापि समाद्रियमाणानां सर्वथा निष्प्रयोजनानां परःसहस्राणामन्यतम् एवायं पक्षो भविष्यति, इति न साहसिकानामपि पक्षस्यादरणे काऽपि महती विनष्टिः॥

निखिलभारतवर्षीयसंस्कृतसाहित्यसम्मेलनस्यापि संस्कृतभाषायाः सर्वत्र विशिष्टः प्रचार एवोद्देश्य आसीत्, येन तेनैवोद्देश्येन तन्मुखपत्रमप्येकं बहोः कालात तत्प्रवर्तकैः प्रकाश्यते—संस्कृतरत्नाकराख्यम्। एवमेव संस्कृतसाहित्यपरिषत् कलिकातानगरे त्रिशिरःपुर्यादौ चान्यान्याः प्रायेण परःसहस्रं संस्थाः संस्कृतभाषायाः प्रचारमेव काङ्क्षन्त्यो भारतवर्षे बहूनां विद्यालयानां छात्रावासादीनां च व्यवस्थापनेन देवभाषाकैङ्कर्यमेव स्वलक्ष्यं मन्वानास्तत्र तत्र प्रान्तेषूपलभ्यन्ते। काशीहिन्दुविश्वविद्यालयः, युक्त-विहारासामोत्कल-पञ्चनद-सिन्धु मद्रादिप्रान्तेषु बङ्गप्रान्ते च राजकीयान्येव संस्थानान्यनेकान्येतदर्थं प्रवर्तितानि दृश्यन्ते। एवं परःसहस्रं धर्माचार्या देवालयसमितयः, धार्मिकसंस्थाविशेषाः, धार्मिकप्रवरा राजमहाराजादयः, किं बहुना, न केवलं भार-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीयाः, किन्तु तदितरेऽपि सर्वे मिलिताः स्वकर्तव्यबुद्धया संस्कृतभाषाप्रचारार्थं कोट्यधिकानि रूप्याणि प्रतिमासं विनियुञ्जते तत्र तत्र, इति भाषान्तरापेक्षया महानेव प्रचारः साम्प्रतमपि देवभाषाया वर्तते, संस्कृतभाषाभिमानिनश्च कोट्यधिकाः। एते हि कुम्भमेलादितीर्थयात्रातुल्यमेव संस्कृतभाषाप्रचारं तदभिमानं वा मन्यन्ते, न तु समुदायशक्त्या किमपि कर्तव्यमनया भाषया। तेन हि 'कुम्भकोणे कृतं पापं कुम्भकोणे विनश्यती'तिन्यायेन तत्र तत्रैव तदीयाः प्रयत्ना उपन्नमात्रा विलीयन्ते। अतो यदि सर्वेषु प्रान्तेषु विद्यमानानां सर्वासां देवभाषाशिक्षासंस्थानामेकैकप्रतिनिधयोऽन्ततो गत्वा संस्कृतशिक्षाप्रणालीम्, संस्कृतभाषाया व्यवहारोपयोगिताव्यवस्थापकं प्रकारविशेषं च समालोच्य संस्कृतभाषाप्रचारपद्धतिमेकरूपां निश्चेष्यन्ति समुदायशक्त्या वाऽवयवशक्त्या वाऽऽलोच्य, तर्हि संस्कृतभाषाया वत्सरशतकाभ्यन्तरे भारतवर्षव्यापिता न दुःशकेति प्रतिभाति। किं बहुना—साम्प्रतं भारतवर्षे यावन्तः संस्कृतज्ञाः, सर्वेऽपि ते, सर्वेषु व्यवहारस्थानेषु, किं बहुना, स्वगृहेऽपि, यदि संस्कृतभाषयैव व्यवहारः कर्तव्य इति दृढं प्रतिजानीयुः, यदि च यथासंभवं संस्कृताध्ययनाध्यापनादिप्रसङ्गेष्वपि संस्कृतभाषामेवोपयुञ्जीरन्, यथाऽऽङ्गलादिभाषां तत्तद्विद्यालयेषु, तर्हि वर्षशतकेन संस्कृतभाषामय एव सर्वोऽपि लोकः स्यात्, इति साहसिकानामुन्मत्तानामसत्कल्पव्यवहारशीलानां वा वाद एव सर्वादरणीयो भविष्यति, वर्षशतकं तु देवभाषाया राष्ट्रभाषात्वव्यवस्थापनेऽत्यधिकं च भविष्यति। अतः संस्कृतभाषाया राष्ट्रभाषात्वमत्यन्तमसंभवीति वादो न मया साधु मन्यते, यदि तेनैव लक्ष्येण देवभाषाया अध्ययनाध्यापनादिव्यवस्था लोकव्यवहारश्च सर्वैरपि समाद्रियेत, समुदायशक्तिश्च काचन लक्ष्यतया मन्येत॥

॥ देवभाषाया राष्ट्रभाषात्वव्यवस्थायां केचनोपायाः ॥

इदमेवात्र विवादास्पदम्—कथं वेदं प्रसङ्गजातं सर्वमपि श्रवणमात्रसुन्दरमपि कार्यरूपेण परिणमयितुं शक्यम्, के वा प्रकारास्तत्र समादरणीया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति। इदमेवात्र प्रतिभाति—पञ्चदशे षोडशे वाऽधिवेशने देवभाषापरिषदियं तत्तद्विद्यालयानां तत्र तत्र विद्यमानानां संस्कृतज्ञानां संस्कृतभाषासंस्थानां च नामधामादिकं संगृह्य, प्रापय्य च सर्वेषां येन केनापि प्रकारेण परिषदा संगतिम्, तत्तत्प्रतिनिधीनां द्वारेण स्वीयं कार्यं यदि क्रमेण फलपर्यवसायितां प्रापयेत, तर्हि क्रमेण स्वीयं लक्ष्यमपि कथञ्चन विन्देत। विश्वसिमि—सर्वेऽपि संस्कृतपत्रिकासम्पादकाः, विद्यालयाश्च तत्र साहाय्यं करिष्यन्ति, यदि तेऽनुरुध्येरन। अतो देवभाषापरिषदो लक्ष्यसिद्धये प्रथमं सोपानमिदमेव मे प्रतिभाति। अत इदं प्रार्थ्यते—निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु कर्तव्यबुद्धिमिह जातु न जहातु कोऽपि। यतः—"न जातु कामान्न भयान्न लोभाद्धर्मं जह्याज्जीवितस्यापि हेतोः।"

किंच भाषाप्रचारो हि तदैव सुगमो भवति, यदा लौकिका वैदिकाश्च सर्वेऽपि व्यवहाराः—धार्मिकाः, सामाजिका नैतिका वा यावतां शब्दानां देवभाषागतानां द्वारेण निर्वहणीयाः, तेषां शब्दानां काचन सूची संग्राह्येति कलिकातानगरे निखिलभारतवर्षीयसंस्कृतसाहित्यसम्मेलनावसरे प्रस्तुतमपि नैतावताऽपि कार्यरूपेण केनापि कारणेन परिणतम्। प्रत्येमि देवभाषापरिषदियं निखिलभारतवर्षीयसंस्कृतसाहित्यसम्मेलनजीवातूनां महामहोपाध्यायश्रीगिरिधरशर्ममहोदयानां शरणीकरणेन तदीयान् सर्वानपि तदुपयुक्तान् संग्रहान् संगृह्य, तेषामेव नेतृभावेन प्रारब्धं तदीयं कार्यं समाप्य वा व्यवहारोपयोगिनः सर्वानपि शब्दान् अवतारयिष्यति—इति। ततश्च संस्कृतभाषाया राष्ट्रभाषात्वव्यवस्थापनाख्ये लक्ष्ये प्राप्तव्ये द्वितीयं सोपानं सर्वविधव्यवहारोपयोगिशब्दसूचीसंग्रहणं नाम। तदेवंरूपे सोपानद्वयेऽधिरूढे प्राप्त एव स्यात् प्रासादो देवभाषापरिषदो लक्ष्यरूप इति परमो विश्वासः। अत्र च "येनापि केनापि हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि" इति नीतिमात्रं शरणीक्रियताम्। यतः "सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः।" इदं तु मनसि सर्वैरपि रक्षणीयम्—यत् महत्यस्मिन् समुद्यमे प्रत्यूहा एव बहवः, तत्राप्यन्तरङ्गविरोधनिबन्धनाः प्रत्यूहमेव कार्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारिणां तदा तदा समापतन्तोऽपि "अग्रतः कृतं पदं न कथमपि पश्चात् कर्तुमलमि"ति नीतिमवलम्ब्य तृणाय मन्तव्याः, यदि कार्यं साधनीयम्। संस्थान्तराणि सर्वाण्यनुकूलानि प्रतिकूलानि वा भवतामत्र प्रत्यक्षाणि निदर्शनानि। प्रारम्भावस्थायां नाममात्रतः प्रसिद्धानि त्रिचतुरैश्चाल्यमानानि च विघ्नैः पुनः पुनरपि प्रतिघातेऽप्यपरित्यक्तानि बहिरङ्गैरन्तरङ्गैश्च कैश्चन कैश्चन निन्दितानि संस्तुतानि वाऽनेकानि संस्थानानि साम्प्रतं सर्वैरपि परमादरणीयानि दृश्यन्ते, इति सत्यमुक्तम्—"यत्तदग्रे विषमिव परिणामेऽमृतोपमम्"ति ॥ (क्रमशः)

व्याकरण-विमर्शः

[निबन्धकः—श्रीक्षितीशचन्द्र चट्टोपाध्यायः]

(१)

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥

इति सप्तशतीश्लोके (४।१५) भवतीप्रसादात् इति पदस्यार्षत्वं प्रायेण व्याख्यातारः प्रतिजानते। अस्माकं पुनरत्र गरीयान् संशयो वर्तते। तथाहि भवच्छब्दस्य सर्वनामसंज्ञाविधाने प्रयोजनानि प्रतिपादयता वार्त्तिककृतोक्तम्—भवतोऽकच्छेषात्वानि (१।१।२७।११) इति। व्याख्यातञ्चेदं भाष्यकृता—भवतोऽकच्छेषात्वानि प्रयोजनम्। अकच् भवकान। शेषः स च भवांश्च भवन्तौ। आत्वम् भवादकू। इति। निरुक्तप्रयोजनतोऽतिरिक्तान्यपि प्रयोजनानि वर्तन्त इति प्रदर्शयता भगवता पतञ्जलिनोक्तम्—"किं पुनरिदं परिगणनम्, आहोस्विदुदाहरणमात्रम्। उदाहरणमात्रमित्याह। तृतीयादयो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽपि हीष्यन्ते। सर्वनाम्नस्तृतीया च [२।३।२]। भवता हेतुना। भवतो हेतोरिति।" इति। कौस्तुभकृता पुनरितोऽप्यतिरिक्तप्रयोजनप्रतिपादिका काचन कारिका समुद्धृता—

फिञ्चद्रिमयटः पूर्वनिपातष्ठक्छसौ तथा।
आत्वैकशेषष्यञ्विरहा अकच भवतः फलम्॥ इति।

अत्र प्रथमत इदमेव प्रतीतिपदवीमवतरति यत् न खलु वाक्यकारेण नापि पदकारेण नापि प्राचीनकारिकाकारेण भवच्छब्दस्य सर्वनामस्वन्तर्भावे प्रयोजनप्रदर्शनावसरे पुंवद्भावस्य समुल्लेखो विहित इति। तसिलादिष्वा कृत्वसुचः [६।३।३५] इतिसूत्रेऽव्याप्तिप्रदर्शनपरेण कात्यायनेनोक्तम् "ठक्छसोश्च" इति। वार्त्तिकमिदं व्याचक्षाणेन भाष्यकृता "ठक्छसोश्च पुंवद्भावो वक्तव्यः। भवत्याश्छात्राः भावत्का भवदीयाः।" इत्येवोक्तम्। प्रायेण भाष्यकारेण वार्त्तिकानामवकरत्वमेव प्रतिपाद्यते, अत्र पुनर्जाज्वल्यमानेऽपि 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति वचनव्याख्यास्त्रे भाष्यकारेण वैतसी वृत्तिरेव समाश्रिता। ठक्छसोश्चेत्यस्य भवच्छब्दैकविषयतया वृत्तौ ठक्छसोरेव परयोर्भवच्छब्दस्य पुंवद्भावः नान्यत्रेति नियमो विस्पष्टमेव प्रतीयते। "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति भाष्यकारवचनन्तु भवच्छब्दातिरिक्तसर्वनामशब्दपरमित्यर्थात् सिध्यति। एकतद्धिते च [६।३।६२] इति सूत्रेण तद्धित उत्तरपदे च एकशब्दस्य पुंवद्भावविधानं सर्वथा सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति वचनस्य सूत्रकारासम्मतत्वमवबोधयति। एवञ्च सूत्रवार्त्तिककारमतेन सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति वचनस्य शशविषाणायमानत्वं सूत्रकारमतेन केवलम् एकशब्दस्य तद्धित उत्तरपदे च पुंवद्भावः, वार्त्तिककारमतेन ठक्छसि च केवलं भवच्छब्दस्य पुंवद्भावः, भाष्यकारमतेन भवच्छब्दव्यतिरिक्तसर्वनाम्नो वृत्तिमात्रे पुंवद्भावः, भवच्छब्दस्य पुनष्ठक्छसि च इति सिद्धम्। एवञ्च—

स्वर्गं प्रयाति च ततो भवतीप्रसादात् [सप्तशत्याम् ४।१५]
आयास्ये भवतीगेहमिति तां प्रहसन हरिः [विष्णुपुराणे ५।२०।३२]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकोऽहं भवतीसुतक्षयकरो मातः कियन्तोऽरयः [वेणीसंहारे ५।९]

न्याय्यास्ते भवतीदासा इति तां चावदन्नृपः [कथासरित्सागरे २।१३।१९२]

इत्यादयः प्रयोगा निराबाधा एव ।

यच्च दुर्घटवृत्तौ स्त्रियाः पुंवदित्यत्र योगविभागमाश्रित्य समाहितम् तदप्यनावश्यकमेव ।

यच्च निरुक्तवेणीसंहारचरणव्याख्यानावसरे अप्पाशास्त्रिविद्यावाचस्पतिनोक्तम्—अत्र भवदात्मजक्षयकर इति चेत् सम्यगभविष्यत् पाठः । भवतो हि सर्वनाम्नः 'एवं तर्हि सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्यः' इति भाष्यकारोक्त्या पुंवद्भावे भवत्सुतक्षयकर इत्येव स्याद्रूपम् न पुनर्भवतीसुतक्षयकर इति । न च फिञ्द्रीति परिगणनया पुंवद्भावे न सर्वनामत्वमिति वाच्यम् । पुंवद्भावोऽपि भवतः सर्वनामत्वे प्रयोजनम् इति समभिधाय भवत्याः पुत्रः भवत्पुत्र इति कौस्तुभ उक्तत्वात् । फिञ्द्रीत्यादेरुदाहरणमात्रत्वस्य भाष्यादावुक्तेश्चेति । यत्तु जगद्धरो भवतीत्यत्र पुंवद्भावः प्रियादिपाठात् स्त्रियाः पुंवदिति योगविभागाद्वेति प्राह तदेतन्न समञ्जसम्, प्रियादिषु सुतशब्दस्य पाठाभावात्, योगविभागस्य चादर्शनात् इति तदप्येतेन प्रत्युक्तम् ।

अर्वाचीनैस्तु वैयाकरणैश्चन्द्रादिभिः सर्वैरेव "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति सर्वत्रैव समास्थितम् ॥ तेषां मतेन

जन्मप्रभृति पापिष्ठावावां देवि दृढव्रते ।

त्वत्प्रसङ्गाद्भवद्गेहे धर्मलेशोऽस्तु नाविह ॥ पद्मपुराणे १।२०।३०

भवद्दर्शनात् प्रभृति [कादम्बर्याम् १३७]

एतन्मनो यद्भवदेकवृत्ति [नैषधे ३।१०५]

तन्मयापि भवदर्हणार्हति [नै० १८।४२]

भामिनि रुचिरमूर्त्तिः सुराजगुणसम्पूर्त्तिरसावर्भको भवदन्वयसम्भवो न भवति ।···निमित्तेन केन दीनो भवदधीनो जातः ।[दशकुमारे १।१]

080549

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मदात्मजमेनं भवत्तनुजस्य···परिचर्याकरणायानीतवत्यस्मि ।

[दशकुमारे १।१]

अन्यसंक्रान्तप्रेमाणो नागरका अधिकं दक्षिणा भवन्ति ।

[विक्रमोर्वशीये]

न मानिनीशं सहतेऽन्यसङ्गमम् [भट्टौ २।६]

सत्यं ब्रवीमि न त्वं मां द्रष्टुं वल्लभ लप्स्यसे ।

अन्यचुम्बनसंक्रान्तलाक्षारक्तेन चक्षुषा ॥ [काव्यादर्श, २।१२६])

इत्यादयः प्रयोगा उपपद्यन्ते ।

(स्थलविशेषे विपरीता अपि प्रयोगा दृश्यन्ते । यथा

ज्ञातऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता [दशरूपके २।२५]

अन्यासम्भोगचिह्नैः [प्रतापरुद्रयशोभूषणे] इत्यादिषु ।)

अत एव ठक्छसोश्चेति वार्त्तिकं व्याचक्षाणैर्बहुभिरुक्तम्—सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति वचनस्य जागरूकत्वादेतद्वार्त्तिकम् एकतद्धिते च इति सूत्रं च नारम्भणीयमेवेति ।

एवञ्च सूत्रकृता एकतद्धिते च इति सूत्रस्य प्रणयनात् वार्त्तिककृता च ठक्छसोश्च इति वार्त्तिकस्य विरचनात् भाष्यकृता च तस्यैव वार्त्तिकस्याप्रत्याख्यानात् भवच्छब्दस्य सर्वनामस्वन्तर्भावे प्रयोजनपरिगणनावसरे वार्त्तिक-भाष्य-प्राचीनकारिकासु पुंवद्भावस्य चानुल्लेखात् भवतीप्रसादादित्यादीनां सर्वथा साधुत्वमेवावस्थितम् न पुनः संक्षिप्तसारादिसम्मतमागमिकत्वम् इति शम् ।

(क्रमशः)

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता ।

वार्षिकमूल्यम्—रूप्यकत्रयम् ३)
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.
Printed at the Calcutta Oriental Press, Ltd.,
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

February, 1944 Reg. No. C. 1073

गुरुकुल कांगड़ी 26-5-48

सम्पादकः—
महामहोपाध्याया-
नन्तकृष्णशास्त्री
सहकारिसम्पादकः—
श्रीजानकीनाथ-
शास्त्री

संस्कृत-साहित्य-
परिषदो मासिकं
मुखपत्रम्

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

February, 1944 | १८६५-शकीये माघे २६श-वर्षस्य १०म-संख्या | Vol. XXVI, No. 10

महाधर्मपालजातकम्

(पालिभाषातः अनूदितम्)

(पूर्वानुवृत्तम्)

[निबन्धकः—श्रीअमरेन्द्रमोहन-तर्कतीर्थः]

बहुश्रुता वेदगुणा भवन्ति
तस्माद्धि नो दहरा म्रियन्ते ॥
माता पिता च भगिन्यो भ्रातरश्च
पुत्राश्च दाराश्च वयश्च सर्वे ।
धर्मं चरामः परलोकहेतुं
तस्माद्धि नो दहरा न म्रियन्ते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दास्यश्च दासा अनुजीविनश्च
परिचारिकाः कर्मकराश्च सर्वे ।
धर्मं चरन्ति परलोकहेतुं
तस्माद्धि नो दहरा न म्रियन्ते ॥

अवसाने—

धर्मो ह वै रक्षति धर्मचारिणं
[8]धर्माः सुचीर्णाः सुखमावहन्ति ।
एषाऽनुशंसा धर्मे सुचीर्णे
न दुर्गतिं गच्छति धर्मचारी ॥
धर्मो ह वै रक्षति धर्मचारिणं
छत्रं महदिव वर्षकाले ।
धर्मेण गुप्तो मम धर्मपालः
अन्यस्य अस्थीनि, सुखी कुमारः ॥ इति

आभ्यां द्वाभ्यां गाथाभ्यां धर्मचारिणो गुणमकथयत् ।

तच्छ्रुत्वा आचार्य आह—"ममागमनं स्वागमनं सफलं, न निष्फलं" इति । सञ्जातसौमनस्यो धर्मपालस्य पितरं क्षामयित्वा "मया आगच्छता युष्माकं विमर्शनार्थाय इमानि एडकास्थीनि आहृतानि, पुत्रस्ते अरोग एव, युष्माकं रक्षणधर्मं मह्यमपि दत्त" इति पत्रे लिखित्वा कतिपयान्यहानि तत्र उषित्वा तक्षशिलां गत्वा धर्मपालं सर्वशिल्पानि शिक्षयित्वा महता परिवारेण तं स्वभवनं प्रैषयत् ।

---

8 मू धर्म्मो सुचीरणो ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरण-विमर्शः

[निबन्धकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(२)

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ [१।४।५२] इति सूत्रे बुद्ध्यर्थकशब्देन ज्ञानसामान्यार्थानामेव ग्रहणं न तु तद्विशेषार्थानाम्, तेन स्मरतिजिघ्रतीत्यादीनां न इति वैयाकरणानां समयः। अत्र च बीजम् 'दृशेः सर्वत्र' इति वार्त्तिकम्। भाषायां पुनः सर्वत्रैव णिजन्तस्मृधातोरणिकर्त्तुः कर्मत्वमेवोपलभ्यते। प्रामाणिकप्रवरमूर्धन्येन भाष्यकारेणापि णेरणाविति सूत्रे 'स्मरति वनगुल्मस्य कोकिलः स्मरयत्येनं वनगुल्मः स्वयमेव' इत्यत्राणिकर्त्तुः कर्मत्वमेव कृतम्। यच्च भाष्यप्रदीपोद्द्योते पूर्वाचार्यमतानुसारिणा नागेशभट्टेनोक्तम्—'यद्यपि गतिबुद्धीतिसूत्रे ज्ञानसामान्यार्थकानामेव ग्रहणमिति स्मरयतियोगे णाप्यन्तकर्तुः कर्मत्वप्राप्तिः, तथाप्येतद्भाष्यप्रामाण्यादाध्यानार्थकस्मरतेरपि तत्र ग्रहणं बोध्यमिति तात्पर्यम्' इति, तत्राध्यानार्थकेत्यंशस्य परिहारेऽधोनिर्दिष्टाः प्रामाणिकाः प्रयोगा उपपद्येरन्।

अहो कामस्य वामत्वं यो गतामपि दुर्लभाम्।
स्मारयिष्यति कल्याणीं कल्याणतरवादिनीम्॥

[रामायण ४।१।६७]

ततो मातलिना शस्त्रमस्मार्यत महीपतिः। [भट्टि १७।१०६]

अनेन मत्प्रियाभियोगेन स्मारयसि मम पूर्वशिष्यां सौदामिनीम्।

[मालतीमाधव १]

अपि चन्द्रगुप्तदोषा अतिक्रान्तपार्थिवगुणान् स्मारयन्ति प्रकृतीः।

[मुद्राराक्षस]

पातालमुद्यतफणाकृतिशृङ्गकोऽयं
मामद्य संस्मरयतीव भुजङ्गलोकः। रत्नावली १।१०

स्मरिष्यति त्वां न स बोधितोऽपि सन् [शकुन्तला ४] इति कालिदासीयं पद्यमपि बोधस्मरणयोर्घनिष्ठं सम्बन्धं प्रतिपादयति, परं दृशेः सर्वत्र इति वार्त्तिकानुरोधेनैव सूत्रे बुद्धिशब्दस्यार्थसङ्कोचो विहितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा चास्माभिर्दृश्यते तथा वार्त्तिकमिदं शब्दकर्मकमुद्दिश्य प्रयुक्तं न पुनर्बुद्ध्यर्थकम्। तथा ह्यत्रत्यभाष्यम्—

शब्दकर्मेति कथमिदं विज्ञायते—शब्दो येषां क्रियेति, आहोस्विच्छब्दो येषां कर्मेति ?

कश्चात्र विशेषः ?

शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेद् ह्वयत्यादीनां प्रतिषेधः।

शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेद्ध्वयत्यादीनां प्रतिषेधो वक्तव्यः।

के पुनर्ह्वयत्यादयः ?

ह्वयति क्रन्दति शब्दायते। ह्वयति देवदत्तः। ह्वाययति देवदत्तेन। क्रन्दति देवदत्तः। क्रन्दयति देवदत्तेन। शब्दायते देवदत्तः। शब्दाययति देवदत्तेन।

शृणोत्यादीनामुपसंख्यानमशब्दक्रियत्वात्।

शृणोत्यादीनां चोपसंख्यानं कर्त्तव्यम्।

के पुनः शृणोत्यादयः ?

शृणोति विज्ञानात्युपलभते। शृणोति देवदत्तः। श्रावयति देवदत्तम्। विजानाति देवदत्तः। विज्ञापयति देवदत्तम्। उपलभते देवदत्तः। उपलम्भयति देवदत्तम्।

किं पुनः कारणं न सिध्यति ?

अशब्दक्रियत्वात्।

अस्तु तर्हि—शब्दो येषां कर्मेति।

शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसंख्यानम्।

शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसंख्यानं कर्त्तव्यम्।

के पुनर्जल्पतिप्रभृतयः ?

जल्पति विलपति आभाषते। जल्पति देवदत्तः। जल्पयति देवदत्तम्। विलपति देवदत्तः। विलापयति देवदत्तम्। आभाषते देवदत्तः। आभाषयति देवदत्तम्।

दृशेः सर्वत्र।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृशेः सर्वत्रोपसंख्यानं कर्त्तव्यम्। पश्यति रूपतर्कः कार्षापणम्। दर्शयति रूपतर्कं कार्षापणम्।

ततश्च भाष्ये शब्दकर्मकशब्दस्य पारमार्थिकमर्थमधिकृत्य कमपि सिद्धान्तमनुपन्यस्यैव गत्यर्थान अकर्मकांश्च धातूनधिकृत्य विचारः प्रवर्त्तितः। "विजानाति देवदत्तः विज्ञापयति देवदत्तम्। उपलम्भयति देवदत्तम्। किं पुनः कारणं न सिध्यति ? अशब्दक्रियत्वात्।" इति। एतद्गता दोषा अपि भाष्यकृद्भिर्नैवोपप्रदर्शिताः। अत एव कैयटेनोक्तम् 'एवं तु बुद्ध्यर्थत्वादनयोः सिध्यतीति चिन्त्यमेतत्' इति।

एतस्माच्चास्माभिरूह्यते शब्दकर्मकमेवाधिकृत्य 'दृशेः सर्वत्र' इति वार्त्तिकोपन्यासपुरःसरं भाष्यकारेणैतस्य खण्डनं विहितम्, बुद्ध्यर्थेन ज्ञानसामान्यार्थानां ज्ञानविशेषार्थानाञ्चोभयेषामेव ग्रहणञ्च सिद्धान्तितम्। स च भाष्यांश इदानीं त्रुटित इति।

साम्प्रतं व्याकरणान्तराणां मतान्युपन्यस्यन्ते।

चन्द्रः। गतिबोधाहारशब्दार्थानाप्यानां प्रयोज्ये २।१।४४ वृत्तिः। बोधयति माणवकं श्लोकम्। वेदयति माणवकं धर्मम्।

[दर्शयति चित्रं देवदत्तेन। २।३।४६ वृत्तिः।]

जैनेन्द्रः। ज्ञागम्यद्यर्थरणिकर्त्ताधेणौ १।२।१२१

महावृत्तौ दर्शयति माणवकं ग्रामम् इत्येतस्य ज्ञानार्थामुदाहरणरूपेणोपन्यासात् सूत्रे ज्ञानविशेषार्थानामपि ग्रहणमिति प्रतीयते।

शाकटायनः। नित्याकर्मगमिज्ञाद्यर्थशब्दकर्मदृशोऽखाददिक्रन्द शब्दायह्वः १।३।११८।

[वृत्तितः ज्ञानसामान्यार्थानामित्येव प्रतीयते।]

हेमचन्द्रः। गतिबोधाहारार्थशब्दकर्मनित्याकर्मणामनीखाद्यदिह्वाशब्दायक्रन्दाम् २।२।५

हेमचन्द्रबृहद्वृत्तिः। गतिर्देशान्तरप्राप्तिः। बोधो ज्ञानमात्रं तद्विशेषश्च। शब्दः कर्म क्रिया व्याप्यं च येषां ते शब्दकर्माणः। सामान्यबोधार्थः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बुध्यते शिष्यो धर्मम्। बोधयति गुरुः शिष्यं धर्मम्। जानाति शिष्यो धर्मम्। ज्ञापयति गुरुः शिष्यं धर्मम्। एवमुपलम्भयति अवगमयतीत्यादि। विशेषबोधार्थः। पश्यति रूपतकैः कार्षापणम्। दर्शयति रूपतकं कार्षापणं वणिक्। एवं ग्रापयति मैत्रमुत्पलम्, स्पर्शयति मैत्रं वस्त्रम्, श्रावयति शिष्यं धर्मम्, स्मारयति शिष्यं धर्मम्, अध्यापयति शिष्यं शास्त्रम्। अन्ये तु बोधविशेषार्थस्य दृशेरेवेच्छन्ति नान्येषाम्। तन्मते जिघ्रत्युत्पलं चैत्रः, ग्रापयत्युत्पलं चैत्रेण मैत्रः। एवं स्पर्शयति चैत्रेण वस्त्रम्, श्रावयति धर्मं शिष्येणेत्यादौ प्रयोज्यकर्तरि तृतीयैव भवति।

संक्षिप्तसारः। याशिज्ञाव्र्श्वर्थाकर्मणोऽन्यादेः प्रयोज्यः। ६।१०।

दर्शयति रूपं प्रियाम्, ग्रापयति सौरभं दयिताम्, स्पर्शयति गात्रं कामिनीमित्यादि, ज्ञानार्थान्तर्भावात् इति गोयीचन्द्रः।

मुग्धबोधम्। घोऽर्थौ बेः शब्दाशनगतिज्ञार्थाढग्रहदृशश्रोरखादनीक्रन्दायशब्दायह्वादासुतघवहाहिंसाभक्षो हक्रुमाभिवादिदृशस्तु वा। २८५।

ज्ञार्था ज्ञानार्थाः। यथा, बोधयति शिष्यं धर्मम्, ज्ञापयति नृपं हिताहितम्, ग्रापयति जायां पुष्पम्, स्पर्शयति गात्रं कामिनीमित्यादि। रामतर्कवागीशटीका। एवञ्च स्मरणमपि ज्ञानविशेषः। तथाच संविद् भगवती देवी स्मृत्यनुभवभेदिकेति तार्किकाः। तेन गुरुः शिष्यं श्लोकं स्मारयतीत्यादि। इति दुर्गादासटीका।

सुपद्मम्। गतिबुद्ध्याहारशब्दार्थाकर्मकाणामनीखाद्यादिह्वशब्दायक्रन्दां प्रयोज्यः। २।१।४।

तथाच श्रावयति नूपुरशिञ्जितान्युद्वोढारम्, ईक्षयति विभ्रमं लोकान्, ग्रापयति छात्रमामोदम्, स्पर्शयति गात्रं कामिनीं कामीत्यादयोऽपि बुद्ध्यर्थं समर्थनीया इति मकरन्दे विष्णुमिश्रः। तङि नियमादन्यत्र दृशेर्बुद्ध्यर्थत्वान्नित्यं कर्मत्वमिति जिनेन्द्रबुद्धिपादाः इति दृश्यभिवाद्योरात्मनेपदे इति सूत्रस्य वृत्तौ पद्मनाभः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कातन्त्रपरिशिष्टम्। ध्रौव्यगतिबुद्धिशब्दाभ्यवहारार्थानां कर्त्ता हेत्विनि। कारक १८।

बुद्ध्यर्थस्य बोधयति शास्त्रं शिष्यम्, ज्ञापयति शास्त्रं शिष्यम्, श्रावयति नूपुरशिञ्जितानि वोढारम्। ईक्षयति विभ्रमं लोकान्। घ्रापयतिच्छात्रमामोदम्।

प्रयोगरत्नमाला। गतिबुद्धिप्रत्यवसितिशब्दार्थानामकर्मकाणाञ्च। ५।६२६।

इन्यकृते यः कर्ता स इनि सति कर्मसंज्ञकः स्यात्। गत्यर्थानाम्। याति विप्रो ग्रामम्। तमितरः प्रयुङ्क्ते याहि याहीत्यत्र इन्यकृते विप्रः कर्ता गमनप्रयुक्तेः कर्म स्यात्। यथा यापयति ग्रामं विप्रं यज्वा, नृपं विद्या गमयति विद्वांसम्, आटयति भृत्यान ग्रामम्। प्रवेशनप्रापणारोहणतरणान्यपि गत्यर्थाः। प्रावेशयन्मन्दिरमेनमीशः। ननु मां प्रापय पत्युरन्तिकम्। अस्त्रवेदविदयं मरुत्वता शैलमध्यमनुनीय लम्भितः। गमनान्तर्भावे प्रापणे न भवति। सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाधिलम्भयन इत्यत्र सजातीयसंवलनेनोद्रिक्तत्वमर्थो न तु गमनं सम्भवतीति न कर्मत्वमिति। अथैनामश्मानमारोहयति, तां क्षीरोदजलेशयं क्रतुभुजः पृथ्वीमवातीतरन्नित्यादिप्रसिद्धप्रयोगात्। बुद्ध्यर्थानाम्। बोधयति शास्त्रं शिष्यं गुरुः, ज्ञापयति नृपं नीतिम्, श्रावयति नूपुरशिञ्जितानि दयितम्, अशुश्रुवत पुराणानि नृपं पौराणिको द्विजः, प्रियमागतमवगमयति तन्वीम्। प्रत्यवसितिः प्रत्यवसानं भोजनमिति यावत्। भोजनार्थानाम्। आशयति पायसं द्विजं धर्मवान, प्रत्यवसाययति पाययति स्तन्यं पोतकं माता। शब्दार्थानाम्। अध्यापयत्युपाध्यायो वेदं ब्राह्मणबालकान्। एवं पाठयति वाचयति जल्पयति व्याहारयति संलापयति संभाषयति विराणयतीत्यादि।

कातन्त्रविस्तरः। गतिबोधाहारशब्दार्थाकर्मकश्रुदृशीनां प्रयोज्यः। एषां प्रयोगे प्रयोज्यः कर्ता कर्मसंज्ञो भवति। गच्छति ग्रामं देवदत्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गमयति यापयति ग्रामं देवदत्तमपरः। बोधार्थानाम्। धर्मं बुध्यते देवदत्तः। बोधयति धर्मं तमपरः। वेदयति धर्मं माणवकं देवदत्तः। आहारार्थानाम्। भोजयत्याशयति वा द्विजमोदनं विद्वान्। शब्दार्थानाम्। अध्यापयति पाठयति माणवकं वेदमुपाध्यायः। अकर्मकाणाम्। आस्ते शेते चैत्रः। तमितर आसयति शाययति। शृणोति माणवको धर्मम् श्रावयति माणवकं धर्मम्। पश्यति रूपतर्कः कार्षापणम्। दर्शयति रूपतर्कं कार्षापणम्।

सरस्वतीकण्ठाभरणम्। गतिज्ञानप्रत्यवसानार्थशब्दक्रियाकर्मकश्रुदृशीनामणिकर्ता णौ। १।१।४२

दृश्यभिवाद्योरात्मनेपदे इति सूत्रस्य वृत्तौ 'गत्यर्थादिना दृशेर्नित्यं कर्मत्वे प्राप्ते' इत्युक्तत्वात् वृत्तिकारमतेन सूत्रे ज्ञानशब्देन ज्ञानसामान्यं ज्ञानविशेषश्च बोद्धव्यमिति प्रतीयते।

देवभाषापरिषदोऽयोध्यानगराधिवेशने चतुर्दशे

सभापतीनां महामहोपाध्याय-श्रीयुक्तानन्तकृष्णशास्त्रिणामभिभाषणम्।

(पूर्वानुवृत्तम्)

॥ देवभाषापरिषदा कर्तव्यानि समाजकैङ्कर्याणि ॥

इदं तु यथावसरं सूच्यते—यद् देवभाषापरिषदियं संस्कृतभाषाप्रचारमात्रं कार्यक्षेत्रं यदि मन्येत, तर्हि तदभिलषितं न कथमपि सुसाधम्, किन्तु संस्थानान्तराणीव बहूनि कार्यक्षेत्राणि, लक्ष्याणि वाऽनयाऽपि मन्तव्यानि। तानि यथा—

(१) संस्थानां सर्वासामुन्नतिनिदानं तु समाजस्यापन्नस्य समुद्धरणार्थं साहाय्याचरणम्।

(२) अनाथानां बालानां बालिकानां स्त्रीणां च धर्माविरोधेन यथायोग्यं रक्षाव्यवस्था।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४) स्वधर्मश्रद्धोत्पादकाध्ययनप्रणालीद्वारा विद्यार्थिनां विद्यादान-व्यवस्था ।

(५) तत्तच्छास्त्रे परीक्षोत्तीर्णानामाङ्गलादिभाषान्तरपरीक्षोत्तीर्णैः समानमेव सर्वत्राधिकारवृत्त्यादिव्यवस्थापनम् ।

(६) संस्कृतपण्डितानामपि धार्मिकविचारावसरेऽन्ततो गत्वा कर्तव्या-कर्तव्यनिर्धारणे संस्कृतभाषाध्ययननियमप्रसङ्गे च नगरसंस्कारसमिति-शिक्षाविभाग-व्यवस्थापकसभादिषु पृथक् स्वतन्त्रतया सभ्यपदव्यवस्था-पनम् ।

(७) पतितानां यदि संभवः, तर्हि प्रायश्चित्तादिना शोधनेन स्वधर्माधिकारप्रदानार्थं धर्मपरिषदः स्थापनम्, बलात्कारेण मतान्तरं नीतानां शास्त्रानुमतप्रणाल्यैव शोधनम्, यदि संभवः, तर्हि स्वमतजातिकुलादि-व्यवस्थापनादिकम् ।

(८) अर्थशास्त्र-धर्मशास्त्रयोरविरोधेऽर्थशास्त्रानुसारेण राजनीतिक्षेत्रे सर्वैरन्यैः सहापि प्रेम्णा व्यवहरणम् ।

(९) "परैस्तु कलहे प्राप्ते वयं पञ्चोत्तरं शतमि"ति नीत्यनु-सरणादिकम् ।

(१०) धार्मिकतत्तत्संस्थागतानां देवालयसमितिगतानां च निधीनां कोष्ठ्यधिकानां तत्र तत्र धर्माविरोधेन तत्तच्छास्त्रागमाद्यनुसारेण चानुपदोक्त-कार्यक्षेत्रोपयोगितया तत्तदध्यक्षाणां द्वारेणैव सति संभवे विनियोगव्यवस्था । धार्मिकसंस्थानामन्यैः क्रियमाणाक्रमणादितः प्राणपणेन रक्षा च ॥

एतेषु एकैकमपि महते गुणायेति संस्थान्तरदर्शिनामपरोक्षमेव । पतितो-द्धारविषये व्रात्यसंस्कारविषयेऽन्यत्र च धार्मिकेषु प्रश्नेषु वैदिकैः स्वसिद्धान्ता-नुसारमपि संशोधनादिकं कर्तव्यमपि न क्रियते, केवलं मतान्तरनिरसन-मात्रं क्रियते । तत्र मतान्तरनिरसनं न तथा सफलम्, यथा स्वमतस्य प्रचारणम् । परमतखण्डनमात्रं हि वितण्डावाद एव, न तु वादः । तत्त्वबुभुत्सोः कथाऽपि तु समादरणीया । न ह्यन्यथा समाजस्य परिषद्ये-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्यां संस्थान्तर इव श्रद्धा स्यात्। अतो यथाशक्ति सर्वेषु स्वीयेषु कर्तव्येषु श्रद्धादृष्टिः प्रथममपेक्ष्यते, येन समाजः स्ववशः स्यात्, स्वकर्तव्यं च प्राणपणेन कर्तुं चेष्टेत, येन क्रमेण संस्कृतभाषाया राष्ट्रभाषात्वमपि लक्ष्यं समाजस्य साहाय्येन प्राप्येतापि। तदेवमस्मदीयस्य वक्तव्यस्य यथासंभवं सूचनम्। इतः परंतु परिषदेव प्रमाणम्॥

एतावत्पर्यन्तं भारतवर्षे प्रथमतो नाममात्रतो निष्पन्नाः, पञ्चषैरेव संचालिता बहुभिरेवोपहासपात्रभावेन निराकृताश्च संस्थाविशेषाः कैस्तवानां मोहम्मदानामार्यसमाज-प्रार्थनासमाज-रामकृष्णमिशन-हिन्दुमहासभा-राष्ट्रीय सभादीनां साम्प्रतं राजकीयैरपि प्रमाणमूर्धन्यता, राजकार्योपयुक्तता च या मन्यते, तत्र सर्वत्र कर्तव्यानि कार्याणि प्रायेणेमान्येव मन्यन्ते। एकस्मिन् दिने वार्षिकमधिवेशनम्, अनन्तरं तु सर्वात्मनौदासीन्यम्, पुनरधिवेशनान्तरावसर एव स्वसंस्थाकार्याणां प्रस्तावः, प्रारब्धस्य कार्यस्य प्रस्तावस्य वा तत्रैव समापनम्, इति नीतिरेव संस्थाविशेषाणामवनतिकारणम्। अतो "विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमजना न परित्यजन्ति" इति नीतिरेव कार्यदृष्टिभिः सदस्यैरवलम्बनीया। अत्र चोत्साहसम्पत्तिः, सहनशक्तिः, प्रतिवर्षं कस्यचन कस्यचन प्रस्तावस्यान्ततो गत्वा कार्यरूपेण परिणमनम्, क्रमिकोन्नतिप्रदर्शनम्, यथासंभवं स्वार्थत्यागश्च विशेषतोऽपेक्ष्यते। विश्वसिमि—एतत्परिषत्कार्यकारिष्वपि केचन तादृशाः साम्प्रतमपि वर्तन्त इत्येव कथञ्चन जीवतीयं परिषत्, क्रमेणोन्नतिं च प्राप्नोति। आशसे —भगवान् श्रीरामचन्द्रः समुचितां समुन्नतिमस्या विदधातु, लक्ष्यं चास्याः पूरयतादिति॥

॥ देवभाषाया राष्ट्रभाषात्वचर्चा ॥

इतः परं तु देवभाषायाः संस्कृतभाषाया वा ऐहिकव्यवहारनिर्वाहोपयोगिता कथम्? का नाम देवभाषा? कथमस्या दैवकार्यं विहाय मानुषेषु कार्येषु विनियोगसंभावनापि। "एकः शब्दः सुष्ठु प्रयुक्तः स्वर्गे लोके

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामधुग् भवति" इति हि संस्कृतशब्दोच्चारणानां पारलौकिकफलसाधनत्वं हि मन्यते, अपशब्दोच्चारणेन तु महदेव पातकं च स्मर्यते, कथं च तत्परिहारः ? कथं चास्या राष्ट्रभाषात्वव्यवस्थापने प्राकृतभाषाणां तत्तदेशीयभाषाणां च रक्षणं भवति ? कुत्र वा कार्यं देशभाषाणामुपयोग इति च विचारोऽवतरति ॥

मम तु प्रतिभाति—देवभाषा नामेयं न देवानामेव भाषा, किन्तु मनुष्याणां देवानां च साधारणी। यतो वदति यास्कमुनिर्निरुक्ते—"अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके।" "तेषां मनुष्यवद्-देवताभिधानम्।" "पुरुषविद्याऽनित्यत्वात् कर्मसंपत्तिर्मन्त्रो वेदे" इति।

अयमाशयः—अभिनयादीनां दुर्विज्ञेयत्वाद् अभिनयैरेव लोकव्यवहाराः सर्वेऽपि यथावदेव नियतरूपेण न निर्वहन्ति। लक्ष्मणः श्रीरामचन्द्र-पट्टाभिषेकावसरे स्वयमस्मयत, पञ्चभिस्तु सुग्रीव-विभीषण-कैकेयी-सीता-रामचन्द्रैरन्यथाऽन्यथा तद्भावो गृहीतः—सुग्रीव-विभीषणाभ्यां स्वसोदरवधेन निमित्तेन पट्टाभिषेक आवयोरिति लक्ष्मणः आवां दृष्ट्वा हसति स्मेति। कैकेय्यमन्यत—स्वपुत्रस्य भरतस्यैव पट्टाभिषेको योऽभिप्रेतस्तया, स कथमपि न फलति स्म, वैधव्यं परं फलितं तस्या इति स हसति स्मेति। सीता तु तस्य तिरस्करणेन निन्दनेन च लङ्कावासः, रावणपरवशता च बहुकालपर्यन्तमासीत्, परगृहनिवासेन स्वस्य कलङ्कमविगणय्यापि श्रीरामचन्द्रेण साकं मम सिंहासनाधिष्ठानं दृष्ट्वा लक्ष्मणोऽहसदिति। एवमेवान्यान्येऽपि। लक्ष्मणाभिप्रायस्तु क इति लक्ष्मण एव जानाति। अतोऽणीयस्त्वादभिनयानां शब्दा एव व्यवहारार्थं स्वीकृताः। ते च शब्दा न मनुष्याणामेव भाषणोपयुक्ताः, किन्तु देवानामपि। तत्र देवानां व्यवहारः परस्परं देवलोकेऽनया भाषयैव, मनुष्यलोकेऽपि कर्मानुष्ठानकाले मन्त्राद्युच्चारणकाले कर्मदेशेऽवस्थाय मनुष्यदत्तहविरादि-ग्रहणादिव्यवहारार्थं मनुष्यैस्साकमपि व्यवहारोऽनयैव भाषया भवति। यानुदिश्य वयं शब्दान् प्रयुञ्जमहे, ते हि तद्भाषाऽनभिज्ञाने तदभिमुखं न व्यवहर्तुमीशते, किन्त्वन्यान् कांश्चनाधिकृत्येमे शब्द-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोगाः, इति ततः पराङ्मुखीभवन्ति। अतः कर्मकाले देवभाषामय-मन्त्राणामेवोच्चारणं नियतम्, न तु तदर्थस्यापि भाषान्तरस्य। पूर्व-मीमांसायां मन्त्राधिकरणममुमेवार्थमभिप्रैति। अत इदं निश्चिनुमः—यन्न देवानामेवेयं भाषा देवभाषा नाम, किन्तु देवानां मनुष्याणां च साधारणी, यस्याः पाणिनि-शाकटायनादिव्याकरणसंस्कारसंस्कृतत्वेनैव साधुता, नान्यथा, इति संस्कृतभाषेति तस्या एव नामान्तरमपि, इति न केवलं देवेष्वेव व्यवहारेषु भाषाया अस्या विनियोगः, किन्तु मानुषेष्वपि व्यवहारेष्विति यास्कमुनिरभिप्रैति। यतोऽयं ब्रवीति—"शब्देन संज्ञाकरणं व्यवहारार्थं लोके" इति, "तेषां मनुष्यवद् देवताभिधानम्" इति च॥

(क्रमशः)

संस्कृत-साहित्य परिषदो वार्षिक-साधारण-सभा

आगामिवर्षीय-कार्य-निर्वाहक-सामति-सदस्यानां विभागीय-कर्मपरिचाल-कानाञ्च निरूपणार्थम् आगामिनी वार्षिक-साधारण-सभा १३५१ वङ्गाब्दीय सौरभाद्रस्य २३श (त्रयोविंश) दिवसे भृगुवासरे सायं सप्तवादनतो भविष्यति। तत्र परिषत्-सदस्यानामुपस्थितिः प्रार्थनीया।

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकत्रयम् ३)
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.
Printed at the Calcutta Oriental Press, Ltd.,
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः—
महामहोपाध्याय-
नन्तकृष्णशास्त्री
सहकारिसम्पादकः—
श्रीजानकीनाथ-
शास्त्री

संस्कृत-साहित्य-
परिषदो मासिकं
मुखपत्रम्

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

March-April, 1944 | १८६५-शकीये फाल्गुन-चैत्रयोः २६श-वर्षस्य ११-१२श-संख्या | Vol. XXVI, No. 11-12

देवभाषापरिषदोऽयोध्यानगराधिवेशने चतुर्दशे

सभापतीनां महामहोपाध्याय-श्रीयुक्तानन्तकृष्णशास्त्रिणामभिभाषणम्।

(पूर्वानुवृत्तम्)

सर्वासामेव भाषाणामियं प्रकृतिः—यद् न साधुभिरेव शब्दै र्व्यवहाराः सर्वेऽपि निरुह्यन्ते नियमेनेति। देशभाषास्वपि हि बाल्यादिकाले, यत्र विधिनिषेधशास्त्रानधिकारिता, तदानीं पशब्दानामप्युच्चारणेऽप्यपत्यवत्सलाः पितरोऽन्ये च बन्धवः सुहृदश्च सन्तुष्यन्त्येव। "आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी"ति न्यायो हि सर्वाणि विधिनिषेधशास्त्राणि शक्तमेवाधिकृत्य प्रवृत्तानि, नाशक्तमिति मन्यते। न हि सर्वथा मुख्यकर्माधिकारी गौणापद्धर्मा, गौणकर्ममात्रानुष्ठाने शक्त आपद्धर्मम्, आपद्धर्माधिकारी वा मुख्यगौणधर्मावधिकरोतीत्येव हि शास्त्रीयं रहस्यम्। अतो बाल्याद्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्थायां स्वस्य यावदध्ययनाध्यापनादिप्रसङ्गेन सम्पूर्णोऽधिकारः साधु-शब्दानामेवोच्चारणे लभ्यते, तत एव साधुशब्दानामेवोच्चारणनियमः, न त्वध्ययनादिप्रसङ्गेऽपि। "उषायाः शिक्षमाणानां बालानामुपलालनाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते।" इति हि हरिकारिका वदति, इति यावदधिकारसम्पत्ति प्रमादेन वाऽज्ञानेन वाऽसाधुशब्दानामुच्चारणेऽपि न पापभागिता शास्त्रदृष्ट्याऽपि। "याज्ञे कर्मणि नियमो" नान्यत्रेति वदन् महाभाष्यकारोऽपि कदाचनाज्ञानतोऽसमवधानेन वा लौकिक-व्यवहारेष्वपशब्दप्रयोगोऽपि न दोषायेति मन्यते। अतः सर्वेषु लौकिकेषु व्यवहारेषु राजनीतिक्षेत्रेषु सामाजिकेषु च कदाचन प्रमादतोऽपशब्दोच्चारणप्रसङ्गेऽपि न दोषलेशोऽपि, इति पापभीरुतया संस्कृतशब्दानामुच्चारणेऽप्रवृत्तिर्जनानामिति न क्षोदक्षममिदम्। साम्प्रतमपि वैदिकनिबन्धानारभ्याद्यतननिबन्धपर्यन्तेषु यथावद् व्याकरणादिसंस्कृता एव शब्दाः प्रयुक्ता इति तु न संभवतीदम्। अत एवार्षत्वात् साधुरिति तत्र तत्र व्यवहारः। केचन भाष्यव्याख्यातरस्तु—आर्षत्वसूचनार्थमबद्धमाहेति भाष्यगतानां केषाञ्चनापपदानां साधुत्वं व्यवस्थापयन्ति। अतो गच्छतः स्खलनं न दोषायेति मत्वा व्यवहर्तारः सर्वेऽपि पुरोभागितामनवलम्बमानाः सम्यगेव प्रकरणाद्यनुसन्धानेन सर्वमपि व्यवहारजातं निर्वहन्तु, क्रमेण चावसरे सख्यभावमवलम्ब्य परस्परसंशोधनेन साधुशब्दैरेव व्यवहारसमर्थाश्च भवन्तु, यदि संस्कृतभाषया व्यवहार एव लक्ष्यतया मन्येत। अत इदं देवभाषाया राष्ट्रभाषात्वमभिलषद्भिः प्रथमतः कर्तव्यम्—यत् पूर्वोक्तिरीत्या सोपानद्वयस्य समीकरणं नाम॥

प्राकृतभाषाणां तत्तद्देशभाषाणां च का गतिरिति प्रश्नस्तु साम्प्रतमाङ्गलभाषाया राष्ट्रभाषात्वे तदनभिज्ञानां का गतिरिति प्रश्नोत्तरेणैव समाधानमर्हति। पूर्वोक्तरीत्या येन केनापि प्रकारेणावधानेनानवधानेन साहसेन वा हठेन वा संस्कृतभाषया व्यवहारं ये नाभिलषन्ति, राष्ट्रीये च कार्येऽत्यन्तमेवौदासीन्यमवलम्बितुं चेच्छन्ति, साम्प्रतमिव तत्तद्देशभाषयैव तु व्यवहारं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वकर्तव्यं च मन्यन्ते, त एव नाम शरणं प्राकृतभाषाणां तत्तद्देशभाषाणां च, "उषायाः शिक्षमाणानां बालानामुपलालनाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते" इति पूर्वोक्तनीत्योपक्रमणिकावस्थायां वा भाषान्तराणि सर्वाणि सर्वेषां शरणम्। भाषान्तराणि हि आङ्ग्लभाषयाऽपि साकमेकैकदेशस्यैव भाषा, न तु यास्कोक्तरीत्या मनुष्यमात्रस्य, देवानां च वा। अतस्तत्तद्देशीयानां राष्ट्राधिपतित्वं यावद् भवति, तावदेव तस्या भाषाया राष्ट्रभाषात्वं भवितुमर्हति। साम्प्रतं राष्ट्रीयसभायां प्रधानाः कार्यकारिणो हिन्दीभाषया व्यवहारस्थानमेव देशमलङ्कुर्वन्ति, इति तदीयमेव मतमनुसृत्य हिन्दीभाषाया राष्ट्रभाषात्वव्यवस्थापने प्रयत्नः, अथवा स्यादपि राष्ट्रीयसभा हिन्दुमोहम्मदसाधारणी इत्युभयसाधारणी हिन्दीभाषा भवत्विति तदीयो निर्णय इति। यद्येवम् भारतीयानामाङ्गलानां भाषा का वा स्यादिति प्रश्ने तु तैरपि देशन्तरीययाप्यनया स्वस्वकार्यं निर्वहणीये तत्राधिकारलोभेन स्वायत्तीकर्तव्यैव राष्ट्रभाषा या कापि गत्यन्तरमपश्यद्भिः। संस्कृतभाषाया राष्ट्रभाषात्वं हि मनुष्यभाषात्वनिबन्धनमेव वयं मन्महे, न तु तत्तद्देशप्राधान्यनिबन्धनम् ॥

सर्वथा तु राष्ट्रभाषात्वव्यवस्थापनावसरः केवलं हिन्दूनामेव राष्ट्राधिपतित्वमपेक्षते, न केवलं हिन्दूनां राष्ट्राधिपतित्वमात्रम्, किन्तु हिन्दुमयत्वमेव सर्वस्य राष्ट्रस्येति। अतो वयं संदिह्मः—कदा वा कथं वेदं संभवतीति ? सर्वथा तु—हिन्द्यादिदेशीयभाषाणामिव संस्कृतभाषाया अपि राजनीतिप्रसङ्गेषु विनियोगानुमतिमात्रम्, आङ्गलादिभाषासमप्रधान्यं च यथा स्यात, तथा प्रयत्नस्तु प्रथमसोपानतया नियतं फलेग्रहितां यास्यति, येन व्यवस्थापकसभादिषु, अधिकरणस्थानेषु च संस्कृतज्ञानामेकं पृथक्स्थानमन्ततो गत्वा धार्मिकतत्त्वाद्यवधानप्रसङ्गे संस्कृतभाषाया भाषान्तरेऽनुवादप्रसङ्गे च व्यवस्थापयितुमवसरः स्यात्, यत्तु विशेषतः साम्प्रतमपेक्षामहे, यतो व्यवस्थापकसभादिषु तदा तदा धर्माधर्मविचारप्रसङ्गेऽयमेव धर्मोऽयमेवाधर्म इति निर्णये देवभाषामयमिताक्षरा-दायभाग-मयूखादीनां समा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोचने पाश्चात्यसरणिमनुसरन्त इव प्राच्यसरणिमनुसरन्तोऽपि न समाने स्थाने रक्ष्यन्ते, इति महती त्रुटिः, अवहेलना वा राजनीतिक्षेत्रे दृश्यते ॥

॥ व्यवहारालये व्यवस्थापकसभासु च संस्कृतपण्डितानां स्थानावश्यकता ॥

इदमेवात्राश्चर्यनिदानम्—यत् संस्कृतभाषाबद्धा मिताक्षरा-दायभाग-मयूखादिग्रन्था अपि संस्कृतभाषापण्डितप्रवरैर्विव्रियमाणा अप्रमाणं मन्यन्ते, आङ्गलभाषया विवृतास्तु प्रमाणमूर्धन्या मन्यन्ते व्यवहारालयेषु, येन धर्माधर्मव्यवस्थायामपि संस्कृतभाषायाः, तत्र निष्णातानां वा न स्थानमपि दीयते। आङ्गलराज्यशासनारम्भकाले व्यवहारालयेषु तत्तत्सन्देहनिरासार्थं पण्डितपरिषदप्येकाऽऽसीत्, येषां कोर्टपण्डिता इति व्यपदेशः, साऽपीदानीमस्तं गतेति महदिदं दुःखनिदानम्। विश्वसिमि—अन्ततो गत्वा देवभाषापरिषदियं राष्ट्रकार्येष्वपरेष्वौदासीन्यमिवाश्रित्यापि धर्माधर्मादिव्यवस्थाप्रसङ्गे पण्डितपरिषदेका व्यवहारालयेषु व्यवस्थापकसभादिषु च यथाऽचिरेण व्यवस्थापिता स्यात्, तदर्थं स्वीयां सर्वामपि शक्तिं विनियुञ्जीतेति ॥

विदितमिदं सर्वेषाम्—श्रीरावसमितिरेका व्यवस्थापकसभया नियुक्ता यथेच्छमेव दायभागाधिकारादिव्यवस्थां विवाहादिव्यवस्थां च करोतीति। सा हि प्रथमं वदति—निबन्धत्रयं समुच्चितं प्रमाणम्, तेषु विरोधे तु निषिद्धः पक्षस्त्याज्यः, अन्यथा तु विहितः पक्षो ग्राह्यः—इति, सर्वेषां विरोधे तु समितिव्यवस्थैव प्रमाणमिति तु निरङ्कुशमेव। अत्र सर्वत्र यथेच्छव्यवस्थायां प्रतिरोधो देवभाषापरिषदाऽवश्यमेव विधेयो विशेषेण, यावत् पण्डितपरिषदपि स्वतन्त्रैतादृशेष्ववसरेषु व्यवस्थापकसभया न संघट्यते। विश्वसिमि—"मृदुर्हि परिभूयते" इति न्यायेन संस्कृतपण्डितानां मार्दवमेवात्र परमं निदानम्। साम्प्रतं हि राजनीतिक्षेत्रे भारतीया धर्मविरोधिनोऽपि स्वाधिकारबलेनैव स्वहस्तगतेन, धनबलेन वा जयन्ति, न तु स्वयुक्तिबलेन, स्वमतबलेन वा। एते हि स्वाधिकारमधिजिगमिषवः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्मरन्ति नारायणमाषत्कल्पतया, उत्तीर्णायां त्वापदि तिरस्कुर्वन्ति तु तमेव —यावत्सेतुतरणं नारायणः, उत्तीर्णे च तस्मिन कूरायण इति। अत्र सर्वत्र संस्कृतभाषाप्रचारस्यात्यन्तं दुर्दशैव निदानम्, अतोऽचिरेण राष्ट्रभाषत्वरूपस्य लक्ष्यस्य सिद्धये मन्ये सोपानं संस्कृतभाषयैव सर्वत्र लोके व्यवहरणं नाम। अतो बी-ए. परीक्षापर्यन्तम्, तथा प्रवेशिका-परीक्षापर्यन्तं वाऽध्ययनाध्यापनप्रणाली तादृशी निर्वाच्या, यथा तत्रोत्तीर्णानां संस्कृतभाषयैव स्वीयसर्वव्यवहारनिर्वाहशक्तिः स्यात्, प्रतिज्ञा च तादृशी सर्वैरपि संस्कृतज्ञैः कर्तव्या—सर्वत्र राजस्थानेषु, अन्यत्र वा, गृहे वा संस्कृतभाषयैव व्यवहारो यथासंभवं करिष्यते—इति, येन कथञ्चन लक्ष्यमिदं क्रमेण हस्तगतं स्यात्॥

॥ धर्माचार्यादिसहयोगसंपादनप्रकारः ॥

अत्र च धार्मिकसंस्थानां धर्माचार्याणां तत्तद्देवालयसमितीनां राज-महाराजादीनां च साहाय्यमेव शरणम्, येन न केवलं संस्कृतभाषा, किन्तु तत्तत्संस्थानान्यपि सुरक्षितानि स्युः। इदानीं तु देवभाषा-परिषदः स्वागतसभापतिपदग्रहणेन अमावाँराजा, यः खलु विनयातिशये-नात्मानमतिक्षुद्रमेव मन्यते, क्षुद्रं च राजाधिराजमहाराजाद्यपेक्षया, कथञ्चन स एव चतुर्दशवयस्काया अस्याः प्रधानं शरणम्। विश्वसिमि—नायमाभाणको विफलो भविष्यति—"अल्पारम्भोऽपि क्षेमकरः" इति॥

इदमेवात्र दुःखनिदानम्—यत् सत्यामपि विपुलायां सम्पत्तौ तत्तद्देशीया बहव एव, नहि नहि, केचनैव, धर्माचार्याः प्राच्यसरण्या देवभाषाप्रचारं स्व-कर्तव्यमपि कर्तुं स्वस्याः सम्पत्त्या अविनियोगेन यथेच्छमेवारामविहारादिभि-रेव सर्वा स्वपूर्वाचार्यैः देवभाषातत्त्वधर्मादिरक्षार्थमेव न्यासरूपेणात्मनि रक्षितीः सम्पत्तीर्दुर्विनियुञ्जते। विश्वसिमि मुम्बईनगरे स्वनामधन्यैर्मुन्शीमहो-दयैर्यादृशी नीतिरवलम्बिता भारतीयविद्याभवनसंस्थापनप्रसङ्गेन, सैव सर्वेषु प्रान्तेषु धर्माचार्याणां सम्पत्तेर्धार्मिकशिक्षार्थं देवभाषाप्रचारार्थं च विनियोगार्थ-मवलम्बनमर्हति—यदि सर्वेऽपि धर्माचार्यास्तत्तद्देशीया अन्ततो गत्वा षष्ठां-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शमासां संपत्तीनां तदर्थं स्वयमेव न विनियुञ्जते। मन्ये समादतायामेतस्यां षद्धतौ देवभाषाविश्वविद्यालयो महान् सर्वस्य भारतवर्षस्य विनैव राजकीयसाहाय्यलेशमपि व्यवस्थापयितुं शक्येत कथञ्चन, बहवश्च संस्कृत-विद्यालयाः संस्कृतपण्डिताः धर्मप्रचारकाश्च वृत्तिचिन्तापीडितास्तत्तत्कार्यकरणे तत्तत्समुचितवृत्तिव्यवस्थापनेन पोषयितुं शक्यन्ते। विश्वसिमि—अयोध्यागता धर्माचार्याः सर्वेऽपि प्रकृतमवसरमुपलभ्य नेतृतामत्रावलम्बिष्यन्ते, यतश्छात्रालयविद्यालयादिधार्मिकसंस्थानानां कृते प्रभूतमेव व्ययीकुर्वन्त्यर्थजातं केचनात्र न्यासरूपेण तदर्थमात्मनि रक्षितमिति बुद्धया। विश्वसिमि—चतुर्दशवयस्का देवभाषापरिषदियं विशिष्टान् लोकविख्यातान् संस्कृतभाषावत्सलान् राष्ट्रीयसंस्थाननेतॄनपि कांश्चन शरणीकृत्य स्वकर्त्तव्यं सर्वमत्र प्रसङ्गे संयोजयिष्यति॥

उपसंहारः

अन्ततः सादरमिदं निवेदयामि—"यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः" "नहि कल्याणकृत् कश्चित् दुर्गतिं तात गच्छति" "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" "न जातु कामान्न भयान्न लोभाद्धर्मं जह्याद् जीवितस्यापि हेतोः" इति नीतीः शरणीकृत्य यततां देवभाषापरिषदियम्, भवन्तो वा तत्सदस्या अवयवशः स्वाभीष्टसिद्धये, येन स्वयमेव श्रीरामचन्द्रोऽयोध्याधिपतिः—"अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।" इति स्वप्रतिज्ञामवितथी करिष्यति समुचितानां तदन्तरङ्गभक्तानां केषांचन लोकविख्यातानां नेतॄणां स्वकर्तव्यकरणार्थं प्रेरणेन, स्वयमेव वा भवदीययोगक्षेमनिर्वहणेन। अतः परमोऽयमस्माकं विश्वासः—यद् रामराज्येऽयोध्यायामेतदधिवेशनम्, तत्रापि श्रीहरिहरप्रसादनारायणसिंहस्य स्वागतसभापतिपदग्रहणं च शुभोदर्कतां परिषदोऽस्याः सूचयतीति॥

ॐ शान्तिः शान्तिः शान्तिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघदूत-मीमांसा

[निबन्धकः—श्रीसरोजेन्द्रनाथ भञ्जः, एम-ए, काव्यपुराणतीर्थः साहित्यशास्त्री]

कान्ता कान्ते जनयति रतिं लौकिकीं सान्तरायां
हृत-संवादान्नयति पदवीं चर्वणायाः कविस्ताम् ।
भुङ्क्ते वेत्ता रसमतिघनं तां विधायास्तवाधा-
मित्थं तत्त्वं किमपि मधुरं काव्यजं मन्महे तत् ।।

इदं च मेघदूतं खण्डकाव्यम् भागद्वयात्मकं महाकविश्रीकालिदासविरचितं शृङ्गाररसनिष्यन्दि सकलसहृदयमनोग्राहितामवलम्बते । आहुश्च जगन्नाथ-पादाः—"शृङ्गारो द्विविधः । संयोगो विप्रलम्भश्च । रतेः संयोगकाला-वच्छिन्नत्वे प्रथमः । वियोगकालावच्छिन्नत्वे द्वितीयः । संयोगश्च न दम्पत्योः सामानाधिकरण्यम् एकतल्पशयनेऽपि ईर्ष्यादिसद्भावे विप्रलम्भस्यैव वर्णनात् । एवं वियोगोऽपि न वैयधिकरण्यम्, दोषस्य उक्तत्वात् । तस्मात् द्वाविमौ सं-योगवियोगाख्यौ अन्तःकरणवृत्तिविशेषौ । यत्संयुक्तो वियुक्तश्चास्मीति धीः" इति । तस्मात् मेघदूतकाव्यस्य विप्रलम्भशृङ्गार एव रसः । काव्येऽस्मिन् यो हि प्रियाविरहितो यक्ष उपवर्णित स इतिहासप्रसिद्धः कविकल्पितो वा इत्यत्र नास्माकमत्याग्रहः । परन्तु तस्य शापनिर्वासितस्य यक्षस्य अलका-याम् एकवेणीधरायाः प्रियतमायाः कृते या रतिः सा हि नितान्तलौकिका परिमिता अपगमभीरुता-प्रत्यूहिता प्रचिख्यापयिषाविघ्निता इति कथंकारं सा नाम आस्वादपदवीमारोहेत निखिलरसिकजनहृदयैः सह संवदेद्वा । अतएव लौकिकाया रतेरलौकिकत्वसम्पादने अपेक्षितः कोऽपि जनः कविशब्दभाक् य इमां यक्षस्य प्रियाविषयकरतिं हृदयसंवादेन तन्मयीभावेन च चर्वणागोचरां कुर्यात । तच्चाकरोत् सहृदयकुलचक्रवर्ती महाकविः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकालिदासः। न च सा कालिदासस्यैव रतिरिति मन्तव्यम्। न ह्यात्मविषया रतिः कदाचिदपि रसरूपतामवगाहते, तथात्वे तु कामिनामेव महाकवित्वमापतत् केन वारणीयं भवेत्। न हि रागिनां कविदशा दृश्यते। नन्वस्तु नाम कालिदासस्य कवेः हृदयसंवादतन्मयीभवनक्रमात् यक्षप्रियाविषयकरते रास्वाद्यमानता, शृङ्गाररसरूपता, लौकिकरतिव्यतिरिक्तता च, तथापि तस्य मेघदूतकाव्यकरणे प्रयासः किंप्रयोजनक इति चेदुच्यते—न विद्यते किमपि प्रयोजनं रसचर्वणां कुर्वतः स्वात्मारामस्य कवेः। तथापि यथा कदाचिदपि रसपरिपूर्णः कुम्भः स्थानात् स्थानान्तरनयने प्रयोजनमनुद्दिश्य स्वभावादेव रसमुद्गमति तद्वत् पुराण्याषाढस्य प्रथमदिवसे तथाविधस्य कवेः कालिदासस्यापि शृङ्गाररसोच्चलनमासीत। स चोच्चलित रसः मन्दाक्रान्ताललितं मेघदूतास्यं काव्यरूपं दधार। दृश्यते च अन्तःकरणवृत्तयोऽपि वाग्विलासरूपेण परिणमन्त इति। एतदेवोक्तं हृदयदर्पणे भट्टनायकपादैः—"यावत् पूर्णो न चैतेन तावन्नैवैवमिति"।

नन्वेवमपि यद्युच्येत—लौकिकाया रतेरलौकिकत्वसम्पादने कविरेव भवतु नाम प्रजापतिस्तथापि सामाजिकानां मेघदूतकाव्याध्येतृणाम् रसप्रतीतिर्न सूपपादा यतः अलकानिवासिनी यक्षप्रिया सामाजिकान प्रत्यविभावः यक्षं प्रति तु स एव स्यात्, अनालम्बनस्य च रसस्य प्रतिपत्तिरेव न सम्भवति, ताटस्थ्येन च रसप्रतीतौ अनास्वाद्यतापत्तिः; न च सा यक्षप्रिया साधारणकान्तारूपेण सामाजिकसमीपमुपस्थाप्यते,—यतः "इयं श्यामा तन्वी यक्षस्यैव प्रिया नास्माकं सामाजिकानाम्" इति ज्ञानमेव तथाविधोपस्थापनं प्रतिबध्नाति—तथा च कान्तायाः शृङ्गाररसे विभावत्वं तदैव भवेत यदा इयमगम्या नास्तीति प्रामाणिको निश्चयः स्यात्; ननु सामाजिकानां स्वात्मनि यक्षाभेदबुद्धिरेव तथा सम्भावयेत इति चेत् तदपि न—रामगिरिवास्तव्यो हि यक्षः धीरः अमानुषशक्तिसम्पन्नः शापनिर्वासितश्च, वयञ्च सामाजिका आधुनिका कापुरुषा अशापकृष्टा इति वैधर्म्यस्य स्फुटं प्रतिपत्तेः अभेदबोधस्यैव दुर्लभत्वात्—इति चेच्छृणु, अस्ति कश्चित् व्यापारो विभावादेः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधारणीकृतिरिति नाम्ना। यस्मै च व्यापाराय श्रीभट्टनायको भावकत्व-व्यापारेत्याख्यां प्रादात्। अयं च तस्य लोकोत्तरस्य काव्यव्यापारस्य महिमा यत्प्रसादात् यक्षस्य प्रिया अगम्यात्वरूपरसविरोधिज्ञानप्रतिबन्ध-द्वारा कान्तात्वरूपरसानुकूलधर्मपुरस्कारेणावस्थाप्यते। अतएव च स व्यापार यक्षप्रियां यक्षसामाजिकोभयसम्बन्धिनीं करोति। एवमलकापि देशसामान्यतया अवस्थाप्यते यत्र मेघः मेघदूतपाठकश्चेत्युभावपि गन्तुं प्रभवतः। इत्येवंक्रमेण कालवयोऽवस्था अपि साधारणीकृता आनन्द-मलौकिकं जनयन्ति। ततश्च पङ्क्तौ भावकत्वव्यापारमहिमनि तृतीयस्य भोगकृत्वव्यापारस्य महिम्ना निगीर्णयो रजस्तमसोरुद्रिक्तसत्त्वजनितेन निजचित्स्वभावनिर्वृति-विश्रान्तिलक्षणेन साक्षात्कारेण विषयीकृता भाव-नोपनीता साधारणात्मा रतिः रसरूपतां गाहते। प्रथमेन च अभिधा-व्यापारेण पदार्थाः निवेद्यन्ते। एवञ्च त्रयोंशाः काव्यस्य "अभिधा भावना चैव तद्भोगोकृतिरेव च" इति। नवीनास्तु सहृदयतोल्लासितं दोषविशेष-मङ्गीकृत्य स्वात्मनि यक्षाभेदबुद्धि मुपपादयन्ति। तदेषा उपनिषत् मेघदूत-काव्यस्य व्याख्याता श्रीमदाचार्याभिनवगुप्तजगन्नाथादिग्रन्थस्वारस्यात्।

प्रकृत्याः सौन्दर्यं यदतिरमणीयं रतिकरम्
तदावेशात् सर्वं कविकुलपते! वर्णितमहो!
इदानीं भूमौ ये प्रकृतिविपरीतं प्रयतितुं
सचेष्टास्तेभ्यस्तां पुनरपि तथा दर्शय गतिम्॥

शम्भूयात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपनिषत्प्रामाण्यचर्चा

[निबन्धकः—अनन्तकृष्णशास्त्री]

"ईशावास्यमि"तीशशब्दप्रयोगात् तस्य च रुद्रे सदाशिवे वा रूढत्वात् ईशावास्योपनिषच्छैवमतमेवावलम्बते इति शैवविशिष्टाद्वैतिनः। एते हि पुरुषसूक्तगतं पुरुषपदमपि सदाशिवपरमेव, "सहस्रशीर्षा पुरुष" इत्यादिना प्रतिपादितात् नारायणात् पुरुषपदवाच्यात् "ततो ज्यायाँश्च पुरुष" इति पुरुषान्तरस्यैव तत्र प्रतिपादनात्, तस्य च सदाशिवत्वमेवेति मन्यन्ते। श्रीवेदान्तदेशिकाः, श्रीकूरनारायणाचार्याश्च तु एतामेवाशङ्काम्—"ननु" "रूढ़िर्योगमपहरती"त्न्यायात् ईशोऽत्र रुद्रः स्यात्, मैवम्; "एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे देवा द्यावापृथिवी न नक्षत्राणि नाग्निर्न सूर्यो न चन्द्रमा स एकाकी रमते" इत्यादिषु नारायणस्यैव परमात्मत्वात् रुद्रस्येशपदवाच्यस्यापि नारायणानन्तरस्य तत्कार्यत्वेन सर्वव्यापकत्वादि-ब्रह्मलिङ्गानन्वयाद् आकाशाधिकरणन्यायेनात्रेट्पदस्य यौगिकत्वमेवे"ति मन्यन्ते। तथा चैतन्मतरीत्या सर्वत्रेशपदस्य यौगिकत्वमेव स्वीकर्तव्यं वेदान्तवाक्येषु ॥

तत्र प्रथममते—ईशपदरूढत्वपक्षः सर्वसम्मतासु दशोपनिषत्सु कुत्रापि परमात्मप्रकरणे नारायणपदप्रयोगाभावात् केनोपनिषदि "स एतस्मिन्नेवाकाशे स्त्रियमाजगाम बहु शोभमानामुमामि"ति उमाया यक्षस्त्रीत्वनिर्देशात्, कठोपनिषदि "मृत्युर्यस्योपसेचनमि"ति मृत्योरपि मृत्युत्वलिङ्गनिदेशात्, "ईशानं भूतभव्यस्य" "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भूतभव्यस्य" "अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः। ईशानो भूतभव्यस्ये"ति चेशानपदनिदेशात्, प्रश्नोपनिषदि षोडकलपुरुषस्य "पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ती"ति लयाधिष्ठानत्वाख्यासाधारणशैवलिङ्ग

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्देशेनाकाशाधिकरणन्यायेन साधारणस्य पुरुषपदस्यापि ब्रह्मण्येव तात्पर्यावधारणात्, मुण्डकेऽपि—"जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः" "यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिमि"त्यादौ पुरुषपदस्येशपदसाहचर्येणेशपरताया एव स्पष्टं सूचनात्,माण्डूक्ये "शिवमद्वैतं चतुर्थं मन्यन्त" इति विशदं शिवपदप्रयोगात्, मुण्डकादौ पुरुषपदप्रयोगः परमात्मनि न वस्तुगत्या पुरुषत्वेन, किन्तु पुरुषविधत्वेनैवेति मत्वा परमात्मनः पुरुषविधत्वेनोपस्थापनानन्तरं तैत्तिरीयोपनिषदि "स यश्चायं पुरुषे यश्चासावादित्ये" इत्यादित्यान्तर्वर्तिन एव जीवाभिन्नत्वेन परमात्मत्वमिति निर्देशात्, "तत् सवितुर्वरेण्यमि"त्यादौ भगपदप्रयोगेण रुद्रस्य सदाशिवस्यैव मुख्यब्रह्मत्वावगमात् श्वेताश्वतरोपनिषदि "व्यक्ताव्यक्तं भरते विश्वमीशः" "ज्ञात्वा देवं मुच्यते सर्वपाशैः" "क्षरंप्रधानममृताक्षरं हर" इतीशत्वसर्वपाशविमुक्तिहरत्वादिनिर्देशात् "तत्रैव एको हि रुद्रो न द्वितीयाय तस्थे य इमान् लोकानीशत इशनीभि"रिति यौगिकमपीशत्वं रुद्रस्यैव, न नारायणस्येति प्रतिपादनात्, तथा "सर्वव्यापी-स भगवान् तस्मात् सर्वगतः शिव" इति "मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्" "विश्वाधिको रुद्रो महर्षिः" "ज्ञात्वा शिवं शान्तिमत्येति" 'रुद्रयत्ते दक्षिणं मुखम्" इति सर्वव्यापकत्वादिरूपेण महेश्वर-शिव-रुद्रादिपदेनैव परमात्मनः प्रतिपादनात्, नारायणोपनिषदादौ रुद्रस्य नारायणांशत्वमिव ब्रह्मोपनिषदि अथर्वशिर उपनिषदि अथर्व शिखोपनिषदा च विष्णोरपि नारायणांशत्वस्य प्रतिपादनेन विष्णु रुद्र योरुभयो पिकार्यत्वेऽपि कारणात्मनातुरीयस्य शिवस्यैव मुख्यपुरुषत्वादिरूपत्वेन स्वीकारे दोषाभावाच्च न द्वितीयमतोक्तानां दूषणानामवसर इति—मन्यते।

अद्वैतिनस्तु सगुणस्य ब्रह्मणोऽवस्थाभेदेन ब्रह्मविष्णुरुद्रादिभेदेऽपि तेषूत्कर्षापकर्षयोरप्रामाणिकत्वादद्वितीयनिर्विशेषतुरीयात्मस्वरूपमेव मुख्यो वेदान्तार्थः, यत्तु न कार्यकोटौ कारणकोटौ वा प्रविष्टम्, कारणस्य ब्रह्मण ईशपदवाच्यत्वम्, नारायणपदवाच्यत्वं वा न कथमपि विहतम्, सर्वेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मतेषु परस्य ब्रह्मणः कारणस्य सर्वपदवाच्यत्वस्वीकारेणोक्तो विवादो निष्प्रयोजन इति—मन्यन्ते ।

अथ मतत्रयप्रमाणानि उपनिषदः कति ?—इति विचारः साम्प्रतमवसरति । तत्र दशोपाणिषदोऽपि प्रसिद्धाः—इश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्यैतरेय-तैत्तिरीय-च्छान्दोग्य-बृहदारण्यकाख्याः सर्वैरपि भाष्यकारैर्विशिष्य विवरणेन प्रमाणतया मन्यन्ते । क्वचित ऊनविंशतिरूपनिषदां मुद्रापिता दृश्यते, क्वचिच्चाष्टोत्तरशतोपनिषद इति शीर्षका द्वादशोत्तरोपनिषदो मुद्रापिता दृश्यन्ते । अत्र द्वादशोत्तरशततमोपनिषत्मुक्तिकोपनिषन्नामा, यस्यामष्टोत्तरशतोपनिषदां नामतो निर्देशो दृश्यते । वस्तुतस्तु मुक्तिकोपनिषदियं न द्वादशोत्तरशततमतया निर्देशमर्हति, किन्तु अष्टोत्तरशततमतयैव ।

मुक्तिकोपनिषदः प्रथमाध्याये चत्वारिंशत्तमे मन्त्रे—"सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्" इति उपनिषदां संख्या नाष्टोत्तरशतेनैव सम्पूर्णा, किन्तु ततोऽधिका अपि संख्यास्तासां वर्तन्त इति प्रतीयते । अष्टोत्तरशतोपनिषदां क्रमोऽपि मुक्तिकोपनिषदि प्रतिपादितो नास्मिन संस्करणे-मुद्रणावसरेऽवलम्बितः इति निरूपणार्थं मुक्तिकोपनिषदि निर्दिष्टं तक्रममत्र निर्दिशामः । स यथा मुक्तिकोपनिषदि प्रथमे अध्याये पञ्चविंशादिमन्त्रेषु चत्वारिंशत्तमपर्यन्तेषु मन्त्रेषु । दृश्यते तमत्र निर्दिशामः—

"इयं कैवल्यमुक्तिस्तु केनोपायेन सिध्यति ।
माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये ॥
तथाप्यसिद्धश्चेज्ज्ञानं दशोनिषदः पठ ।
ज्ञानं लब्ध्वाऽचिरादेव मामकं धाम यास्यसि ॥
तथापि दृढता नो चेद्विज्ञानस्याज्जनासुत ।
द्वात्रिंशाख्योपनिषदं समभ्यस्यन्निवर्तय ॥
विदेहमुक्ताविच्छा चेदष्टोत्तरशतं पठ ।
तासां क्रमं सशान्तिञ्च शृणु वक्ष्यामि तत्वतः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]ईश-[2]केन-[3]कठ-[4]प्रश्न-[5]मुण्ड-[6]माण्डूक्य-[7]तित्तिरिः
[8]एतरेयश्च-[9]च्छान्दोग्यं-[10]बृहदारण्यकं तथा ॥
[11]ब्रह्म-[12]कैवल्य-[13]जावाल-[14]श्वेताश्वो-[15]हंस-[16]आरुणिः ।
[17]गर्भो-[18-19]नारायणौ-[20]हंसो-[21-22]बिन्दुर्नाद-
[23]शिर-[24]शिखा ॥
[25]मैत्रायणिः-[26]कौषीतकि-[27]बृहज्जाबाल-[28-29]तापनी ।
[30]कालाग्निरुद्र-[31]मैत्रेयि-[32]सुबाल-[33]क्षुरि-[34]मन्त्रिका ॥
[35]सर्वसारं-[36]निरालम्बं-[37]रहस्यं-[38]वज्रसूचिकम् ।
[39]तेजो-[40]नाद-[41]ध्यान-[42]विद्या-[43]योगतत्वाऽ[44]त्मबो-
धकम् ॥
[45]परिव्राट्-[46]त्रिशिखि-[47]सीता[48]-चूडा-[49]निर्वाण-[50]मङ्गलम् ।
[51]दक्षिणा-[52]शरभं-[53]स्कन्दं-[54]महानारायणाह्वयम् ॥
(राम)[55]रहस्यं-[56-57]रामतापनं-[58]वासुदेवश्च-[59]
(मुद्गलम्) । (अद्वैतारकं)
[60]शाण्डिलथ-[61]पैङ्गलं-[62]भिक्षु-[63]महत [64]शारीरकं [65]शिखा ॥
[66]तुरीयातीत-[67]संन्यास-[68]परिव्राजा-[69]क्षमालिका ।
[70]अव्यक्तं (योग)[71]काक्षरं-[72]पूर्णा-[73]सूर्या[74-75]क्ष्यध्यात्म
(परमहंस)-[76]कुण्डिका ॥
[77]सावि-[78]त्र्यात्मा-[79]पाशुपत-[80]परब्रह्मा[81]वधूत्वकम् ।
[82]त्रिपुरातापनं-[83]देवी-[84]त्रिपुरा-[85]कठ (रुद्र)-[86]भावना ॥
[87]हृदयं-[88]कुण्डली (योग)-[89]भस्म-[90]रुद्राक्ष-[91]गण-
[92]दर्शनम् ।
[93]तारसार (रुद्र)-[94]महावाक्य-[95]पञ्चब्रह्मा (जाबाल) अ्नि-
[96]होत्रकम् ॥
[97-98]गोपालतापनं-[99]कृष्णं-[100]याज्ञवल्क्यं-[101]वराहकम् ।
[102]शाट्यायनि-[103]हयग्रीवं-[104]दत्तात्रेयश्च-[105]गारुडम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[106]कलि-[107]जाबालि-[108]सौभाग्य-[109]रहस्य-
[110]ऋच-[111]मुक्तिका ।"

इति । अत्राष्टोत्तरशतोपनिषदां क्रमाप्रक्रमे अद्वैतारकोपनिषद्, नारायणोपनिषदुयं तापनीत्रयद्वयञ्च न निर्दिष्टं, इति अद्वैतारकोपनिषदः परित्यागेन तापनीत्रयस्यापि द्वेधा विभागस्याग्रहणेन चाष्टोत्तरशतोपनिषद्-एव निर्दिष्टा इति विज्ञायते इति, अष्टोत्तरशतोपनिषदां प्रकाशमुपक्रम्य द्वादशोत्तरशतोपनिषदां योजनं तत्रापि मुक्तिकोपनिषदः अष्टोत्तरशत-मध्येऽप्रवेशनञ्च चिन्त्योपपत्तिकमेव । अयमेव न्यायः—श्वेताश्वतरोप-निषदः चतुर्दशतया निर्दिष्टाया एकादशतया गणनेऽप्यनुसन्धेयः ।

अत्र उपनिषदां शान्तिपाठक्रमे दशोपनिषत्सु ऐतरेयोपनिषदः शान्ति-पाठे "वाङ् मे मनसि प्रतिष्ठिता"—इति मन्त्रः पठनीय इति मुक्तिकोपनिषदः प्रथमाध्यायस्य द्वितीये खण्डे प्रथमे वाक्ये प्रतिपादितम् । ईशावास्य-बृहदारण्णकयोः शान्तिपाठक्रमे तु "पूर्णमद" इति मन्त्रः पठनीय इति तत्रैव द्वितीये वाक्ये प्रतिपादितम् । केनच्छान्दोग्ययोः शान्तिपाठे "आप्यायन्तु ममाङ्गानि" इति मन्त्रः पठनीय इति तत्रैव चतुर्थे वाक्ये प्रतिपादितम् । कठवल्लीतैत्तिरीयकयोः शान्तिपाठक्रमे "सह नाववतु" इति मन्त्रः पठनीय इति तत्रैव तृतीये वाक्ये प्रतिपादितम् । अवशिष्टेषु प्रश्न-मुण्ड-माण्डूक्येषु तु शान्तिपाठक्रमे "भद्रं कर्णेभिः" इति मन्त्रः पठनीय इति तत्रैव पञ्चमे वाक्ये प्रतिपादितम् । षष्ठन्तु तत्रत्यं वाक्यं मुमुक्षवः पुरुषाः साधनचतुष्टयसम्पन्नाः श्रद्धावन्तः—सद्गुरुं विधिवदुपसंगम्यो-पहारपाणयोऽष्टोत्तरशतोपनिषदं विधिवदधीत्य श्रवणमननिदिध्यासनानि नैरन्तर्येण कृत्वा प्रारब्धक्षयाद्देहत्रयभङ्गं प्राप्योपाधिविनिर्मुक्तघटाकाश-वत् परिपूर्णता विदेहमुक्तिं, सैव कैवल्यमुक्तिरिति । अतएव ब्रह्म-लोकस्था अपि ब्रह्ममुखाद्वेदान्तश्रवणादि कृत्वा तेन सह कैवल्यं लभन्ते । अतः सर्वेषां कैवल्यमुक्तिर्ज्ञानमात्रेणोक्ता । न कर्मसांख्ययोगोपासनादि-भिरित्युपनिषद्" इत्याकारकं अद्वैतमत एवाष्टोत्तरशतोपनिषदां पर्यवसानमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्वैतिनामसाधारणप्रक्रियाणाम्—[1]साधनचतुष्टयसम्पत्त्यानन्तर्यम् "अथातो ब्रह्मजिज्ञासा" इति सूत्रे अथशब्दार्थः,[2] देहत्रयभङ्गेन विदेहकैवल्यमेव मुक्तिः,[3] ज्ञानमेव मोक्षसाधनं नतु भक्त्यादिः, इत्यादीनां प्रतिपादनेन व्यवस्थापयति इति त्वन्यदेतत् ॥

साम्प्रतन्तु शान्तिपाठक्रममेवाधिकृत्य प्रतिपादनमेवावसरप्राप्तम् । शान्तिपाठो हि सर्वासामुपनिषदामुपक्रमे मुक्तिकोपनिषदि प्रतिपादितां व्यवस्थामेवानुसृत्योपक्रमे दरीदृश्यते । परन्तु शान्तिपाठक्रमः साम्प्रतं यथामुक्तिकोपनिषन्निर्देशं सम्प्रदाये तु न परिपाल्यते । एकैकोपनिषद्भाष्याध्ययनप्रसङ्गे हि सर्वासामुपनिषदां शान्तिपाठक्रमं सर्वेऽपि अनुसन्दधते । सूत्रप्रस्थाने गीताप्रस्थाने वा सर्वासामुपनिषदां शान्तिपाठक्रमादरणं यद्यपि साम्प्रतं, सर्वासामुपनिषदामर्थनिर्णायकत्वात्तयोः ईशावास्याद्येकैकोपनिषद्भाष्याध्ययनकालेऽपि सर्वासामुपनिषदां शान्तिपाठक्रमसमादरणन्तु चिन्त्य मूलमेव ।

अत्र सूत्र-गीता-प्रस्थानप्रसङ्गे भगवत्पादैः तत्र तत्र प्रमाणतया गृहीता उपनिषदः — ईश-केन - कठ-प्रश्न-मुण्ड-माण्डूक्यैतरेय-तैत्तिरीय-च्छान्दोग्य-बृहदारण्यक-श्वेताश्वतर-कौषितकीब्राह्मणोपनिषद एव प्राधान्येन विषयवाक्यविधया, तत्र तत्र प्रसङ्गतः ब्रह्मविन्दूपनिषद् कैवल्योपनिषद आरुणिकोपनिषद्, परमहंस-ब्रह्म-नारद-परिव्राजक-भिक्षुक-तुरीयातीत-संन्यास-परमहंसपरिव्राजक-कुण्डिकावधूत-कठ-रुद्र-याज्ञवल्क्योपनिषदश्च ।

अष्टोत्तरशतोपनिषत्सु भगवत्पादादृताऽद्वैतसिद्धान्तस्य मूलभूताः असन्दिग्धा उपनिषदस्तु [1] कैवल्योपनिषद् [2] सर्वसारोपनिषद् [3] निरालम्बोपनिषद् (यत्र ब्रह्मेश्वरस्वरूपज्ञानाज्ञानादिस्वरूपवर्णनं क्रियते) [4] शुकरहस्योपनिषद् (यत्र तत्त्वमसिमहावाक्यार्थो निरुच्यते [5] वज्रसूचिकोपनिषद (6)-तेजोबिन्दूपनिषद् (यत्र जीवन्मुक्तविदेहमुक्तादिविभागा निरुच्यन्ते)[7] नादबिन्दूपनिषद् (यत्र मुक्तात्मस्वरूपमद्वैताभिमतं निरुच्यते) [8] आत्मबोधोपनिषद् (यत्राध्यारोपापवादप्रक्रिया प्रपञ्चमिथ्यात्वञ्च निरूप्यते) [9] त्रिपाद्वि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूतिनारायणोपनिषद् (यत्र तुरीयं ब्रह्मनिरूप्यते) [10] अध्यात्मोपनिषद् (यत्र मायाविद्योपाधिवशात् जीवेश्वरभेदो निरूप्यते) [11] आत्मोपनिषद् (यत्रोपाधिनिवृत्तिमात्रेण ब्रह्मभावो मुक्तिरिति निरूप्यते) [12] पाशुपतब्रह्मोपनिषद् (यत्र व्यावहारिकसत्वमेव प्रपञ्चस्येत्यादि निरूप्यते) [13] परब्रह्मोपनिषद् (यत्र ब्रह्मसूत्रस्वरूपनिरूपणद्वारा अद्वैतसिद्धान्तः प्रतिपाद्यते) [14] पञ्चब्रह्मोपनिषद (यत्रैकविज्ञानेन सर्वविज्ञानं ब्रह्मेतरसर्वमिथ्यात्वेनेति प्रतिपाद्यते) पूर्वोक्तरीत्या मुक्तिकोपनिषच्च ।

एतासु हि भगवत्पादादताऽद्वैतप्रक्रिया बहव एवाम्नायन्ते । दशोपनिषदस्तु तत्तत्सम्प्रदायाचार्यैः स्वस्वसिद्धान्तानुगुणं विव्रियन्ते । तत्र स्वस्वसिद्धान्तासाधारणप्रमाणतया तत्तदाचार्यसम्मतानि कान्यपि वाक्यानि न बादण्यणाचार्येरालोचितानि । जीवस्य मुक्तिरप्युत्क्रमणापेक्षा इति विषये परं सत्यं बादरायणाचार्य्याणां सूत्राणि कानिचन वर्त्तन्ते । तत्र सूत्राण्यपि स्वस्वमतानुगुणं विव्रियन्ते तत्तदाचार्यैः । इदमेवात्रः रहस्यं यत तत्तदाचार्य्यैः तत्राऽद्वैताचार्याणां सिद्धान्तपरतयाभिमतानि सूत्राणि श्रीभाष्यकारादिभिः पूर्वपक्षतया मन्यन्ते, अथवान्यैराचार्यैः पूर्वपक्षतया व्याख्यातानि सूत्राणि भगवत्पादैः सिद्धान्तपरतया व्याख्यायन्ते । इदञ्च व्यक्तं कार्य्याधिकरणादौ । अयमेव न्यायः आनन्दमयाधिकरणादौ वृत्तिकारभाष्यकारमतयोः स्वरूपनिर्धारणे सर्वैरालम्ब्यते ।

(क्रमशः)

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता ।

वार्षिकमूल्यम्—रूप्यकत्रयम् ३)
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.
Printed at the Calcutta Oriental Press, Ltd.,
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073

Vol. XVIII, No. 8] [December, 1935.

१८५७ शकीये अग्रहायणे १८श-वर्षस्य ८म-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्, वार्षिकमूल्यम्—३) रूप्यकत्रयम्

श्यामबाजार, कलिकाता। Foreign price—7s.

Printed and Published by

Dinabandhu Sahityashastri

The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.

Printed at

CALCUTTA ORIENTAL PRESS

9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषारत्नम्

[श्रीकणादतर्कवागीश-प्रणीतो नव्यन्यायमतसिद्ध-पदार्थ-प्रतिपादको ग्रन्थः]

कलिकाता-राजकीयसंस्कृतमहाविद्यालयन्यायशास्त्रान्यतराध्यापक-

श्रीकालीपदतर्काचार्य-

सम्पादितम्।

एष ग्रन्थः सरलया सरण्या तर्कशास्त्रप्रसिद्धान् पदार्थान् प्रतिपादयन् सुबहुप्राचीनकालात् प्रभृत्येव पण्डितसमाजे सुविश्रुतो लक्ष्यते। अत्र पदार्थसिद्धौ समपेक्षिता युक्तयः सुगमया दिशा परिगृहीता महान्तमुपकारं जनयन्ति तर्कशास्त्रं प्रविविक्षताम्। विद्यार्थिनां सुखेनावगमाय सम्पादकमहोदयेनात्र सरला काचित् टीकापि संयोजिता। अत्र विस्तृता विषयसूची भूमिकायां न्यायमतसिद्धानेक-पारिभाषिक-पदार्थविवृतिश्च सन्निवेशिता, येन संस्करणस्यास्य नितरामुत्कर्षः समजनि।

एष ग्रन्थ इतः पूर्वं कदापि केनापि न प्रकाशितः। अतः अप्रकाशितपूर्वस्यास्य ग्रन्थस्य परमोपादेयस्य लाभेन विद्यार्थिनः अध्यापकाश्च सुतरामुपकृता भविष्यन्तीति निःसंशयो वादः।

अचिरमेष प्रकाश्यते, तत् सत्वरा भवन्तु श्रीमन्तस्तर्कपदार्थ-विज्ञानरसिका येन कालातिक्रमो नाभिलषितसिद्धिं प्रतिबध्नीयात्।

अस्य प्राप्तिस्थानम्

संस्कृत-साहित्य-परिषत-कार्यालयः

१७ आर. जि. कर रोड, श्यामबाजार, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

December,	१८५७-शकीये अग्रहायणे	Vol. XVIII
1935.	१८श-वर्षस्य ८म-संख्या	No. 8

मतिमञ्जरी

द्वीपान्तरनिवासिन एवेदानीं प्रतिदिनमुत्तुङ्गानि समुन्नतिसोपानानि समारोहन्ति, भारतवर्षीयाः पुनर्बाल्यविवाह-विधवाब्रह्मचर्य-प्रतिमापूजनादि-वर्बरोचितानुष्ठानपरम्पराभिरनुदिनं प्रक्षीयमाणबलसत्वा मुमूर्षुभावं प्रतिपद्यन्त इति जोघुष्यते संस्कारकर्मन्यैर्भारतभव्याभिलाषुकैर्विपश्चिद्भृन्दैः। अयि भो भारतवर्षीयाः, कियच्चिरमेवं प्रस्वापमनुभविष्यन्ति भवन्तः। "उत्तिष्ठत, जाग्रत" आतिष्ठत प्रयासं बलोपचयार्थम्, अङ्गीकुरुत शिष्यत्वं प्रतीच्याचार्य-वर्याणाम्, सुदूरं समुत्सारयत देवताप्रतिमाः, नामशेषतामुपनयतेन्द्रियसंयमम्, कथाशेषतां प्रतिपादयत विवाहवृत्तान्तम्। संयम एव मूलमनिष्टस्य। ये तावदभिलाषा निरन्तरं मानसमास्कन्दन्ति तेषामन्तर्निरोधेन मनसो विक्षोभादुच्चावचाः शारीराश्च मानसाश्चाऽऽमयाः प्रादुर्भवन्ति। "सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्" "उद्धरेदात्मनात्मानं नात्मानमवसादयेत्। आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥" इत्यादीनि महावाक्यानि प्रमाणीकृत्य विवाहादीनि बन्धनानि सुदूरमपसार्योच्छृङ्खलभावमेवाऽऽसेवध्वम्। यथेष्टमुप-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युङ्ग्ध्वं मांसानि, देवताभ्यः पुनर्बलिं मोषहरध्वम्, देवताभिः स्वयमेव स्वाहारसम्पादनाय प्रयतितव्यम्। यथाभिलषितं यथासामर्थ्यं च वयोरूपादिनिर्विशेषमुपभुङ्ग्ध्वं स्त्रियः, कस्या अपि पुनर्वश्यतां मा गच्छत। विवाहस्य वार्ताऽप्यस्तमिता चेत्, ब्रह्मचर्यमपि नामशेषं चेत्, विधवानां ब्रह्मचर्यं शशविषाणकल्पं कस्यापि नोद्वेगमादध्यात्। सुदुर्लभमिदं मानुषं जन्म समासाद्य सर्वथा सफलीक्रियेतां जीवितञ्च यौवनञ्च। निखिलजीवस्पृहणीयां भोगभूमिमिमामनुप्राप्य सर्वात्मनाऽवधीयतां भोगेषु। यच्चोक्तं गीतायाम्—

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते॥
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
अपरस्परसम्भूतं किमन्यत् कामहैतुकम्॥
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः॥
काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः।
मोहाद्गृहीत्वाऽसद्ग्राहान् प्रवर्तन्तेऽशुचिव्रताः॥
चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः।
कामोपभोगपरमा एतावदिति निश्चिताः॥
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्॥
इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम्।
इदमस्तीदमपि मे भविष्यति पुनर्धनम्॥
असौ मया हतः शत्रुर्हनिष्ये चापरानपि।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी॥
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥
आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥
अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥

इति । तद् भूयसांऽशेन तथ्यं प्रतिपादयदपि पक्षपातदुष्टमेव । असत्यादीनि चेद् भोगं समुपनयन्ति तर्ह्यसत्यादिकमेव वरम्, वेदाभ्यासजडा ऋषय एव परिगृह्य सत्यं सर्वसुखपराङ्मुखा अरण्यमधिवसन्तु । कामस्तावद्विलक्षण-सुखसाधनत्वादुपादेय एव । क्रोधमन्तरेण केनापि किमपि लब्धुं न शक्यते, क्रोधबलेनैव 'मुसोलिनी' महोदयेनाऽऽबिसिनीयाप्रदेशः करतलगतो विधातुं प्रयत्यते । दम्भाहङ्कारादिकमप्यवश्यमपेक्ष्यते स्वहितप्रेप्सुभिः । एवं च काम-क्रोधलोभदम्भाहंकारादिसाहायकेन देवदुर्लभान् भोगान् भुञ्जते मर्त्यलोके मानवाः, परमार्थत एव चेश्वरत्वमधिगच्छन्ति । स्मर्यतां तावदभि-युक्तोक्तिः—The end justifies the means सर्वं तद्भद्रं यत् सुखमुप-नमयति ।

विनिक्षिप्यतां तावद् दृष्टिरामेरिकादिप्रदेशेषु । तत्र परमार्थत एवाभ्रं-लिहेषु सौधेषु निवसन्तः, शरीरसौष्ठवेन देवान् हेपयन्तः, पराक्रमेण दानवान् दवयन्तः, अभिलाषोपनीताभिरप्सरःप्रतिरूपिकाभिर्वरकामिनीभी रममाणाः, तर्जनीसञ्चालनेनैव समग्रं जगत् प्रकम्पयन्तः, प्रासादोपमैर्धूम-शकटवाष्पीयशकटव्योमयानसलिलयानादिभिरचिरेणैव जगतः प्रान्तात् प्रान्तान्तरं प्राप्नुवन्तः, विविधगतिसुखमनुभवन्तः, तत्तत्प्रदेशेभ्यः प्रयत्न-समाहृतैर्देवदुर्लभैर्भोज्यभक्ष्यलेह्यपेयादिभी रसनां परितर्पयन्तः, विविध-भेषजनिषेवणेन यौवनमेव केवलं समुद्वहन्तोऽविज्ञातरोगवृत्तान्ताः सन्धुक्षित-भोगशक्तयः स्त्रीरत्नपरिभाविन इमे मनुजाः सर्वथा देवदानवगन्धर्वेभ्योऽति-रिच्यन्त एव । यैस्तावत् साधनैः सम्पादितमीदृशं स्वर्गसुख-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेभिस्तेषां साधनानां सम्पादनाय भारतवर्षीयैरपि प्रयतितव्यम्। इत्युपदिशन्ति भारतसुहृदो महात्मानः। 'आमेरिका'प्रदेशे सुरापानसंग्रामे केनचन पुरुषपुङ्गवेन दशभिरेव विपलैः कुम्भीपरिमिता सुरा निपीता, अपरेण च सुरतसमरे निरन्तरं निबिडतरसमाश्लेषसुखायिता बालाऽविच्छेदेनाहर्निशं परिचुम्बिता। वीरौ चेमौ केयूरपताकादिभिरभिनन्दितौ महीयसा च साधुवादेन संवर्धितौ पौरजानपदैः। अस्माभिरपीदृशकौशलसमासादनाय द्रढिमरमणीयः परिकरो विनिबद्धव्यः, भोगसुखाद्यर्थमेव बलसत्त्वाभिवृद्धिः संविधातव्या, महामतीनां गुरुस्थानीयानामेषां पदाङ्कान्यनुसृत्य च सफलयितव्यं मानवजन्म।

सर्वमेतदविचारितरमणीयम्। न खलु सुबहुभिरेवमुद्घोष्यत इति कृत्वाऽसत्यस्य सत्यत्वं संसिध्यति। इमे तावन्महाभागा लाङ्गूलविहीनस्य शृगालस्यैवाऽऽख्यायिकामनुस्मारयन्ति। तथाहि कश्चनातिमनोहरलाङ्गूलः शृगालः क्षेत्रेषु सस्यानि भक्षयन् क्षेत्रस्वामिना लाङ्गूलेन वियोजितः। ततश्च स्वयूथ्येभ्योऽपत्रपमाणो गुहासु निलीनः कथमपि कतिचिद्दिनानि निनाय। ततश्च भागधेयविपर्यासान्निर्विण्णस्यास्य प्रत्यभासत कश्चनोपायविशेषः। स च लब्धवर इवातिहृष्टो गुहातो विनिर्गत्य सर्वाञ्छृगालान् समाहूय प्रसार्य पादौ बभाषे—भो भो भ्रातरः! अवहिताः शृणुत यूयम्। युष्मद्धिताय सुचिरं चिन्तयता मया अभिनवः कोऽपि सुखोपायः समुद्भावितः। अहो मौढ्यमस्माकं यदकारणमेवास्माभिर्लाङ्गूललक्षणो महान् भार उद्वह्यते। केन वा न सहस्रशः प्रत्यक्षीकृतं यल्लाङ्गूलमिदमस्माकं पदे पदे प्रतिबन्धकतामाचरति, पनसादिमोषणपुरःसरं प्रत्यावर्तमानाः क्षेत्रस्वामिभिर्लाङ्गूलेनैव विध्रियामहे वयम्, लाङ्गूलमेवेदं मानुषेभ्यो व्यावर्त्य पशुत्वं नः प्रतिष्ठापयति, लाङ्गूलवशादेव जीवजगति हीनत्वमस्माकं सम्पन्नम्। अतः प्रार्थये, कृताञ्जलिः प्रार्थये, धीमन्तो यूयं मतिमन्तो यूयं ज्ञानवन्तो यूयं प्रज्ञावन्तो यूयमत्यन्ताय समूलमुन्मूलयतेदं सर्वासुखनिदानं सर्वाकल्याणायतनं लाङ्गूलदण्डम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च केन वा न काम्यते सौन्दर्यं सचेतसा ? विचार्यतां तावत् किमिदं लाङ्गूलं कामनीयकमस्माकं परिबृंहयति वा प्रतिबध्नाति वा। परमरमणीयस्य पादचतुष्टयोपेतस्य वपुषोऽन्ते दोधूयमानमिदं चामरकलापं चारुतरतरुण्या इव श्मश्रुसमुद्गमः कस्य वा सहृदयस्य न समुद्रेजकम्। प्रेष्ठा भ्रातरः, त्यक्त्वा दुराग्रहं मुक्त्वा वृथाऽभिनिवेशं दूरीकृत्य विचारवैधुर्यं समाश्रित्य विवेकदण्डम् इष्टिपशुच्छेदं छिद्यतां लाङ्गूलमधिगम्यतां समकक्षता मनुजवराणामुपभुज्यतां सुखजातं निरर्गलम्।

एवं तेन चाश्रुतचरेण वचनोपन्यासेन विमोहितमानसाः परमप्रहृष्टा वञ्चकप्रवरास्तैस्तैः शब्दविशेषैः प्रकटयामासुरात्मनः सम्मतिम्। अन्ते चैकेन वृद्धशृगालेनाभिहितम् वत्स, किमिति लाङ्गूलं हारयित्वैवानुभूतं भवता हीनलाङ्गूलत्वस्य सौष्ठवम्। अथवा किमत्राऽऽश्चर्यं यदङ्गविकलः सर्वानेव व्यङ्गान् द्रष्टुं समुत्कण्ठेत। तद्वत्स, दृष्टं ते बुद्धिवैभवम्, अन्वर्थितं भवता वञ्चकेति नामधेयमस्माकम्, प्रकटितमनितरसाधारणं प्रावीण्यम्, परं नात्र भवदीयं वचनं प्रमाणीकुर्मः, न वा भवदीयमुपदेशं परिपालयामः, नापि भवदीयां सरणिमनुसरामः। तदिदानीं "यः पलायति स जीवति" इति नीतिमनुसृत्य दूरमपसर यावदतिसंहिता इमे भवत्सजातीया उद्दीपितामर्षा भवन्तं नाभिघ्नन्ति। तच्छ्रुत्वा 'मेषशृङ्गेषु प्रतिहतं वज्रमपि कुण्ठिताग्रं भवति' इति प्रवचनस्य सार्थक्यमुपलभमानोऽसौ वराकः स्वगुहामेव प्रतस्थे।

यैः पुनर्महात्मभिरेवमुपदिश्यते तैरपि समधिगतं वा पारमार्थिकं सुखं समास्वादिता वा सांसारिकी शान्तिः। यैस्तावदविगणय्य धर्ममचिन्तयित्वा समाजस्वास्थ्यं तृणीकृत्य जगज्जनसौख्यमवज्ञाय च सर्वसंयमं विगलितवेद्यान्तरैर्विस्मृतान्यकर्तव्यैः केवलं स्वप्रवृत्त्यनलेष्वेव समर्प्यन्त इन्धनानि, यैः सतृष्णं पश्यत्स्वपि बुभुक्षुषु बान्धववृन्देषु स्वास्ये एव निक्षिप्यन्तेऽनुपमरसानि भोज्यानि, यैश्च मातरं च पितरं च भ्रातरं च स्वसारं च निर्घृणं परित्यज्य नर्तकी वाऽभिनेत्री वा तत्समानजातीया वा काचन स्वधनस्य स्वग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णस्य स्वजीवितस्य चाधिश्वरीपदे प्रतिष्ठाप्यते, परेद्यवि च तामेव मनोरथ-प्रियतमामपरस्याङ्कशायिनीमवलोक्यापरा काचन संगृह्यते, यैश्च प्राचीनाचार-श्रद्धालवो हिन्दवः Back to the Vedas इतिवचनेनोपहसद्भिः स्वयं Back to the animal kingdom इति वचनस्य सार्थक्यं सम्पादयद्भि-र्निर्विशङ्कमेव पशुवृत्तिरनुष्ठीयते, यत् किमपि भुज्यते, नग्नैरेवावस्थीयते, गम्यागम्यादिविचारः सुदूरं परिहीयते, अपि नाम यन्त्रविज्ञानबलेन समुद्भावितसुखोपाया इमे सभ्यपदवाच्याः। कामं कामसुखमनुपमरसं परम सुखम्। तथापि धर्माविरुद्धेनैव मार्गेण सुखमिदमनुभवितव्यम्, संयम एवास्य तन्त्रधारकः। अत एवोक्तं भगवता—"धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ" इति।

न खल्वार्यधर्मशास्त्रेषु द्रविणोपार्जनं निषिद्धं न वा कामोपभोगः प्रतिषिद्धः। महाभारते च भूयो भूय उपदिष्टम्—

धर्मार्थकामाः सममेव सेव्या
यो ह्येकसक्तः स जनो जघन्यः।
द्वयोस्तु दाक्ष्यं प्रवदन्ति मध्यं
स उत्तमो योऽभिरतस्त्रिवर्गे॥

इति। केवलं स्वैराचर एव पर्युदस्तः, उच्छृङ्खलत्वमेव प्रतिषिद्धम्। अत एवाऽऽर्याणां गर्भाधानमपि होमादिपुरःसरमनुष्ठीयते, अन्त्येष्टिरपि मन्त्र-पूर्वकमेव भवति। एवं निषेकादारभ्य श्मशानपर्यन्तमखिलं कार्यजातं स्वात्मनो हितायैवानुष्ठीयमानं शास्त्रेण नियन्त्र्यते। अहो धाष्ट्यं संस्कारकर्मन्यानाम्—यत्र कुमार्यः कोटिशो यावज्जीवमनूढास्तिष्ठन्ति, तत्र विधवानामुद्वाहमधिकृत्य प्रलपन्तो न लज्जन्त इमे। यत्र प्रदेशे ग्रीष्मातिरे-कादतिशीघ्रमेव समवतरति यौवनं तत्र बाल्यविवाहः प्रतिषिध्यते। रिरं-सासन्धुक्षणैकफलानि दृश्यश्रव्यादिकाव्यान्याख्यानाख्यायिकाश्च विरचयन्तो ग्रन्थकृतः श्लाघ्यन्ते प्रशस्यन्ते बहुमन्यन्ते, किं बहुना दैवतबुद्ध्या परिचर्यन्ते, काव्याभासानि च तानि साभिनिवेशमनुशील्यन्ते, विवाहविधानं पुनश्चरण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तलेनावमर्द्यते। राष्ट्रीयसंस्थयाऽनुशासनबलेन बालानां यथाकालं पाणिपीडनं प्रतिरोद्धुं शक्यते, पार्यन्ते च शास्त्रेषु श्रद्दधाना दण्डेन योजयितुम्, परं यौवनोद्गमः प्रतिरोद्धुं प्रभूयते वैतया। पुरा किल महाप्रभावस्य पार्थिवस्य दुष्यन्तस्य निर्देशो वासन्तिकैस्तरुभिस्तदाश्रयिभिश्च पत्रिभिः प्रमाणीकृतः। तथाहि—

चूतानां चिरनिर्गताऽपि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरुवकं तत् कोरकावस्थया।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम्॥

परं तत्राप्यभिनवयौवनशालिनोभ्यां विलासिनीभ्यां प्रारब्धं कामदेवार्चनम्।

अयि भो आर्याः, अमृतस्य पुत्राः, ननु शास्त्रमेव वः प्रमाणं कार्याकार्यव्यवस्थितौ। सर्वथा शास्त्रवचनमेव प्रमाणीक्रियताम्, शास्त्रक्षुण्ण एव मार्गोऽनुस्रियताम्, संयमः समवलम्ब्यताम्। तृणच्छन्नकूपोपमानां प्रज्ञावादान् भाषमाणानां लाङ्गूलहीनशृगालकल्पानाममीषां सुधारकम्मन्यानां वचःसु लेशतोऽपि न श्रद्धातव्यम्। एते खलु मूर्त्ता इव कलिदूता दूरतः परिहर्तव्याः। तथाचोक्तं विष्णुपुराणे कलिस्वभाववर्णनप्रसङ्गे—

कलेः स्वरूपं मैत्रेय यद्भवान् प्रष्टुमिच्छति।
तन्निबोध समासन्नं वर्तते यन्महामुने॥
वर्णाश्रमाचारवती प्रवृत्तिर्न कलौ नृणाम्।
न सामऋग्यजुर्वेदविनिष्पादनहेतुका॥
विवाहा न कलौ धर्म्या न शिष्यगुरुसंस्थितिः।
न दाम्पत्यक्रमो नैव वह्निदैवात्मकः क्रमः॥
यत्र तत्र कुले जातो बली सर्वेश्वरः कलौ।
सर्वेभ्य एव वर्णेभ्यो योग्या कन्याऽवरोधने॥
येन केनैव योगेन द्विजातिर्दीक्षितः कलौ।
यैव सैव च मैत्रेय प्रायश्चित्तक्रिया कलौ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वमेव कलौ शास्त्रं यस्य यद्वचनं द्विज ।
देवताश्च कलौ सर्वाः सर्वः सर्वस्य चाश्रमः ॥
उपवासस्तथायासो वित्तोत्सर्गस्तथा कलौ ।
धर्मो यथाभिरुचितैरनुष्ठानैरनुष्ठितः ॥
वित्तेन भविता पुंसां स्वल्पेनाढ्यमदः कलौ ।
स्त्रीणां रूपमदश्चैव केशैरेव भविष्यति ॥
सुवर्णमणिरत्नादौ वस्त्रे चापि क्षयं गते ।
कलौ स्त्रियो भविष्यन्ति तदा केशैरलङ्कृताः ॥
परित्यक्ष्यन्ति भर्तारं वित्तहीनं तथा स्त्रियः ।
भर्ता भविष्यति कलौ वित्तवानेव योषिताम् ॥
यो यो ददाति बहुलं स स स्वामी तदा नृणाम् ।
स्वामित्वहेतुः सम्बन्धो भावी नाभिजनस्तदा ॥
गृहान्ता द्रव्यसङ्घाता द्रव्यान्ता च तथा मतिः ।
अर्थाश्चाऽऽत्मोपभोगान्ता भविष्यन्ति कलौ युगे ॥
स्त्रियः कलौ भविष्यन्ति स्वैरिण्यो ललितस्पृहाः ।
अन्यायावाप्तवित्तेषु पुरुषेषु स्पृहालवः ॥
अभ्यर्थितोऽपि सुहृदा स्वार्थहानिं न मानवः ।
पणार्धार्धार्धमात्रेऽपि करिष्यति तदा द्विज ॥
समानं पौरुषञ्चैते भावि विप्रेषु वै कलौ ।
क्षीरप्रदानसम्बन्धि भावि गोषु च गौरवम् ॥
अनावृष्टिभयप्रायाः प्रजाः क्षुद्भयकातराः ।
भविष्यन्ति तदा सर्वा गगनासक्तदृष्टयः ॥
कन्दपर्णफलाहारास्तापसा इव मानवाः ।
आत्मानं पातयिष्यन्ति तदा वृष्ट्यादिदुःखिताः ॥
दुर्भिक्षमेव सततं तदा क्लेशमनीश्वराः ।
प्राप्स्यन्ति व्याहतसुखप्रमोदा मानवाः कलौ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्नानभोजिनो नाग्निदेवतातिथिपूजनम् ।
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम् ॥
लोलुपा ह्रस्वदेहाश्च बह्वन्नादनतत्पराः ।
बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः ॥
उभाभ्यामेव पाणिभ्यां शिरःकण्डूयनं स्त्रियः ।
कुर्वन्त्यो गुरुभर्तृणामाज्ञां भेत्सन्त्यनादृताः ॥
स्वपोषणपराः क्षुद्रा देहसंस्कारवर्जिताः ।
परुषानृतभाषिण्यो भविष्यन्ति कलौ स्त्रियः ॥
दुःशीला दुष्टशीलेषु कुर्वत्यः सततं स्पृहाम् ।
असद्वृत्ता भविष्यन्ति पुरुषेषु कुलाङ्गनाः ॥
वेदादानं करिष्यन्ति वटवश्च तदाऽव्रताः ।
हस्थाश्च न होष्यन्ति न दास्यन्त्युचितान्यपि ॥
वनवासा भविष्यन्ति ग्राम्याहारपरिग्रहाः ।
भिक्षवश्चापि मित्रादिस्नेहसम्बन्धयन्त्रिताः ॥
अरक्षितारो हर्तारः शुल्कव्याजेन पार्थिवाः ।
हारिणो जनवित्तानां सम्प्राप्ते तु कलौ युगे ॥
यो योऽश्वरथनागाढ्यः स स राजा भविष्यति ।
यश्च यश्चाबलः सर्वः स स भृत्यः कलौ युगे ॥
वैश्याः कृषिवाणिज्यादि सन्त्यज्य निजकर्म यत् ।
शूद्रवृत्त्या प्रवर्त्स्यन्ति कारुकर्मोपजीविनः ॥
भैक्ष्यव्रतास्तथा शूद्राः प्रव्रज्यालिङ्गिनोऽधमाः ।
पाषण्डसंश्रयां वृत्तिमाश्रयिष्यन्त्यसंस्कृताः ॥
दुर्भिक्षकरपीडाभिरतीवोपहता जनाः ।
गवेधुककदन्नाद्यान् देशान् यास्यन्ति दुःखिताः ॥
वेदमार्गे प्रलीने च पाषण्डाढ्ये ततो जने ।
अधर्मवृद्ध्या लोकानां स्वल्पमायुर्भविष्यति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अशास्त्रविहितं घोरं तप्यमानेषु वै तपः ।
नरेषु नृपदोषेण बालमृत्युर्भविष्यति ॥
भविन्त्री योषितां मृतिः पञ्चषट्सप्तवार्षिकी ।
नवाष्टदशिवर्षाणां मनुष्याणां तथा कलौ ॥
पलितोद्भवश्च भविता तदा द्वादशवार्षिकः ।
नातिजीवति वै कश्चित् कलौ वर्षाणि विंशतिम् ॥
अल्पप्रज्ञा वृथालिङ्गा दुष्टान्तःकरणाः कलौ ।
यतस्ततो विनश्यन्ति कालेनाल्पेन मानवाः ॥
यदा यदा हि पाषण्डवृद्धिर्मैत्रेय लक्ष्यते ।
तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः ॥
यदा यदा सतां हानिर्वेदमार्गानुसारिणाम् ।
प्रारम्भाश्चावसीदन्ति यदा धर्मभृतां नृणाम् ॥
तदाऽनुमेयं प्राधान्यं कलेर्मैत्रेय पण्डितैः ।
यदा यदा न यज्ञानामीश्वरः पुरुषोत्तमः ॥
इज्यते पुरुषैर्यज्ञैस्तदा ज्ञेयं कलेर्बलम् ।
न प्रीतिर्वेदवादेषु पाषण्डेषु यदा रतिः ॥
कलिवृद्धिस्तदा प्राज्ञैरनुमेया द्विजोत्तम ।
कलौ जगत्पतिं विष्णुं सर्वस्रष्टारमीश्वरम् ॥
नार्चयिष्यन्ति मैत्रेय पाषण्डोपहता नराः ।
किं वेदैः किं द्विजैर्देवैः किं शौचेनाम्बुजन्मना ॥
इत्येवं विप्र वक्ष्यन्ति पाषण्डोपहता नराः ।
स्वल्पाम्बुवृष्टिः पर्जन्यः सस्यं स्वल्पफलं तथा ।
फलं तथाऽल्पसारञ्च विप्र प्राप्ते कलौ युगे ॥
शाणप्रायाणि वस्त्राणि शमीप्राया महीरुहाः ।
शूद्रप्रायास्तथा वर्णा भविष्यन्ति कलौ युगे ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिषदः प्रयोगसिद्धिः

[निबन्धकः—श्रीहेमन्तकुमार-तर्कतीर्थः]

संस्कृत-साहित्य-परिषदो विगते वार्षिकाधिवेशनोत्सवे समाहूता वयं विविधविद्यापारदृश्वनां बहूनां विदुषां सुरभारतीमयं सुललितं वचनजातं समाकर्ण्य यथा श्रवणपरितृप्तिमपरिसीमामासादितवन्तस्तथा युगपन्नयनपरितृप्तिमप्यनिर्वचनीयां परिषत्सदस्यानां दुर्निरूपमभिनयकौशलं निरूप्य। सुसम्पन्नः खलु परिषदो वार्षिकमहोत्सवो यथापूर्वं विचक्षणानामुद्योक्तृणामप्रमादेनानुष्ठानेन, अपरिसीमेनोत्साहेन, असाधारणेन यत्नेन च। तथापीदं प्राप्तकालमावेदयामो यत् प्राचीनभारतीयनाट्यकलायाः समुन्नयनसाधनायां चिरादासादितचरमसिद्धीनां परिषत्सदस्यानां नयनमनस्तर्पणेन निपुणतमेनाभिनयेन सुविमलनाट्यरसास्वादनया सामाजिकानामन्तराण्यन्ते सन्तर्प्य शङ्कामात्रगोचरीभूतं सर्वमपि वैगुण्यं सुसमाहितमेव।

के वा न जानन्ति यत् परिषत्सदस्यैः प्रतिवर्षमेवंविधेनाभिनयेन पूर्णाङ्गतामापाद्यते परिषदो वार्षिकमहोत्सवः, तुष्टिं नीयते सामाजिकवर्गः, समुत्पाद्यते चाशा परिषदो गौरवमण्डितायां भविष्यन्त्यां परिस्थितौ। विगते किल वार्षिकमहोत्सवे तैर्निपुणकवीनां तत्रभवतां तर्काचार्यपादानां ललितप्राया कृतिनलपुण्यकथामयं "नलदमयन्तीयं" नाम नाटकं प्रयुक्तमासीत्। अनभिनीतपूर्वस्यास्य नवीननाटकस्याभिनये परिषदः सदस्यवर्गैर्यन्निपुणनटोचितं प्रावीण्यमाविष्कृतं तेन चमत्कृता वयं भूयो भूयः प्रशंसामः परिषदुट्टङ्कितां नाट्यशैलीम्। यद्यपि रूपकस्यास्य प्रयोगसाफल्ये निपुणकवीनां वश्यवाचां तत्रभवतां तर्काचार्यपादानां ललितरचनानैपुण्यम्, तथा यथापात्रं रसानुगुणायां भाषासृष्टौ वस्तुसंघटनायां पात्रादिकल्पनायां च सर्वत्रैव सामाजिकचित्तानुवृत्तौ निरन्तरमवधानमसामान्यो हेतुस्तथापि तत्तद्भावा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिनये पात्रादिसंयोजनायां सङ्गीतकादौ च परिषन्नाट्यशिक्षकाणां शिक्षण-परिपाटी अभिनेतॄणां सचेतस्त्वं रसानुभूतिः प्रयोगाभ्यासकौशलं भाववेदित्वादिकं च निखिलमेवैकान्ततोऽपेक्षणीयमेव। तच्च सर्वमेव सम्मिलितं परिषदः प्रयोक्तृवर्गेषु वरीवर्तीति साफल्यविशेषदर्शनाच्छक्यमेवानुमातुम्।

तथाहि—तेषु विदूषकभूमिकां गतस्य दमयन्तीभूमिकामाश्रितस्य च कायवाग्वेशभङ्ग्यो भावाभिनयाश्च सर्वथैव हृदयग्राहिण एव समजायन्त। माधवीलतामण्डपे नलनेत्रपिधानवेलायां, नारीकण्ठस्वरानुकृति-तद्विस्मृत्यादेर्यथावदभिनयेन सामाजिकचेतसामपूर्वरसनिमज्जनायां विदूषकभूमिकामुपारूढेन यन्नैपुण्यमाविष्कृतं तदसाधारणमेव। एवमन्यत्रापि सर्वत्रैवास्याभिनयो हृद्यतरः सञ्जातः। अनुरूपाभिः कायवाग्वेशभङ्गीभिः रमणीजनोचितेन कण्ठस्वरेण तदुचितलज्जाभावादिनाटितकप्रावीण्येन च दमयन्तीभूमिकामुपारूढो विशेषतः प्रशंसामर्हति। मन्ये निपुणतमेष्वपि प्रयोक्तृवर्गेषु विशेष्यत एवायम्। नलभूमिकां विदूषकभूमिकां दमयन्तीभूमिकां किरातराजभूमिकां चोपाश्रितानां वाचां विस्पष्टता उच्चारणपरिशुद्धिश्च विशेषतः समुल्लेखमर्हतः। वाचिकाभिनये नलभूमिकामुपारूढेन महत् प्रावीण्यं परिदर्शितम्। कलि-विदूषक-दमयन्ती-किरातराजभूमिकागतानां वपुर्वेशयोस्ततत्पात्रानुरूप्यं दर्शकानां नयनतर्पणं समजनि। परं केवलं नलभूमिकामुपाश्रितस्य वपुर्वैषम्यं मन्ये न कस्यापि नयनपथमतिक्रान्तम्। यद्यप्येवं तथापि वनवासवेशेन नलोऽपि हृद्यरूप एव सञ्जात इति अकामेनापि वक्तव्यमेव। कलिभूमिकामुपारूढेन यद्यपि वक्तव्यं न सम्यगभ्यस्तं कार्त्स्न्येन, तथापि रौद्ररसाभिनयेऽपूर्वोऽस्य नैपुण्यविशेषः परिलक्षितः, येनाऽऽत्मनो वक्तव्यस्मृतिविलम्बेष्वपि निपुणमनेन वञ्चिताः सामाजिकाः। वपुर्वेशयोर्युक्तता चास्य सञ्जाता। रमणीजनभावाभिनये कल्पलताभूमिकामुपारूढोऽप्युल्लेखमर्हति।

गीतकान्यपि प्रायः सर्वाण्येव मधुराक्षराणि सरलरचनारमणीयानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतशब्दमयान्यपि वङ्गभाषामयाणीव प्रतीयमानानि स्वरविशेषसंयोगाच् श्रवणमनसोस्तृप्तिमभिनवामुदपादयन्। तेषु नियतेः संगीतमस्माकमद्यापि प्रसक्तमिव श्रुतिकुहरे हरतीव प्रसह्य चित्तम्। तदेवं निपुणतमविपश्चिन्नटभूयिष्ठेयं नाट्यगोष्ठी सर्वतः समुत्कर्षविशेषं भजत इत्यत्र को वा सन्देहावसरः।

किं बहुना यदा यदा प्रयोक्तृणां प्रयोगकौशलं सङ्गीतमाधुर्यं च स्मृतिपथमाक्रामति तदा तदैव हृतप्रायं भवति चित्तम्। प्रवर्तते च "वृत्तं रामस्य' इत्यादि कविवर्यवचनशैलीमनुसृत्य अस्माकमपि मानसी वाणी—

पुण्या नलकथा रम्या मधुरा सुकवेः कृतिः।
निपुणाश्च प्रयोक्तारो ह्रियेत न कथं मनः॥ इति।

वयममुष्याः परिषदः परिषन्नाट्यगोष्ठ्यास्तथा तत्परिषच्चालकानां च निरुपद्रवं दीर्घजीवनं कामयामहे इति।

उपक्रान्तं सुरभारत्याः प्रकाशनम्

विदितमेवैतत् प्रायेण प्रियपाठकमहाभागानामशेषाणां यत् सुरभारतीसेवनसमर्पितजीवनैरस्माभिः स्वीकृत्य गरीयसीं हानिं तृणीकृत्य शरीरस्वास्थ्यम् अविगणय्य स्वजनसौख्यं Calcutta Oriental Journal "मञ्जूषा" च प्रतिमासमेव प्रकाश्येते। इदानीं पुनर्वङ्गीयानामनुरोधेनाविज्ञाताङ्गलभाषादिष्वपि सुरभारत्याः प्रचारमभीहमानैरभिनवैव वङ्गभाषामयी नानाविधप्रबन्धभासुरा सुरभारतीसमाख्या मासिकपत्रिका प्रचारयितुमुपक्रान्ता। तस्याश्च सद्यः प्रकाशितायां प्रथमसंख्यायां विपश्चिद्वृन्दवृन्दारकैः कोकिलेश्वरशास्त्रिमहाभागैश्चुलुकीकृतदर्शनपारावारैः कठोपनिषदो विद्वज्जनश्लाघनीयायाः संक्षिप्तं विवरणमनितरसाधारणया मनोहरतमया वाचोयुक्त्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवृतम्। वङ्गीयब्राह्मणसभायाः प्रतिष्ठापकानामन्यतमेन परलोकप्रस्थितेन पण्डितप्रकाण्डेन तारकनाथस्मृतिरञ्जनमहोदयेन प्रोल्लासितो महाभारतप्रसङ्गः महाभारतस्य निगूढतत्त्वं कर्मफलस्य च विचित्रां गतिं प्रतिपादयन् आ पांशुलपादेभ्यः समुच्छ्रिततमान् यावत् सर्वेषामेव समावर्जयेन्मानसमित्यत्र नास्ति नः स्तोकोऽपि सन्देहः। अस्माभिश्च रसगङ्गाधराख्यस्य पण्डितराजजगन्नाथरायस्य प्रतिवादिगर्वसर्वङ्कषस्य वङ्गभाषामयं व्याख्यानादिकं प्रकाश्यते, पाणिनिव्याकरणस्य व्याख्यानादीनामुपोद्घातरूपेण त्रिमुनिविवरणमुपनिबद्धम्, प्रसङ्गतश्च माहेशव्याकरणवृत्तान्त उपवर्णितः, पाणिनिमधिकृत्य विरचितः समस्यापूरणश्लोकश्च समुद्धृतः। अन्ते च ज्योतिषप्रसङ्गाख्ये सुमनोहरे निबन्धे ज्योतिषशास्त्रगतवचनजालमन्तरेणैव स्वाभाविक्येव बुद्ध्या यथा कुण्डल्यादिविचारः सम्यक्तया सम्पादयितुं शक्येत तथोदाहरणमुखेन प्रदर्शितम्। ततश्च उद्भटश्लोकस्तदनुरूपं शार्मण्यभाषामयं च पद्यं साङ्गानुवादं सन्निवेशितम्। अन्तरान्तरा च विविधभाषागता विचित्रा भणितयः समुद्धृताः। इत्थञ्च यथा पत्रिकेयं सर्वेषामेव सहृदयानां सौमनस्यं समुपजनयेत्, चिरं च निराबाधमासेतुहिमाचलं प्रचलेत्, तदर्थमादावेव मङ्गलाचरणरूपेण वेदसूक्तं सानुवादं सम्मुद्रितम्। प्रकाशनात् पूर्वमेव पुण्यपत्तनाभिभिज्ञैर्मीमांसाकेशरिभिः सर्वतन्त्रस्वतन्त्रधिषणैरुपहसितसुरगुरुप्रज्ञैः किञ्जोडेकरशास्त्रिमहोदयैरितरैश्च सिंहलद्वीपादिदूरतरप्रदेशनिवासिभिः स्वत एव पत्रं प्रेष्य ग्राहकत्वमङ्गीकृतम्। आशास्यते च साम्प्रतं नानारसरुचिरां सुश्लक्ष्णपीतप्रच्छदपटसमलङ्कृतां सुरभारतीं समालोक्य सन्तृप्तान्तरङ्गाः सहृदया अहमहमिकया रूप्यकद्वितयं संप्रेष्य ग्राहकभावमुररीकुर्युर्विदध्युश्च साहायकं सुरभारतीप्रचारविधाविति शम्।

श्रीक्षितीशचन्द्रशर्मणः

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषद ऊनविंशवर्षस्य (१३४१ वङ्गाब्दस्य)

आय-व्ययनिष्कर्षः

(१) साधारणकोषः

आयः			व्ययः		
गतवर्षस्य व्ययावशिष्टः			पत्रिकार्थम्	...	८३५।।।–१५
हस्ते	...	१७६।=०	पुस्तकालयार्थम्	...	७८७)
ष्ट्याम्प	...	११।।–१५	पुस्तकप्रकाशार्थम्	...	५३।।।–०
अग्रिमादिः	...	१०।–५	सभाभिनयाद्यर्थम्	...	२८२।–१५
वृत्तिरूपेण प्राप्तः			शिक्षाविभागार्थम्*		३४।।।–१०
(कलकत्तातः)		१३८६।०	गृहभाटकाद्यर्थम्	...	७३७=०
,, (स्थानान्तरात्)		४७५।०	वर्तनाद्यर्थम्	...	४७६।।=१५
सामयिक-दानरूपेण—			गृहोपकरणाद्यर्थम्	...	१०।।।१५
दातृभ्यः	...	२८०।।०	शुल्कार्थम्	...	२१)
गभर्णमेण्ट-सकाशात्			मुद्रणव्ययार्थम्—	...	२६।।।=०
(१६३४-३५)		५००)	पाथेयार्थम्	...	४४।=०
कर्पोरेशन सकाशात्			पत्रादि-शुल्कपत्रार्थम्		२७)१५
१६३३-३४		५४१)	वि० षि० शुल्कपत्रार्थम्		२६।।=१५
करपोरेशन-सकाशात्			विविध-विषयार्थम्	...	२६।।।१०
(१६३४-३५)		६५०)	ग्रन्थागारकोषे प्रत्यर्पितः		१३२)५
पुस्तकादि-विक्रयात्		२३७।।१५		...	३५३२।–१५
प्रावेशिक-रूपेण	...	२।।०	उद्वृत्तः		
विज्ञापनरूपेण		४)	ष्ट्याम्प	...	२८।०
वि० षि० शुल्कपत्रात्		२१।।।=१०	प्राप्यः (अग्रिमादिः)		२२।।।५
कुशीदरूपेण		३।।=१०	हस्ते	...	७३६।।१५
अन्यतः	...	२१।।=०			
		४३२२।।।=१५			४३२२।।।=१५

* वर्षेऽस्मिन् प्रदेयोऽध्यापकपुरस्कार आगामिनि वर्षे दास्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२) गृहकोषः

(१३४१ वङ्गाब्दे)

गतवर्षस्य व्ययावशेषितः

(१९४५-५५)

गवर्णमेण्ट-लोनपत्रे १०००)

क्याश सार्टिफिकेट-पत्रद्वये १५००)

२५००)

वर्षेऽस्मिन् आय-व्ययाभावात्

तदेवोद्वृत्तम् ।

उद्वृत्तस्य विवरणम्

पूर्वोक्ते गवर्णमेण्टलोनपत्रे १०००)

क्याश-सार्टिफिकेटपत्रद्वये १५००)

२५००)

(३) ग्रन्थालय-कोषः

(१३४१ वङ्गाब्दे)

गतवर्षस्य प्रत्यर्पणावशेषितः ३९०॥०

१३४१ वङ्गाब्दे न्यासरूपेण

प्राप्तः ... १०६)

४९६॥०

आय-व्यय-लिपिरक्षकः

श्रीरामकृष्ण-चक्रवर्ती

आय-व्यय-लिपिपरीक्षकः

श्रीमलयकुमार-देवः

४९६॥०

१३४१ वङ्गाब्दे प्रत्यर्पितः ५४॥०

अतिरिच्यमानः ४४२)

सेण्ट्रालब्याङ्क आगारे पो० आ०

सेविंस ब्याङ्क आगारे च वर्तते ।

१३४१ वङ्गाब्दावसाने

परिषदः साधारण-कोषस्य

ऋणम्

१३३३ वङ्गाब्दे गृहकोषाद्

गृहीतम् ... ७८॥०

१३३४ " " ... ७७५)

१३३६ " " ... १०२५)

१३३७ " " ... १०००)

१३३८ " " ... १२५)

३००३॥०

१३३८ वङ्गाब्दे ऋण-

प्रत्यर्पितम् ... ७७५)

२२२८॥०

१३३९ वङ्गाब्दे

गृहकोषाद् गृहीतम् १०८७॥०

३३१६)

सम्पादकौ

श्रीअमरेश्वर-ठाकुरः

श्रीयतीन्द्रनाथ-वसुजश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अजयपालकृतो

नानार्थसंग्रहः

जयन्ति शास्तुः पदपङ्कजाङ्कुरा
नखाः शरच्चन्द्रमरीचिकोमलाः ।
विनम्रदेवासुरमौलिषु श्रियं
वहन्ति ये प्रस्फुटमालतीस्रजः ॥

वीप्स्य पूर्वकविग्रन्थानकाराद्यादिभिः पदैः ।
क्रमादजयपालेन कृतो नानार्थसंग्रहः ॥१॥
सर्वत्रादावनेकार्थः प्रथमान्तोऽत्र दर्शितः ।
वर्त्तमानः सप्तम्यन्ते सप्तम्यन्तैरभेदिते ॥२॥
लिष्वेव बहुवचनं कृतं न चतुरादिषु ।
विना लिङ्गविशेषेण नैवात्र पुनरुक्तता ॥३॥

[अ]

अमृतं हृद्ये पीयूषे यज्ञशेषेऽप्ययाचिते ।
मुक्तौ तोयेऽमृता धात्र्यां गुडूचीपथ्ययोरपि ॥४॥
अक्षो विभीतके नित्ये शकटव्यवहारयोः ।
रथस्यावयवे कर्षे पाशकेऽप्यक्षमिन्द्रिये ॥५॥
अरिष्टं सूतिकागारे मृत्युचिह्ने शुभेऽशुभे ।
तक्रेऽप्यरिष्टो लशुने काके फेनिलनिम्बयोः ॥६॥
अञ्जनं कज्जले दृष्टमञ्जनो दिग्गजान्तरे ।
गिरिभेदेऽञ्जनाऽम्बायां मारुतेश्च हलाहले ॥७॥
अवहारो रणादीनां विश्रान्तौ ग्राहयादसि ।
*निमन्त्रणोपनेतव्यद्रव्ये चौरे च भाषितः ॥८॥

* निमन्त्रणोपनेतव्यं शर्करादिखादूक्तं भक्ष्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिपन्नो विप्रकृष्टे स्वीकृतेऽभिद्रुते तथा ।
अपराद्धेऽप्यभिग्रस्ते दक्षिणेऽपि प्रयुज्यते ॥९॥
अनुबन्धो दोषोत्पादे प्रकृत्यादेर्विनश्वरे ।
प्रस्तुतस्यानुवृत्तौ च शिशौ श्रेष्ठानुयायिनि ॥१०॥
अर्जुनी सौरभेय्यां स्यादर्जुनस्तु धनञ्जये ।
जनन्येकसुते शुक्ले तृणवृक्षप्रभेदयोः ॥११॥
*अन्तरं भेदे तादर्थ्ये स्थाने वाह्येक्षणेऽवधौ ।
विनार्थे स्वीये स्वेऽन्तर्द्धौ वस्त्रभेदेऽन्तमध्ययोः ॥१२॥
अरुणोऽर्के सान्ध्यदीप्तौ रक्ते चानूरुपिङ्गयोः ।
अव्यक्तरागे निःशब्देऽप्यरुणाऽतिविषौषधौ ॥१३॥
अनन्तं खेऽनन्तो विष्णौ शेषेऽनन्ता मता भुवि ।
दुरालभायां दूर्वायामपत्यं पुत्रकन्ययोः ॥१४॥
†अर्थो धनेऽनुवृत्तौ च विषये हेतुवस्तुनोः ।
प्रयोजनेऽभिधेये स्यादवनं प्रीतिरक्षयोः ॥१५॥
अजः पितामहे छागे केशवे च महेश्वरे ।
अथर्वाणिरथर्वज्ञे दृश्यते च पुरोहिते ॥१६॥
अन्तशय्या श्मशाने स्याद् भूशय्यायामपि क्वचित् ।
अम्बरीशस्तु राजन्ये सूर्ये हयकिशोरके ॥१७॥
अभिशस्तिरभिशापे प्रार्थनायाञ्च कीर्तिता ।
अनुभावो निश्चये स्यात् प्रभावे भावबोधके ॥१८॥
आस्तेऽनुमतिऽरून्नेन्दुपूर्णिमायाञ्च सम्मतौ ।
अधिक्षिप्तः प्रणिहिते प्रेरिते चौरभर्त्सिते ॥१९॥

---

* अन्तरङ्गे च तादर्थ्ये स्थाने वा प्रक्षणे..... ।
विनाशेऽसीयेखन्तर्धौ वाक्यभेदेऽन्तमध्ययोः ॥
इत्यादर्शे ।

† अर्थो विज्ञार्थशालिनोरित्यजयः इति टीकासर्वस्वम् ।

‡ 'न्यूनेन्दुपूर्णिमायामि'त्यादर्शे

§ 'निःसङ्गे' इत्यादर्शे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपाचीनं विपर्यस्ते अपागर्थे च कुत्रचित् ।
अभीक्ष्णन्तु पौनःपुन्ये सर्वदार्थे च दृश्यते ॥२०॥
अनूचानो नयनम्रे षडङ्गश्रुतिवेदिनि ।
अर्को वृक्षान्तरे ज्येष्ठभ्रातरि स्फटिके रवौ ॥२१॥
अयनं दक्षिणोदीचीगतौ भानोस्तथा पथि ।
भवेदपचितिः पूजाव्ययहानिषु निष्कृतौ ॥२२॥
अत्याहितं महाभीतौ जीवानपेक्षकर्मणि ।
अहिद्विड् गरुडे शक्रे मयूरे नकुले तथा ॥२३॥
अनुकर्षो रथस्याधःकाष्ठेऽनुकर्षणेऽपि च ।
अघशब्दो भवेत् पापे दुःखव्यसनयोरपि ॥२४॥
अवग्रहः प्रतिबन्धे वृष्टिरोधे गजालिके ।
*अन्तः प्रान्ते स्वरूपे च समीपे निधनेऽपि च ॥२५॥
अम्बरं वाससि व्योम्नि सुगन्धिद्रव्यभेदयोः ।
अभिजातो बुधे न्याय्ये समन्ताज्जातधन्ययोः ॥२६॥
अभिषङ्गः स्यादाक्रोशे शापाभिभवयोरपि ।
अमरेन्द्रपुरीस्थूणागुडूचीष्वमरः सुरे ॥२७॥
अग्रमूर्ध्वे पुरः श्रेष्ठे परिमाणेऽधिकेऽपि च ।
अवेलस्त्वपलापे† स्त्री पूगरक्तमुखाम्भसोः ॥२८॥
अभिख्या नाम्नि निर्दिष्टा शोभाविख्यातिकीर्त्तिषु ।
अवष्टम्भस्तु संरम्भे स्तम्भकाञ्चनयोरपि ॥२९॥
अपवर्गः क्रियाशेषे साफल्यत्यागमुक्तिषु ।
अभिमानवाग् विज्ञप्तौ गर्वे प्रणयहिंसयोः ॥३०॥
अवरं न तोद्गमाभावतारयोः (?) ।
अरुष्करं व्रणकृति मतं भल्लातकेऽपि च ॥३१॥

---

* अन्तः प्रान्ते समीपे च स्वरूपे च निषेधने इति टीकासर्वस्वम्
† 'स्यात्' इत्यधिकमादर्शे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अम्बष्ठा पृथ्व्यां पाठायामम्बष्ठो वैद्यदेशयोः ।
अष्टापदं शातकुम्भे तथा शारिफले मतम् ॥३२॥
अत्ययः कृच्छ्रे नाशे च कथितो दोषदण्डयोः ।
अवधिः सीम्नि गर्त्ते च तथा कालावधानयोः ॥३३॥
अभिनिष्ठान उद्दिष्टो विसर्जनीयवर्णयोः ।
अस्रः कोणे मूर्धजेऽस्रमश्रुणि क्षतजे तथा ॥३४॥
अनयस्तृणभेदे वै विपत्तौ व्यसनेऽपि च ।
पश्चात्तापेऽनुतापः स्यादनुबन्धे मतोऽप्यसौ ॥३५॥
अरत्निः स्यात् सप्रकोष्ठे कनिष्ठकरकीलयोः ।
अनीकस्थो नृपारक्षे राजशिक्षाविचक्षणे ॥३६॥
अभिहारोऽभियोगे च चौर्यसन्नाह्योरपि ।
अवतारणं भूताद्युपग्रहे वसनाञ्चले ॥३७॥
अवदानमतिवृत्ते खण्डने रक्षणेऽपि च ।
अङ्गजः सुतकन्दर्पशोणितेषु तथा रुजि ॥३८॥
अजिरं विषये काये प्राङ्गने दर्दुरेऽनिले ।
अभिनीतं न्याय्येऽपि स्यादमर्षवति संस्कृते ॥३९॥
अध्यारूढमभ्यधिके समारूढेऽपि दृश्यते ।
भवेदभिमरो युद्धे स्वपक्षबलसाध्वसे ॥४०॥
अनुत्तरमवचने वाक्यभेदेऽपि दृश्यते ।
अङ्गं गात्रे तथाऽपायेऽप्यङ्गो देशेऽङ्गशालिनि ॥४१॥
भवेदभिषवः स्नाने बले च मद्यसंहतौ ।
अभिग्रहोऽभियोगे च समन्ताद् ग्रहणेऽपि च ॥४२॥
अपाङ्गो नयनस्यान्ते *तिलके चाङ्गहीनके ।
अंशुकं वसने सूक्ष्मे वस्त्रमात्रान्तरीययोः ॥४३॥

---

* "स्याच्चिवकाप्रधानयोः" इति भरतमल्लिकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेडमूकशब्दोऽयं श्रुतिवाग्वर्जिते शठे ।
अवतारोऽवतरणे तीर्थे दूताद्युपग्रहे ॥४४॥
अन्तर्गतस्तु मध्ये विस्मृते प्राप्तेऽभिधेयवत् ।
अवध्वस्तो निन्दितेऽपि समुज्झितेऽवचूर्णिते ॥४५॥
भवेदवसितं ज्ञाते समाप्तिङ्गतवत्यपि ।
अन्तिकं सन्निधौ दृष्टमन्तिका चुल्लिकापि च ॥४६॥
अश्वीयमश्वसंघाते स्यादश्वानां तथा हते ।
अपवर्जनन्तु दाने च परित्यागेऽपि दृश्यते ॥४७॥
अधिष्ठानं रथस्याङ्गे *तथा चागमनेऽपि च ।
अवगीतन्तु निर्वादेऽनुक्तदृष्टेऽपि गर्हिते ॥४८॥
अपभ्रंशोऽपशब्दे च भाषाभेदापवादयोः ।
†**अभिजनः** स्यादभिख्याने जन्मभूमौ कुले तथा ॥४९॥
अन्तावशायी चाण्डाले कथ्यते नापिते पुमान् ।
अनिमेषोऽनिमिषश्च पृथुरोम-सुपर्वणोः ॥५०॥
अवतंसः स्यादापीडे तथा कर्णावभूषणे ।
अभया च हरीतक्यामुशीरे भयवर्जिते ॥५१॥
अपह्नवो हुतौ स्नेहेऽनीकः सैन्ये पुमानयम् ।
रणे दृष्टं द्युतावर्चिर्ज्वालेऽपि दृश्यते तथा ॥५२॥
अङ्कः क्रोडेऽन्तिके चिह्ने स्यादर्वा कुत्सिते हये ।
अहिभुक् तार्क्ष्यशिखिनोरभीषुः ग्रहे द्विषि ॥५३॥
अववादो विनिन्दायामवज्ञायाञ्च दृश्यते ।
तरोर्मूले (?)**अगाधोऽस्त्री** तथाचास्ताधरन्ध्रयोः ॥५४॥
अतलस्पर्शने क्लीवमुक्तं बुधगणैरपि ।
अणुव्रीहिप्रभेदे च सूक्ष्मेऽहिर्व्रतसर्पयोः ॥५५॥

---

* "प्रभावेऽध्यासने पुरे" इति रघुनाथचक्रवर्तिभरतमल्लिकधृतः पाठः ।
† "भवेदभिजनः ख्यातौ" इत्यन्यत्र ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्यक्षोऽधिकृतेऽन्वक्षेऽवलेपो गर्वलेपयोः ।
अर्घ्यमर्घ्यार्थेऽर्घार्हे स्यान्मूल्येऽपि च बुधैर्मतः ॥५६॥
*अव्यक्तो नीलकण्ठे स्यादव्यक्तश्चास्फुटात्मनोः ।
अभिमर्दो मृधे मर्देऽप्रजन्मा द्विजेऽग्रजे ॥५७॥
अणीरूप्येऽङ्कीलेऽश्रावन्वयोऽन्तकृते कुले(?) ।
अण्डीरः पुंसि† शक्रे स्यादर्घो मूल्ये च सत्कृतौ ॥५८॥
अचलाचलौ भुव्यद्रावविमेषे गिरौ रवौ ।
अमित्रका चिच्चाचाङ्गेर्योरभीकः कामुकेऽभये ॥५९॥
अद्रिद्रुमे गिरावर्के अभ्रं मेघे विहायसि ।
अम्बिकोमामातृकयोरार्त्तिश्चापाग्रपीडयोः ॥६०॥
अकूपारः द्रुमे सिन्धावनीकं रणसैन्ययोः ।
अर्द्धं समांशेऽर्द्धः खण्डेऽप्यनलोऽग्नौ च चित्रके ॥६१॥
‡अम्बुजाख्या च निचुलेष्वब्जेऽप्यन्योऽधमेऽन्यजे ।
अधमो न्यूने गर्ह्ये स्यादवटोऽपि निगद्यते ॥६२॥
प्रजापतिमयोगर्त्ते चानुमोदनभुक्तयोः(?) ।
अनूकमन्वये शीलेऽप्यक्षरं ब्रह्मवर्णयोः ॥६३॥
अट्टः सद्मातिशययोरर्यस्तु प्रभुवैश्ययोः ।
अन्योऽसदृशेतरयोरशनिः पविविद्युतोः ॥६४॥
अवक्षरो गुह्ये गूथे[प्य]ऽर्दितः प्रार्थिते हते ।
अन्धं तमस्यन्धोऽनक्षेऽप्यलिर्वृश्चिकभृङ्गयोः ॥६५॥
अयोगो विधुरे श्लेषे अलिशब्दः (?)प्रकथ्यते ।
अशिरस्कोरुशुवाच्छा(?)भिरूपो ज्ञ-रूपिणोः ॥६६॥
अतोऽव्ययान्यपि प्रश्ने शङ्कायाञ्च समुच्चये ।
सम्भावनायां गर्हायामन्तरेणान्तरा विना ॥६७॥

---

* "अवरोधो नीलोष्ठे स्याद्" इत्यादर्शे † "अण्डीरौ शक्रपुरुषौ" इति शाश्वतः।
‡ शाश्वतकोषे हैमे च नोपलभ्यतेऽयं शब्दः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्तु स्यादभ्यनुज्ञाने पीडेर्ष्ययोरतिस्तुते ।
अलं भूषणसामर्थ्यपर्याप्तिष्ववधारणे ॥६८॥
अभितः शीघ्रे कार्त्स्न्ये च समीप उभयोरपि ।
अञ्जसा तु तथा तूर्णेऽप्यमा सहसमीपयोः ॥६९॥
अह द्रुते विनियोगेऽप्यहहाद्भुतखेदयोः ।
अनु सादृश्येऽनन्तरेऽप्यधिः स्यादीश्वरेऽधिके ॥७०॥

[आ]

आशयो विभवाधारकिम्पचानेषु चेतसि ।
अभिप्राये तथाजीर्णे कोष्ठागारे च सम्मतः ॥७१॥
आवेशनं स्यादावेशे शालायामपि शिल्पिनाम् ।
आर्त्तवं रजसि स्त्रीणामृतूत्थे च प्रकीर्त्तितम् ॥७२॥
आच्छादनं संपिधानवस्त्रवृतिषु दृश्यते ।
आकारो गोलविकृतावाह्वाने चाऽऽकृतौ तथा ॥७३॥
आसुतीवलशब्दोऽयं कल्यपाले च यज्वनि ।
आघिर्व्यसनेऽघिघ्राने मनःपीडे च बन्धके ॥७४॥
आस्फोता विष्णुकान्तायां वनमल्लयर्कपर्णयोः ।
आश्रमो ब्रह्मचर्यादौ दृश्यते काननान्तरे ॥७५॥
आनर्त्तो नृत्यशालायां जने जनपदान्तरे ।*
आरोहः श्रोणौ द्रुमाङ्ग उच्छ्रायहस्तिवाहयोः ॥७६॥
आचितो भारदेशके शकटोन्मेयवस्तुनि ।
आधारश्चाधिकरणेऽप्यालवालाम्बुधारयोः ॥७७॥
आनद्धं बद्धमाले च कथ्यते मुरजादिके ।
आयस्तः कुपिते क्षिप्ते क्लेशिते तेजिते तथा ॥७८॥
भवेदाकलनं बन्धे कलनायामपि स्मृतम् ।
आक्रन्दः क्रन्दनारावे भीमयुद्धे नृपे प्रभौ ॥७९॥

* भरतमल्लिकेन धृतः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मा बुद्धौ धृतौ शीले यत्ने हृद्ब्रह्मणोस्तनौ ।
आतिथ्यमतिथेरर्थे स्यादातिथ्योऽतिथौ तथा ॥८०॥
आकर्षः पाशके द्यूते आकृष्टौ शारिपीठके ।
आडम्बरः स्यादारम्भे तूर्ये द्विरदगर्जिते ॥८१॥
आहतं ताडिते ज्ञाते गुणितेऽनृतभाषिते ।
आशीरिष्टस्याऽऽशंसायां दंष्ट्रायामनिलाशिनाम् ॥८२॥
आवापः स्यादालवाले प्रक्षेपे विप्रतिस्थले ।
आलीढं धनुषः धन्विनः ? स्थानविशेषे स्वादिते तथा ॥८३॥
आयोगो व्याप्तौ गन्धमाल्याद्युपहृतौ तथा ।
आस्थालम्बन आस्थाने प्रयत्ने च प्रयुज्यते ॥८४॥
आषाढो व्रतिनां दण्डे मासपर्वतभेदयोः ।
आतञ्चनं प्रतीवापजवनाप्यायनेषु च ॥८५॥
आग्रहोऽनुग्रहे ख्यात आसङ्गग्रहयोरपि ।
आसारः प्रसरे राज्ञो वेगिवर्षे सुहृद्बले ॥८६॥
आयतिरागामिकाले दीर्घदृष्टिप्रभावयोः ।
आर्या च्छन्दसि दुर्गायामार्यः सुहृदि सज्जते ॥८७॥
आत्मनीनः सुते श्याले प्राणधारे विदूषके ।
आशितम्भवः स्यात्तृप्तावोदनादौ च कथ्यते ॥८८॥
आलानं करिणः स्तम्भे बन्धमाले च कीर्त्तितम् ।
आपन्नमाप्ते विपन्ने आरम्भो वध उद्यमे ॥८९॥
आनकः पटहे भेर्यामाज्यं श्रीवाससर्पिषोः ।
आराधनं तोषणासाधोराप्तिः सम्बन्धलाभयोः ॥९०॥
आशा ककुभि कृत्स्नायामास्पदं पदकृत्ययोः ।
आलिः सेतौ सखीपंक्त्योरागमः शास्त्र आयतौ ॥९१॥
आस्कन्दनं युद्धास्कन्दयोराभीलं कृच्छ्रभीष्मयोः ।
आपातः पाते तदात्वे आगः पापापराधयोः ॥९२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आप्लुतः स्नातके स्नाते **आश्रयो** विबुधे स्मरे ।
आमिषाख्योत्कोचे मांसे **आजिर्यु**द्धे समावनौ ॥९३॥
आभोगो यत्ने पूर्णत्वे **आदृतः** सादरेऽर्चिते ।
आविद्धः कुटिले क्लिष्टे **आकृतिर्**देहरूपयोः ॥९४॥
आलोको दर्शने द्योत **आकल्पो** वेशकल्पयोः ।
आतङ्कस्तापे रुग्भीत्योराङभिव्याप्तिसीमयोः ॥९५॥
क्रियायोग ईषदर्थे **आस्तापे** क्रुधि चाव्ययम् ।
आराद्दूरे समीपे स्यादा तु स्मरणवाक्ययोः ॥९६॥

[इ]

इक्ष्वाकुः स्यात् कटुतुम्बीभूमिपालप्रभेदयोः ।
इन्द्राणी सिन्धुवारे तु शच्यां स्त्रीकरणान्तरे ॥९७॥
भवेदितिकथाऽपार्थवचोऽश्रद्धेयवाक्ययोः ।
इरिणं निराश्रये भूभागे **इरिणं** कथितमूषरे(?) ॥९८॥
इष्वासो विशिखक्षेपे **इष्वासं** धनुषि स्मृतम् ।
इला गवि च सौम्यस्त्री-भुवोर्वचनवारिणोः ॥९९॥
इष्टं यागे च तद्दाने वाञ्छिते च प्रयुज्यते ।
इरा वसुन्धरामद्यवचनेषु च वारिणि ॥१००॥
इन्द्रियं हृषीके शुक्रे **इन्द्रः** पुरन्दरात्मनोः ।
इतरः पामरेऽन्यस्मिन् इज्या याजनपूजयोः ॥१०१॥
इनः प्रभौ दिवानाथे **इष्टिर**ध्वरवाञ्छयोः ।
इति हेतौ प्रकाशादौ समाप्तौ प्रक्रमेऽव्ययम् ॥१०२॥

[ई]

ईहामृगो वृके रूपे **ईहा** तृषि समुद्यमे ।
ईश्वरेशौ प्रभौ रुद्रे **ई** दुःखे क्रुधि चाव्ययम् ॥१०३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[उ]

उपकारश्चोपकृतौ प्रकीर्णकुसुमादिके ।
भवेदुपनिषद्धर्मे रहोवेदान्तयोरपि ॥१०४॥
उदर्क उत्तरे काले तथोत्तरफले मतः ।
उन्माथः पाशयन्त्रे स्याद् वधे घाते च दृश्यते ॥१०५॥
उर्वरा सर्वशस्याढ्यवसुधायां क्षितावपि ।
भवेदुल्लिखिताभिख्या समुत्कीर्णे तनूकृते ॥१०६॥
स्यादुत्पतनमुत्पत्तौ तथोर्ध्वगमने मतम् ।
उत्थानमुद्गमे तन्त्रे पौरुषेऽङ्गन उद्यमे ॥१०७॥
उत्तरं श्रेष्ठे वाग्भेदे उदीच्यौर्द्धपरेषु च ।
उदारो महति ख्याते दानशौण्डे च दक्षिणे ॥१०८॥
उपासनं शराभ्यासे शुश्रूषायाञ्च दृश्यते ।
उपकुम्भं समीपे च निःशलाकेऽपि कीर्त्तितम् ॥१०९॥
उपगमोऽभ्युपगमे समीपगमने तथा ।
उदान उदरावर्त्ते वायुभेदे भुजङ्गमे ॥११०॥
उत्तंसः कर्णपूरे तु शेखरेऽपि प्रकीर्त्तितः ।
उपाधिर्धर्मचिन्तायां कुटुम्बव्याप्तावपि ॥१११॥
उद्यानं संग्रहे याने वनभेदे प्रयोजने ।
स्यादुद्धरणमुन्मूले संभुक्तोज्झित एव च ॥११२॥
उत्थितं प्रोद्यते जाते वृद्धिमत्यपि दृश्यते ।
उदास्थितश्च रुग्भेदे प्रतीहारे च सम्मतः ॥११३॥
उद्ग्राहितमुपन्यस्ते बद्धग्राहितयोरपि ।
उग्रः स्यादुत्कटे क्षत्राच्छूद्रापुत्रे त्रिलोचने ॥११४॥
उपग्रहो भवेद् वन्द्यामनुकूलित एव च ।
उपस्पर्शः स्थानाचान्योर्व्यवधौ स्पर्शनेऽपि च ॥११५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उचितो युक्ते ऽनुमते निश्चिताभ्यस्तयोरपि ।
उपप्लवोऽध्यासे राहावुत्पाते च प्रयुज्यते ॥११५॥
उपक्रमश्चिकित्सायामुपधारम्भयोरपि ।
उत्सवध्वनिरुत्सर्गे स्यादमर्षे व्रणेऽपि च ॥११६॥
उपाहितो वह्न्युत्पाते दृश्यते निहतेऽपि च ।
उद्घातः पादस्खलिते व्रताङ्गे समुपक्रमे ॥११८॥
उष्णीषं मुकुटे शिरोवेष्टने कथ्यते बुधैः ।
उपलब्धिर्भवेत् प्राप्तौ तथा ज्ञानमनीषयोः ॥११९॥
उपनाहो व्रणालेपपिण्डे वीणानिबन्धने ।
उन्मत्त उन्मादवति धुस्तूरे च प्रकीर्त्तितः ॥१२०॥
उडुम्बरो द्रुदेहल्योरुदूढः पृथुलोढयोः ।
उषा निशि तदन्ते स्यादुपोढो निकटोढयोः ॥१२१॥
उपरागः सङ्गे राहोरुदितं प्रोक्त उद्गते ।
उत्कलिकोत्कण्ठावीच्योरुपलः प्रस्तरे मणौ ॥१२२॥
उपधिर्व्याजे रथाङ्ग उरो वक्षसि सत्तमे ।
उत्कटः क्लीबोत्कटयोरुषः प्रत्यूषसन्ध्ययोः ॥१२३॥
उषितं व्युषिते दग्धे उदर्चिरुत्प्रभेऽनले ।
उत्सेध उन्नतौ काये उस्राख्या गवि दीधितौ ॥१२४॥
उद्धानमुद्गमे चुल्ल्यामुपस्थः क्रोडगुह्ययोः ।
उमाऽतसीहैमवत्योरुडुपो मेलचन्द्रयोः ॥१२५॥
उपतापो गदे तापे उत्सर्गस्त्यागदानयोः ।
उररी चोररी चोरी विस्तारेऽङ्गीकृतेऽव्ययम्* ॥१२६॥
उदक् काले देशदिशोरुदीच्ये स्यादनव्ययम् ।
उप हीनेऽधिके दृष्टमुत वाढविकल्पयोः ॥१२७॥

---

* "विस्तारेऽङ्गीकृतौ त्वयम्" इति भं० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[ऊ]

ऊर्णा स्याद् भ्रूमध्यलोम्नामावर्त्ते मेषलोमनि ।
ऊर्णायुरूर्णनाभे च मेषे च मेषकम्बले ॥१२८॥
ऊर्जः कार्त्तिकमासेऽपि तथोत्साहेऽपि भाषितः ।
ऊर्मिर्वीचावुत्पीडायामूतिः स्यूतौ च रक्षणे ॥१२९॥

[ऋ]

ऋषभो वृषभे शृङ्गयां शब्दात् परो वरे स्वरे ।
कर्णरन्ध्रे नकपुच्छे **ऋषि**ः स्यान्मुनिवेदयोः ॥१३०॥
*ऋक्षं नक्षत्रे ऋक्षः स्याद् भल्लुके शोणके द्रुमे ।
ऋतुः स्त्रीपुष्पवर्षाद्योः **ऋतं** सत्ये शिलोञ्छयोः ॥१३१॥

[ए]

एकाग्रमेकताने च स्यादनाकुल एव च ।
एकं श्रेष्ठाद्वयान्येषु **एनः** पापापराधयोः ॥१३२॥
एतः कर्बुर आयाते **एना**ऽभिधीयतेऽव्ययम् ।
एवं प्रकार औपम्ये **एवौ**पम्येऽवधारणे ॥१३३॥

[ऐ]

ऐरावतो नागरङ्गेऽभ्रेभ **ऐरावतं** हरेः ।
दीर्घज्वर**ऐरावती** विद्युद्भेदे च विद्युति ॥१३४॥

[ओ]

ओजोऽवष्टम्भवत[बल]योः प्रकाशे त्विषि चेष्यते ।
ओघशब्दः समाख्यातः समूहजलवेगयोः ॥१३५॥

[औ]

औषीरश्चामरे दण्डे **औषीरं** खापपीठयोः ।
औडुम्बरं भवेत्ताम्रे प्रसवे यज्ञशाखिनः ॥१३६॥

---

* भल्लूके शोणके ऋक्षो नक्षत्रे पुंनपुंसकम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[क]

कृष्णो वर्णान्तरे ध्वांक्षे विष्णौ व्यासे धनञ्जये ।
कृष्णा कणायां द्रौपद्यां **कृष्णं** मरिचलोहयोः ॥१३७॥
कुमारो युवराजे तु शिशौ स्कन्देऽश्ववारके ।
वरुणे **कुमारी** बालाजम्बुद्वीपौषधिषु च ॥१३८॥
कौतुकं विषयाभोगे मङ्गले च कुतूहले ।
विवाहसूत्र विख्यातः क्वचित् कामेऽपि दृश्यते ॥१३९॥
कल्यं दिनमुखे सज्जे **कल्यो** दक्षे च नीरुजि ।
कल्या कल्याणभाषायां मदिरायामपि क्वचित् ॥१४०॥
करणं कारणे काये साधनेन्द्रियकर्मसु ।
कायस्थे बालवादौ च नृत्यगीतप्रभेदयोः ॥१४१॥
क्रिया कर्मणि पूजायां निष्कृतौ सम्प्रधारणे ।
आरम्भोपायशिक्षासु चिकित्सारम्भयोः कृतौ ॥१४२॥
काण्डं बाणाम्बुनालेषु रहोविटपयोः क्षणे ।
तरुशाखावधौ गर्ह्ये रत्ने (गुल्मे?)स्कन्धे च शाखिनाम् ॥१४३॥
कूटो दम्भे समूहे च हलावयवयन्त्रयोः ।
अयोघनेऽद्रिशिखरे निश्चलेऽनृतमाययोः ॥१४४॥
कक्षो जन्तोरवयवे तृणकच्छलतासु च ।
कक्षा तु परिधानस्य पृष्ठतो विहिताञ्चले* ॥१४५॥
कालो मृत्यौ महाकाले समये यमकृष्णयोः ।
काली गौर्यां क्षीरकीटे मातृभेदे नवाम्बुदे ॥१४६॥
कला शिल्पे कालभेदे चन्द्रांशे कलनांशयोः ।
द्रव्यवृद्धौ **कलो**ऽस्पष्टमधुरनिस्वने तथा ॥१४७॥
कुहना दम्भचर्यायां मायायां **कुहरस्**तथा ।
†**कुहरं** गह्वरे कर्णे कण्ठशब्दो गलेऽन्तिके ॥१५८॥

* "कक्षो भित्तौ पापपार्श्वे दौर्मूले शुष्ककानने" इति भरतधृतः पाठः ।
† कुहरं सुषिरे दम्भे नागलोके ततेऽपि च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामः काम्ये निकामे स्यादिच्छायामथ मन्मथे ।
कामं स्वीकरणेऽसंख्ये काव्याख्या ग्रन्थशुक्रयोः ॥१४६॥
कर्णिका हस्तिहस्ताग्रेऽङ्गुलौ कर्णविभूषणे ।
सरोजबीजकोषे च कृती पण्डितयोग्ययोः ॥१५०॥
कोलं स्याद्वदरे कोलो वृक्षभेदे कलध्वनौ ।
कटित्रं चर्मभेदे च वीक्षितं कटिचर्मणि ॥१५१॥
ककुभोऽर्जुनवृक्षे स्यात् कुशे वीणाप्रसेवके ।
कल्पो न्याये विधौ शास्त्रे संवर्त्ते ब्रह्मवासरे ॥१५२॥
काष्ठा काले प्रकर्षे च मर्यादायां दिशि स्मृता ।
कलापः संचये बर्हे मेखलायाञ्च तूणके ॥१५३॥
कटकं वलये पुर्यां नितम्बे पर्वतस्य च ।
कुशी फाले च बल्गायां कुशो दर्भे कुशं जले ॥१५४॥
क्रूरो भयङ्करे दृष्टो नृशंसे कठिनेऽपि च ।
कटुस्तीक्ष्णे रसे गन्धे कटुकार्ये तु मत्सरे ॥१५५॥
कुशलं दीक्षिते क्षेमे समर्थे शिक्षिते स्मृतम् ।
केतनश्च ध्वजे काये निमन्त्रणनिवासयोः ॥१५६॥
ककुद्वत् ककुदं श्रेष्ठे वृषाङ्गे नृपलक्षणे ।
कम्बलः प्रावरे भेदे साम्नायां कम्बलं जले ॥१५७॥
करो हस्तांशुशुण्डासु प्रत्यये च घनोपले ।
करहाटोऽवस्कन्दे स्यात् करटं सप्रसूनके ॥१५८॥
कृत्यं विद्विषि कार्ये च कृत्या क्रियादिवौकसोः ।
कुलं सजातिसन्दोहे गोत्रे जनपदे गृहे ॥१५९॥
कल्पनं कर्त्तने क्लृप्तौ कल्पना गजसज्जने ।
कर्कशः कम्पिल्येऽपि स्यात् साहसिकेऽभये दृढे ॥१६०॥
कौशिकः पेचके शक्रे व्यालग्राहे च गुग्गुलौ ।
कायः कदैवते वृन्दे शरीरलक्षयोरपि ॥१६१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुलायः पक्षिणां स्थाने तेषामेव च सद्मनि ।
कञ्चुको वारवाणे च निर्मोके कवचेऽपि च ॥१६२॥
कुसुम्भो महारजने दृश्यतेऽथ कमण्डलौ ।
कूर्चः श्मश्रुणि दम्भे च भ्रुवोर्मध्ये विकत्थने ॥१६३॥
कणा मता तु पिप्पल्यां कणो धान्याङ्गलेशयोः ।
कोकटिको दाम्भिके स्याद् रूरे प्रेरितचक्षुषि ॥१६४॥
कुकूलं कल्यगर्त्ते च कुक्कूलस्तु तुषानले ।
कोणोऽस्त्री लगुडे दृष्टो वीणादेर्वादने तथा ॥१६५॥
कम्बुः शंखे च शम्बूके वलये च स्मृतः क्वचित् ।
कपोतः स्यात् पक्षिभेदे दृष्टः पारावते पुनः ॥१६६॥
कल्कं पापाशये पापे दम्भे क्लिष्टे च भाषितम् ।
कोष्ठः कुक्षौ कुशूले च मन्दिरावयवे निजे ॥१६७॥
कूलं तटे तडागे च स्तूपसैन्यनितम्बयोः ।
कर्णान्दुरुत्क्षिप्तिकायां कर्णपाल्यामपि क्वचित् ॥१६८॥
कुण्डली चिल्लमृगे सर्पकुण्डलधारिणोः ।
किल्बिषं दुरिते दृष्टं गरेऽपराध एव च ॥१६९॥
कारिका विवृतिश्लोके यातनायां तथा कृतौ ।
कलहंसस्तु कादम्बे राजहंसे नृपोत्तमे ॥१७०॥
कुम्भीलश्चौरे श्लोकादिच्छायायां शालमीनयोः ।
कुतपः कम्बले काले वाद्यभेदे च बर्हिषि ॥१७१॥
कण्टकः पादपाङ्गे च रोमाश्वक्षुद्रवैरिणोः ।
केतुश्चिह्ने पताकायामुत्पातेऽपि प्रयुज्यते ॥१७२॥
काचः शिक्येऽक्षिरोगे च मृद्विशेषेऽपि कीर्त्तितः ।
कुमुदं कैरवे ख्यातं कुमुदो दिग्गजे कपौ ॥१७३॥
कोकनदस्तु रक्ताब्जे कथितं रक्तकैरवे ।
कृतान्तो दैवे सिद्धान्ते यमाकुशलकर्मणोः ॥१७४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केवलं त्वेकके दृष्टं तथा कृत्स्ने ऽवधारिते ।
करेणुः करिहस्तिन्योः कर्णिकारेऽपि दृश्यते ॥१७५॥
क्रमुकः पट्टिकालोध्रे गुवाके ब्रह्मदारुणि ।
कोषः पेश्यां धने दिव्ये परिवारे च कुट्टने ॥१७६॥
कुलीनं स्यात् कुलीनत्वे प्राणिद्यूते जनोदिते ।
कार्मणं योगविद्यायां कर्मकारे कुपूरुषे ॥१७७॥
कीनाशः कर्षके दृष्टः कन्दर्पान्तकयोरपि ।
कान्ता स्त्रियां प्रियङ्गौ च कान्तः प्रियमनोज्ञयोः ॥१७८॥
केशरो वकुले दृष्टः पुन्नागे नागकेशरे ।
कलिङ्गाख्या शक्रफले धूम्याटे तिक्तकेशरे ॥१७९॥
किमीहाटकपुन्याश्च शालापलालयोः क्वचित् ।
कुञ्जरा पाटलायां स्याद् धातक्यां कुञ्जरे गजे ॥१८०॥
कूर्च्चिका तूलिकायां स्याच् शूचिपाङ्गुडकेषु च ।
कक्षपाल औपविके शुलापाले च कीर्तितः ॥१८१॥
कूपोऽन्धौ गुणवृक्षे च क्वचिद् गर्त्तेऽपि दृश्यते ।
कुल्याख्या जलप्रणाली-सरितोः कुलजेऽस्थनि ॥१८२
कलकण्ठः परपुष्टे दृश्यते कलवाचिनि ।
कौपीनं त्वपकार्ये च गुह्ये चीरे प्रभाषितम् ॥१८३॥
कक्ष्या साम्ये गजरज्जौ मेखलायां प्रकोष्ठके ।
कमठः कच्छपे दृष्टो भाण्डभेदेऽपि कुत्रचित् ॥१८४॥
काकोल्योषध्यां काकोलो द्रोणाकाके विषान्तरे ।
कङ्कणं कथितं सूत्रे मण्डले करभूषणे ॥१८५॥
कुषीदो जिगीषाशून्ये कुषीदं वृद्धिजीवने ।
कोटिरस्त्रौ प्रकर्षे च संख्याभेदेऽटनौ तथा ॥१८६॥
कीला कफोणिदेशेऽपि कीलः स्थाणवर्चिषोरपि ।
कदली मृगभेदेऽपि पताकामोचयोरपि ॥१८७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

প্রকাশিত হইল! প্রকাশিত হইল!

সুরভারতী

কলিকাতা বিশ্ববিদ্যালয়ের অধ্যাপক

শ্রীক্ষিতীশচন্দ্র শাস্ত্রী, এম. এ.

সম্পাদিত।

যাহার জন্য গ্রাহকগণ উৎকণ্ঠিতচিত্তে প্রতীক্ষা করিতেছেন, পত্রের উপর পত্র লিখিতেছেন, পাঠকমহাশয়গণের বড় আদরের সেই সুরভারতী এতদিনে প্রকাশিত হইল। প্রথমেই মঙ্গলাচরণরূপে ঋগ্বেদের সূক্ত ও তাহার বিশদ বঙ্গানুবাদ। তাহার পর সূচনার উদ্দেশ্য প্রভৃতি বিবৃত হইয়াছে, তাহার পর যিনি আজীবন উপনিষদের চর্চ্চায় সিদ্ধিলাভ করিয়াছেন সেই পণ্ডিতপ্রবর কোকিলেশ্বর শাস্ত্রী বিদ্যারত্ন, এম. এ. মহোদয়ের কঠোপনিষদের ভূমিকায় কঠোপনিষদের প্রতিপাদ্য বস্তু সুললিত ভাষায় বর্ণিত হইয়াছে, তাহার পর সম্পাদক-বিরচিত পাণিনি ব্যাকরণ শীর্ষক প্রবন্ধে পাণিনি, কাত্যায়ন ও পতঞ্জলির বিবরণ ও ভাষাতত্ত্বসম্বন্ধীয় তথ্যের আলোচনা আছে, তাহার পর পরলোকগত পণ্ডিতপ্রবর তারকনাথ স্মৃতিরঞ্জন মহাশয়ের মহাভারত-প্রসঙ্গ ও জ্যোতিষ-প্রসঙ্গ। স্মৃতিরঞ্জন মহাশয় পণ্ডিতপ্রবর পঞ্চানন তর্করত্নপ্রমুখ ব্রাহ্মণসভার প্রথম পাঁচজন প্রতিষ্ঠাতার একজন এই বলিলেই তাঁহার যথেষ্ট পরিচয় হইবে। তাঁহার পরম উপাদেয় প্রবন্ধে "সুরভারতী" গৌরবান্বিতা, এতদ্ব্যতীত রসগঙ্গাধর নামক অলঙ্কার-গ্রন্থের বিস্তৃত ব্যাখ্যা ও বিশদ বঙ্গানুবাদ প্রভৃতি প্রকাশিত হইতেছে। আজই গ্রাহক হউন।

বার্ষিক মূল্য দুই টাকা।

৬১এ, রামকান্ত বোস ষ্ট্রীট, বাগবাজার, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतपद्यवाणी

[सचित्रा विचित्रगद्यपद्यमयी त्रैमासिकी संस्कृतपत्रिका]

सम्पादकः—श्रीकालीपदतर्काचार्यः

अस्याः प्राप्तिस्थानम्—संस्कृतपद्यवाणीकार्यालयः

२।१ रामकृष्ण लेन, वाग्वाजार, कलिकाता।

—:०:—

एषा पत्रिका प्रतिवर्षं नियमेन चतुरो वारानात्मानं प्रकाशयति। अत्र विशिष्टशिष्टगोष्ठीसम्मता दर्शनकाव्यालङ्कारादिसम्बन्धिनो निबन्धाः, सुललिताः कविताः, पद्मबन्धादिचित्रकाव्यानि, यमकादिविचित्रपद्यानि, सुप्रसिद्धभाषान्तरीणगद्यपद्यमयकाव्यानुवादाः, बङ्गभाषासंस्कृतभाषयोस्तुल्यरूपा गाथा, बङ्गभाषादिप्रथितच्छन्दसा सुरचिताः संस्कृतकविताः, प्रहेलिकासमस्या-तत्पूरणादयः सामयिकवृत्त-ग्रन्थसमालोचनादयश्च विषया अनुरूपया सरलया मधुरया च संस्कृतभाषया प्रकटीक्रियन्ते। अन्तरान्तरा च प्रथितयशसां महाजनानां चित्राणि विचित्राणि चरित्राणि च प्रकाश्यन्ते।

इत्थमेषा पत्रिकान्तरविलक्षणैः संख्यातीतगुणगणैः समन्विता 'संस्कृतपद्यवाणी' स्वल्पमात्रकेणैव कालक्रमेण सहृदयानां सुप्रसिद्धपत्रिकासम्पादकानां परेषामशेषाणां विद्वज्जनानां संस्कृतप्रियाणां विद्यार्थिनाञ्च हार्दिकीं प्रशस्तिपरम्परामासाद्य सुतरां यशस्विनी संवृत्ता।

तदलं विलम्बेन। सर्वे संस्कृतवाणीप्रियाः सत्वरमस्या ग्राहकपदमङ्गीकृत्य समास्वादयन्तु संस्कृतभारत्याः सुदुर्लभप्रचारां विचित्ररसधाराम्, पत्रिकायामस्यामौदासीन्यवन्तो मा भूवन वञ्चिताः पुनर्महतां भोग्येन सौभाग्येनेति प्राप्तकालमावेदनम्।—

अस्या वार्षिकं मूल्यम्—साधारणग्राहकाणाम्—१।।० सार्द्धरूप्यकम्
सहायकानाम्—३) रूप्यकत्रयम्
परिपोषकाणाम्—५) रूप्यकपञ्चकम्

सहायकानां परिपोषकाणाञ्च नामानि यथाकालं नियमेन पत्रिकायां प्रकाश्येरन्। एतदधिकसाहाय्यदातारः 'समाश्रय'पदं लभेरन्।

विनीतनिवेदक—श्रीगोपालचन्द्रतर्कतीर्थस्य
(संस्कृतपद्यवाणीप्रयोजकस्य काशीस्थस्य)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073

Vol. XVIII, No. 1] [May, 1935.

१८५७ शकीये वैशाखे १८श-वर्षस्य १म-सङ्ख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, Shyambazar, Calcutta.

Printed at
CALCUTTA ORIENTAL PRESS
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Sanskrit Sahitya Parishad

(Registered under Act XXI of 1860)

The Sanskrit Sahitya Parishad is an academy of Sanskrit literature, established in Calcutta in 1916 for the cultivation and diffusion of Sanskrit learning and culture. It is a duly registered association.

(1) It arranges for meetings and disquisitions in Sanskrit.

(2) Holds regular classes in the old style.

(3) Awards stipends to deserving students of the attached *Tol*.

(4) Possesses a large library of printed Sanskrit books and rare manuscripts.

(5) Stages Sanskrit dramas.

(6) Conducts a Sanskrit monthly.

(7) Makes cheap publications of unpublished works in an up-to-date fashion.

The association started with *thirty* members, and during the last seventeen years the number has risen to more than one thousand, who hail from all parts of India. It has been receiving Government and Corporation grants.

Privileges of a Member :

A member (1) is generally invited to all functions, (2) witnesses dramatic performances, (3) uses the books of the Parishat Library. (4) gets a monthly Sanskrit journal free and (5) receives the publications at concession rates.

The subscription of a member is not less than *three rupees* a year, *which should be paid in advance*.

—·—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"भारते भातु भारती"

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता।
१८५७ शकाब्दे
सौराषाढस्य षोडशदिवसः।

सबहुमानमावेदनम्—

महोदयाः, आगामिनि सौराषाढस्य षड्विंशदिवसे गुरुवासरे सायं सप्तवादनतः परिषदो वर्त्तमानवर्षीयं मासिकाधिवेशनमेकं भविता, तत्र भवतां समुपस्थितिः साग्रहं प्रार्थ्यत इति।

विनीत—
श्रीअमरेश्वरठाकुर-वेदान्तशास्त्रिणः
श्रीयतीन्द्रनाथ-वसुजस्य च
सम्पादकयोः।

आलोच्यविषयाः—

१। विगताधिवेशन-कार्य्यविवरणपाठः।
२। नूतन-सभ्यनामप्रचारः।
३। निबन्धयोः पाठः—
(क) क्षमा इति शीर्षकस्य
निबन्धकः—श्रीयुक्त-कालीपद-काव्य-व्याकरणतीर्थः
(ख) नव्यन्यायविवरणम् इति शीर्षकस्य
निबन्धकः—श्रीयुक्त-विधुभूषण-काव्यतीर्थः
४। विविधाश्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

May, 1935. | १८५७ शकीये वैशाखे १८श-वर्षस्य १म-संख्या | Vol. XVIII No. 1

महाकोसलप्रशस्तिकार-कविकदम्बकीर्तनम्

[निबन्धकः—एल् पाण्डेयशर्मा]

चित्रोत्पलाचुम्बितचारुदेशे श्रीकोसले स्वर्णपुरे च रम्ये ।
ये कोविदाः सत्कविवृन्दयुक्ताः सन्ति स्म तेषामिह कीर्तिगानम् ॥

ईशानः (चिन्तातुराङ्कः)

Circa 700 A. D.

ईशानः[1] कविराजपण्डितरविर्बालार्जुनख्यातिदः
श्रील-श्रीपुरगर्वगौरवशशी चित्रोत्पला-चारणः ।

---

1 ईशानः lived at Sripur—the capital of Mahakosala. He has immortalised महाशिव बालार्ज्जुन son of queen Vāsatā, who was the daughter of श्रीसूर्यवर्म्मा.

"इति वः प्रशस्तिकारः कविः स चिन्तातुराङ्क ईशानः ।
यत्पालकार्थमर्थयति पार्थिवास्तां स्थितिं शृणुत ॥"

Epi. Ind. Vol XI. The Sripur stone inscription of Mahā-Śiva Gupta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भट्टभास्करः

Circa 700 A. D.

भट्टाख्यः श्रुतिमान् मनीषितिलको धीभास्करो **भास्करो**[2]
यस्य श्रीभवदेवराजकमलं दिव्यैः करैः कान्तिमत् ॥

श्रीकृष्णदण्डी

Circa 700 A. D-

वैद्य**श्रीकृष्णदण्डी**[3] कुशलकविवरः सज्जनः शम्भुभक्तः
काव्यानन्दप्रमत्तो हरचरितरसास्वादने दत्तचित्तः ।

कोसलेन्द्रः ययातिराजदेवः

Circa 800 A. D,

भूपालः कोसलेन्द्रो विधुकुलतिलकः **श्रीययातिः**[4] प्रसिद्धः ।
वाग्देवीपादसेवी बुधसुजनसखः श्रीकलिङ्गत्रयीशः ॥
महानदीमण्डितमञ्जुभूमौ
पुरे विनीताभिध आदिपीठे ।
ताम्रे प्रशास्तिं विशदां चकार
श्रीकोसलेन्द्रो नृपतिर्**ययातिः** ॥

---

2 *J. R. A. S.* 1905 p. 624.

सद्वर्णां जातिसुभगा विद्वन्मधुकरप्रिया
कृता भास्करभट्टेन प्रशस्तिः स्रगिवोज्ज्वला ॥

Inscription of Bhavadeva Ranakesarin.

3 *The Indian Antiquary*—June 1889,

प्रशस्तिमतनोदेतां वैद्यश्रीदेवदण्डिनः ।
श्रीकृष्णदण्डी तनयो नयप्रणयकेतनम् ॥

Sripur Inscription of Śiva Gupta (Bālārjuna) giving his genealogy.

4 प्रणीतं कोसलेन्द्रेण प्रतिबोध्य महत्तमम् ।
श्रीदत्तपुण्डरीकाक्षः शासनं ताम्रनिर्मितम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्रोत्पलाचरणचुम्बितचारुभूमौ
पुर्य्यां कलिङ्गविषयेषु **ययाति**नाम्न्याम् ।
ताम्रे चकार रचनां नृपतिर्**ययातिः**
श्रीकोसलेन्द्र इति नामयुतः प्रसिद्धः ॥

श्रीसिंहदत्तः

Circa 800 A. D.

भूपो भीमरथो महाभवयुतो गुप्ताभिधान्तो वर
आस्तेऽत्यन्तसुखे ययातिनगरे चित्रोत्पलाचुम्बिते ।
यस्य क्ष्मापरिपालने नयगुणे सोऽयं महाकोसले
प्रख्यातो धृतसान्धिविग्रहपदः श्री**सिंहदत्तः**[5] कृती ॥

सुमङ्गलदत्तः

Circa 800 A. D.

वन्द्यो दत्त**सुमङ्गलः**[6] सुनिपुणः श्रीतारदत्तात्मजो
यस्मै कीर्तिमदात् सुमञ्जुलशिलालेखः शिवस्यालये ।

श्रीनारायणः

Circa 1200 A. D,

"श्रीरामाभ्युदयाभिधं रसमयं काव्यं" कृतं येन वै
[7]श्री**नारायण**सत्कविर्विजयते गोपालवीरप्रियः ॥

---

5 Katak Plates of the 3rd year of Mahābhava-Gupta II —Bhaimratha. *Epi. Ind.* III. p. 355.

येनात्यन्तसुरासुराधिपगुहः प्रज्ञाभिमानैर्जितो
राज्ञा रोपितराज्यभारमतुलं यश्चावहल्लीलया ।
यस्यासीन्नयविक्रमद्वयमपि(?) प्रेयान् सखा सर्वदा
स श्रेयान् धृतसान्धिविग्रहपदः श्रीसिंहदत्तः कृती ॥

6 श्रीतारदत्ततनयः प्रथितः (पृथिव्यां)
श्रीमान् सुमङ्गल इमामकरोत्प्रशस्तिम् ॥

Sripur Gandharveswar temple inscription No. 3. C. P. Inscription p. 98.

7 श्रीवज्रश्चरणाब्जपूजनमतिर्नारायणः सत्कविः
श्रीरामाभ्युदयाभिधं रसमयं काव्यं सतद्यो व्यधात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गन्धर्वेश्वरपादपद्मजसुधासक्तेन वै केनचिद्
दिव्ये धाम्नि सदाशिवस्य रुचिरे काव्यं कृतं प्रस्तरे ।
मालापुष्पसुगन्धचन्दनसमा शब्दावली निर्मला
स्वानन्दं वितनोति सत्कविकुले श्रीकोसले श्रीपुरे ॥
रेवातटे रत्नपुरे च रम्ये तुम्माणराज्ये तलहारिमण्डले ।
महानदी-वारिविधौतदेश एते पुरा सत्कवयो बभूवुः ॥

अल्हणकविः (हैहय-काल)

Circa 1000 A. D.

गर्गेश्वरः सुकविरल्हण[8] ईशभक्तस्-
तुम्माणदेशपतिराजसभाप्रधानः ।
बङ्केश्वरस्य गुणकीर्त्तनपुण्यधामा
विद्यानिधिः सकलकोसलकाव्यचन्द्रः ॥

कीर्तिधर-वत्सराज-धर्मराज
मामे-रत्नसिंह-सुरगण-(देवगण)

विद्वान् श्रीवत्सराजो[9] नृपतिगुणकथागायकः कीर्ति-सूनुस्
तत्पुत्रो धर्मराजो[9] निपुणकविवरश्चन्द्रचूडस्य भक्तः ।

स्मृत्यारूढयदीयवाक्यरचनाप्रादुर्भवन्निर्भर-
प्रेम्णोद्भासितचित्तवृत्तिरमुचद् वाग्देवता वल्लकीम् ॥

Prijaripali inscription of Gopāla (vīra) Deva *C.P. inscription* p. 181.

8 Amoda Plates of the Haihaya King पृथ्वीदेव (प्रथम) *Epi. Ind.* Vol XIX p, 81.

गर्गेश्वरः सुकविरल्हण ईशभक्तस्ताम्रे चकार रचनां × × × ॥

Epi. Ind. Vol. XIX pp. 75-81.

9 वास्तव्यवंशकमलाकरचित्रभानुः
शत्रुप्रवीरविकलेन्धनचित्रभानुः ।
श्रीवत्सराजतनयः खलु धर्मराजो
जंडेरनाथ इह ताम्रमिदं लिलेख ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मामे[10] नाम्ना कवीशः सुरगणजनको **रत्नसिंहो**ऽस्य पुत्रः
ख्यातो वास्तव्यवंशो नृपवरसदसि प्राप्तमानो मनीषी ॥
श्रीमान् सहस्रार्ज्जुनवंशदीपः
[11]**कुमारपालः** सुकवि-प्रधानः ।
महानदीवारि-विलास-मुग्धो
महागुणज्ञो भवभूतिभक्तः ॥
विद्यानिधिर्ग्रामपतिर्मनीषी
चण्डीशपादाम्बुजचञ्चरीकः ।
प्रासादकारः शशिशेखरस्य
धन्योऽस्ति यः कोसल-काव्यरत्नम् ॥

Amoda Plates of Jajalladeva II *Epi. Ind.* Vol XIX,

10 तस्यामेवानर्घवल्ल्यां श्रीमत् कीर्तिधरः सुधी-
र्जंडरग्रामनाथोऽयं लिलेखाक्षरशोभनम् ॥
ज्यायान् पण्डितपुण्डरीकतरणिर्मामेऽभिधानोऽभवत् ।

11 श्रीमामे तनयः समस्तजगती × × ×
शीलाचार्यविवेकपुण्यनिलयः श्रीरत्नसिंहः कविः ।
निःशेषागमशुद्धबोधविभवः काव्येषु यो भव्यधीः
सत्तर्काम्बुधिपारगो भृगुसुतो यो दण्डनीतौ मतः ।
छन्दोलङ्कृतिशब्दमन्मथकलाशास्त्राब्जचण्डद्युति-
श्चक्रे देवगणः प्रशस्तिममलां श्रीरत्नसिंहात्मजः ॥

Epi. Ind. Vol. I p. 45.

इयं सहस्रार्जुनवंशजेन
कुतूहलात् क्षत्रियपुङ्गवेन ।
कुमारपालेन गुणाभिरामा
रामेव रम्या रचिता प्रशस्तिः॥

Causen's Progress Report, Chedi era 919. 1904.

दक्षो लक्षणनिर्णये कविकला सर्वत्र विद्याप्रभु-
श्छन्दःसुन्दरबुद्धिरङ्कुतमतिः साहित्यचाणक्ययोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिभुवनपालः

(Chedi era 915)

[1][2]**त्रिभुवनपालः** सुकविमरालः कीर्तिविशालः सुकविदले।
सुकृतिरसालोऽर्चितशशिभालो जितभवजालो भूमितले ॥

देवपाणिः नृसिंह दामोदरमिश्र

1200 A.D.) (Saka 1114 = 1191 A.D.) (सं 1470 विक्रम = 1415 A.D).

[13]**श्रीदेवपाणि** र्बुधवृन्दवन्द्यः
श्रीमान् [14]**नृसिंहो** रचनाललामः।
प्रशस्तिकारः कवितारसज्ञो
[15]**दामोदरा**ख्यो हरिभक्तिपूतः ॥
ख्यातो हैहयवंश-भूः कविवृषा यस्यानुजो जन्हुवां-
स्तेनाकारि कुमारपालकृतिना श्रेष्ठा प्रशस्तिर्मुदा ॥

Indian Antiquary Vol XXII, p. 82
Kharoda Inscription, chedi era 930.

12 घनरसमयीं गभीरां शुभ्रतरां विचाररमणीयाम्।
सरसीमिव प्रशस्तिं त्रिभुवनपालो व्यधाद्विबुधः ॥

Ratnapur Badal Mahal Inscription.

13 धीमानिमां कमलिनीमिव देवपाणिः
सद्भृङ्गभोग्यसुभगां विबुधैकरम्याम्।
वर्णोत्तमां कविकदम्बमनःप्रमोद-
विस्तारिणीं रसमयीमकरोत्प्रशस्तिम् ॥

Causen's Progress Report

14 चतुर्दशोत्तरे सेयमेकादशशते शके
वर्द्धतां सत्वतो नित्यं नृसिंहकविना कृता ॥

Epi. Ind. Vol. X

15 हरिचरणसरोजध्यानपीयूषसिन्धुः
प्रसरदलघुवेला स्फारकेलीरसेन।
सरसकविजनानां निर्मितेयं प्रशस्ति-
र्मनसि रसनिधात्री मिश्रदामोदरेण ॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भामिन्या मदनतापः

[निबन्धकः—क० रा० शङ्करनारायणशास्त्री]

हा हन्त ! मद्विधिरपि किमेवं स्यात्। मत्तातो माम् अतिवात्सल्येन पोषयामास। तथापि किं धनाशया मां पञ्चाशद्वर्षीयाय अस्मै वृद्धाय स दिदेश मत्पिता। नवीनविनयस्य (civilization) अज्ञानेन यद्यहं युवतिदशाम् आप्नुवाना भवेयम्, तर्हि मञ्जूषास्थसर्प इव निरुद्धगतिः स्याम्। पिताऽपि नवीनविनयानुरोधेन मां पुपोष। परिणीतोऽपि वृद्धो मां स्नेहेनैव वीक्षते अनुपालयति च। तथापि किं फलम्। समुचितां दशां प्रपन्नाया मे मदनावस्थां शमयितुं न स पारयति। अभीष्टं तु मेऽन्यत्सर्वं साधयति। युवतेस्तु मादृश्याः पतिरेवानुरूप आवश्यकः, न धनम्। दरिद्रोऽपि स्वभार्यायां प्रियायाम् अतीव स्निह्यत्येव। तस्माद् यदा प्रियामदनतापशमनाय प्रभवति भर्ता, तदैव प्रियायाः सुखं नान्यथा। तमेव पुमांसं सा वाञ्छति। तद्विहीनं कमपि पुरुषं किल मां प्रापयामास मत्तातः। इति काचन योषित् मद्रपुर्यां सुवर्णशालावीथ्यां कस्मिंश्चिद् गृहे स्वगतमेव ब्रवीति ॥

इयं हि नारी अष्टादशवयस्का, पाश्चात्यदेशीयविनये मग्ना। सा एकैव पुत्री तत्पितुः। स्वदुहितरि प्रणयेन स कस्मैचिद् अधिकृताय पुरुषाय दित्सुः चतुश्चत्वारिंशद्वर्षीयाय वृद्धाय ददौ तां सुन्दरीं कन्याम्। स च गोपालो भामिनीमिमां परिणीय रूप्यकाणां पञ्चशतानि मासिकवेतनत्वेन गृह्णनः सुखम् अवात्सीत् सुवर्णशालावीथ्याम्। भामिनी च स्वस्य पत्या सह पञ्चषाणि संवत्सराणि वसन्त्यपि, तद्भर्त्रा सावधानं पोषिताऽपि, अभीष्टकार्यसंपादनेन भृशं तेन अनुरञ्जिताऽपि, गार्हस्थ्यसुलभं न सुखमनुबभूव। एवं सा विरहिणी सुखम् अलभमाना मदनतापावासस्थानं भूत्वा उन्मादावस्थासन्निहिता भवितुमारभत ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ सा एकस्मिन् दिने प्रातः स्वगृहे स्वाङ्गने स्वावस्थां प्रति चिन्तयन्ती दुःखिता। तदा यदृच्छया सा यावत् शिर उत्क्षिप्य पश्यति, तावत् पुरस्स्थितस्य गृहस्य कस्मिंश्चिदङ्गने कश्चित्पूरुष एकविंशतिवयस्कः पाश्चात्त्यविनयेषु कुशलः पश्यन्तीनां कन्यानां मन आवर्जयन् कस्मिंश्चित् आसने चतुष्पदि उपविशन् आत्मानं सम्यक् आपादकेशं पश्यन् दृष्टस्तया सुश्रोण्या। तस्य रूपमीक्षमाणा सा मुमोह। तथापि सा बाला किं कुर्यात्। कथं कथमपि स्वकार्याणि कर्तुम् अङ्गनान्तरं प्रविवेश। सैव तदङ्गनान्निश्चक्राम, न तस्या मनः। तत्तु तदङ्गनमेव जगाहे। एवं कियन्तंचन कालं तत्र स्वकार्याणि कुर्वती समास्त। "पुनरपि तदङ्गनं प्राप्य स युवा अस्ति वा न वेति द्रष्टव्यमि"ति औत्सुक्याविष्टा सा स्वमनो नियन्तुमशक्ता उत्थाय तदङ्गनं प्राप्य यदा पश्यति, तदा स युवा तत्र नादृश्यत ॥

हन्त! स हि अर्धघण्टापर्यन्तं तत्र एनां प्रतिपालयन् स्थितः। अत ऊर्ध्वं सा न आगमिष्यति इति अतीव मदनातुरः सव्यथः कार्यान्तरं द्रष्टुं गतः। तस्य च नाम कामपालः। स च विश्वकलाशालाविद्यापेक्षी तत्र आगतः। तद्गृहाङ्गनं भाटकार्थं सः अगृह्णात्। तत्पित्रा च तस्याऽऽवश्यकं धनं प्रतिमासं प्रेषितम्। तेन च सः अतिसुखानि अनुभवन् विद्याश्चाभ्यस्यन् आसीत्। अतिरूपलावण्यशाली स पुरोगृहस्थितभामिनीदृशां जानन् "ध्रुवं स्वलावण्यमोहिता सा स्ववशम् आगत्य सुखं दद्यात्" इति चिन्तयन् आसीत्।

ततः परेद्यवि तस्मिन् कामपाले स्वाङ्गने आसने उपविश्य पुस्तकं पठति भामिनी स्वाङ्गनं प्राप्य तं पश्यन्त्येव गवाक्षद्वारा मन्दस्मितम् अकरोत्। उभयोरपि नेत्रे परस्परमभाषेताम्। एवं पञ्चषाणि दिनानि व्यतीतानि। एकस्मिन् दिने स्वाङ्गने पुस्तकं पठन् स कामपालः केनापि आहूत इव परावृत्य यावत्पश्यति, तावदेव भामिनीकिङ्करीं तया प्रक्षिप्तां काखल-(paper) पत्रिकां च वीक्षते स्म। तस्यां च पत्रिकायां विवृत्य दृष्टायाम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं लिखितम् अवर्तत। स्वस्ति। प्रिय! सादरं विज्ञापयामि। कमपि वृद्धं परिणीय शोचामि। न हि जानातु न मम दशां भवान्। मदर्थमेव दैवेन भवान इहानीतः इति च मन्ये। तत् मदभीष्टम् आशु निर्वर्तय। मा निराकरोः मत्प्रार्थनाम्। यथाप्रार्थनम् अस्यामेव रात्रौ एकादशघण्टात ऊर्ध्वम् आरामं मे यद्यागच्छसि, तर्हि त्वां प्रतिपालयन्त्या मे सुखं वितीर्य भवानपि अतिसुखं लभेत इति॥

प्रथमं स किंचिदिव बिभाय। "मातृवत्परदारेषु मतिः कार्ये"ति हि शास्त्रज्ञाः। तथापि यदि सा स्वयमेव मदनातुरा माम् इच्छति, तदा तन्निराकृतिः पापायैव न श्रेयसे इति मन्वानः तस्यामेव रात्रौ एकादशघण्टासमये कामपाल आत्मानम् अनुकूलवेषेण अलङ्कृत्य पुरस्स्थितोपवनसकाशं प्राप्तः। तत्र यथासंकेतं कवाटम् अपिनद्धम् अवर्तत। अन्तश्च गत्वा तत्र कस्यांचित् मञ्चशय्यायाम् आसीनां तं प्रतिपालयन्तीमेकाकिनीं भामिनीं प्राप्य, तेन च प्रत्युद्गता क्षणं तत्र मञ्चे उभावपि उपविविशतुः। तं निशाम्य दरिद्रो निधिं प्राप्येव सा तुतोष। तुष्टश्च स यावत् तां समाश्लिष्यत्, तावदेव स वृद्धः स्वभार्यां शय्यायां स्वसमीपे अपश्यन् अनपगतनिद्र एव उद्यानसमीपमागतः। कामपालेनालिङ्गितां तां भामिनीमीक्षमाणः स स्थविरः कामपालं बहुभिः कटुभिर्वाग्भिर्निन्दित्वा तां प्रत्यपश्यत्। कामपालश्च तत्क्षणमेव पलायामास। वृद्धश्च स्वभार्यां तदा न अनिन्दत्। प्रत्युत ततः प्रभृति तस्याम् अतिस्नेहं बबन्ध।

"मत्कृतेऽयं किं किं न साधयति। यद्येवम, मया किमिति अल्पं मदनसुखं न परित्याज्यम्" इति मन्वाना ततः प्रभृति शुद्धा पतिव्रता परस्मिन् जन्मनि तमेव नायकं युवानं लब्ध्वा सुखमन्वभूत्। अत एतत्सिद्धं—'वृद्धस्य अतियवीयसी कन्या न देया" इति॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मालतीमाधवे नायकचरितम्

[निबन्धकः—श्रीशिवशङ्करशास्त्री]

पूर्वरागः

(पूर्वतोऽनुवृत्तिः)

कामन्दकीनीतिः

नगरोपकण्ठे संस्थापितशिवमन्दिरे मालतीमाधवयोर्मेलनं कारयिष्यति, विवाहार्थिनो नन्दनस्य च कथञ्चिदाशापूरणाय मकरन्दं मालतीवेशेन तत्समीपे प्रेषयिष्यतीति मालतीशुभार्थिन्याः कामन्दक्याः सङ्कल्पः।

गूढरहस्यमिदं साधयितुं कामन्दकी नन्दनेन सह मालत्याः परिणयात् प्राग् मालत्या नगरदेवतायाः पूजाविधानार्थं मङ्गलालंकृतां विवाहश्रीसमुज्ज्वलां तामादाय लवङ्गिकाद्वितीयोपस्थिता। भगवत्याः सङ्केतक्रमेण माधवमकरन्दौ पूर्वमेव मन्दिरमागतौ। न कोऽपि भगवत्या गूढरहस्यं भेत्तुं समर्थः। प्रणयिनोरद्यावस्थाऽतीव मर्मस्पर्शिनी, उभावेव भगवत्या नीतिमधिकृत्य प्राप्तसंशयौ।

माधवो वयस्यमवादीत्—सखे!

मालत्याः प्रथमावलोकनदिनादारभ्य विस्तारिणो
भूयः स्नेहविचेष्टितैर्मृगदृशो नीतस्य कोटिं पराम्।
अद्यान्तः खलु सर्वथाऽस्य मदनायासप्रबन्धस्य मे
कल्याणं विदधातु वा भगवती नीतिर्विपर्येतु वा॥

मकरन्दस्तमाश्वास्याभणत्—वयस्य! कथं हि भगवत्याः सुमेधसो नीतिर्विपर्ययमेष्यति। इयं हि माधवस्य मनोऽवस्था।

मालती तु स्वमनसि चिन्तयाम्बभूव—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केन उण उवाएण सम्पदं मरणनिव्वाणस्स अन्तरं सम्भावइस्सं ? मरणंपि मन्दभाअहेआणं अहिमदंत्ति सुदुल्लहं होदि ।'

* * *

'किं दाणिं दारुणसमारम्भदेव्वदुव्विलासपरिणामदुःखणिद्दड्ढमानसं पुणो पुणोवि मम्मच्छेअदूसहं मन्दभाइणिं दुणोसि ।'

उभयोरेव हृदयं परस्परप्राप्तिविषये मोघाशं बभूव। नाटकान्तरे दृश्यते यत्, यदा नायिका नायकप्राप्तिविषये भग्नाशा भवति तदा सा उद्बन्धनेनोपायान्तरेण वा प्राणान् हातुमिच्छति। अत्र गत्यन्तरस्यासद्भावाद् मालती माधवश्च द्वावेव स्वस्वप्राणान् त्यक्तुं कृतसङ्कल्पौ जातौ। अनयोर्मेलनपथे बहवो विघ्ना विद्यन्ते, इति कविना दर्शितम्।

यस्तु दुःखेन लभ्यते तस्यादरोऽपि महान्।

अत्रान्तरे पेटकहस्ता प्रतीहारी प्रविश्य कामन्दकीमवादीत् "अमच्चो भअवदिं विण्णवेदि एदिणा णालन्दानुप्पेसिदेण विवाहणेवच्छेण देवदापुरदो अलङ्करिदव्वा मालदित्ति"।

काम। युक्तमाह अमात्यः मांगलिकमेतत् स्थानम्, अतो दर्शय।

प्रती। इदं दाव धवलपट्टंसुअजुअलं इदं च उत्तरोअं रत्तवणासुअं इमे अ सव्वंगिआ आहरणसंज्ञोआ, अअं च मोत्तिअहारो एदं चन्दणं कुसुमावीडो अ।

काम। [अपवार्य] रमणीयं हि वत्सकरन्दम् अवलोकयिष्यति जनः। [प्रकाशम्। गृहीत्वा] भवतु ओम् इति उच्यताममात्यः।

अत्र पुरा किम्भूतो विवाहपरिच्छद आसीत्तन्महाकविर्मालत्या विवाहवेशवर्णनप्रसंगेन दर्शितवान्।

सम्प्रदानम्

विविक्ते अलङ्करणरत्नानां शास्त्रतः प्राशस्त्यपरीक्षणाय कामन्दकी प्रस्थिता। गतायाश्च तस्यां मालती लवंगिकासहचरी मन्दिरं प्रविवेश। माधवमकरन्दौ तु स्तम्भापवारितशरीरावतिष्ठताम्। अत्र महाकवि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्नायिकाविलापं नायकं श्रावयति स्म। स्वप्रणयिन्या विलापं शृण्वतो माधवस्य प्रावर्त्ततााश्रुधारा। पूर्वतोऽपि बबन्ध चाधिकां प्रीतिं मालतीसंगप्राप्तौ। तस्या रोदनं श्रुत्वा पस्पर्श ततक्षणादेव दुःखासिका माधवस्य हृदयम्। स मकरन्दमुवाच—सखे!

म्लानस्य जीवकुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि।
आनन्दनानि हृदयैकरसायनानि
दिष्ट्या मयाऽप्यधिगतानि वचोऽमृतानि॥

यद्यपि स प्रियाविलापश्रवणेन नितरां दुःखायमानोऽवर्त्तत तथापि तद्दुःखमानन्दमिश्रितं नाभवदिति न।

तथाहि माधवः—

नैराश्यकातरधियो हरिणेक्षणायाः
श्रुत्वा निकामकरुणञ्च मनोहरञ्च।
वात्सल्यमोहपरिदेवितमुद्वहामि
चिन्ताविषादविपदञ्च महोत्सवञ्च॥

अधुना तु महाकविना भवभूतिनोपायविशेषावलम्बनेनानयोर्मेलनं संघटितम्। उपायं तावत् पश्यन्तु भवन्तः।

लव। अइ! पडिहदं दाणिं दे अमंगलं न अदोवि अधिअदरं सुणिस्सं।

माल। सहि, पिअं क्खु तुम्हाणं मालदीजीविदं न उण मालदी।

लव। किं एव्वं भणिदे होदि।

माल। [आत्मानं निर्दिश्य] जेण अणज्जणपच्चासणिवन्धणेहिं वअणसंविहाणेहिं जीआविअ इमं जेव्व महाबीभच्छारम्भं अनुभाविदम्हि। सम्पदं उण मम मणोरहो एसो ज्जेव्व जं तस्स देवस्स परोक्खगुणकित्तणेण अत्तवरद्धं अत्ताणं परिच्चइस्संत्ति, ता, इमस्मिं पओअणे पिअसही मे अपरिपन्थिणी होदु (इति पादयोः पतति)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लव । [माधवं संज्ञया समाह्वयति]

मक । वयस्य ! उपसृत्य लवंगिकायाः स्थाने तिष्ठ ।

माध । वयस्य ! परवानस्मि साध्वसेन ।

मक । इयमेव नेदीयसी प्रकृतिरभ्युदयानाम् ।

माध । [स्वैरं लवंगिकास्थाने तिष्ठति]

माल । सहि ! करेहि अणुऊलदाए पसादं ।

माध । सरले, साहसरागं परिहर, रम्भोरु ! मुञ्च संरम्भम् ।
विरसं विरहायासं सोढुं तव चित्तमसहं मे ॥

माल । सहि ! अलंघणीओ जेव्व दे मालदीप्पणामो ।

माध । (सहर्षं) किं वा भणामि विच्छेददारुणायासकारिणि ।
कामं कुरु वरारोहे ! देहि मे परिरम्भणम् ।

माल । [सहर्षम्] कधं अणुग्गहीदम्हि । [उत्थाय] इअमालिंगामि । दंसणं उण पिअसहीए वापुफोपीडेन निरुद्धं पच्छिमं न लम्भीअदि । [आलिंग्य सानन्दम्] सहि ! कठोरकमलगव्भपह्मलो अण्णारिसो जेव्व दे अज्ज निव्वावेदि मं सन्तप्पमाणं प्रियसहीए सरीरप्फस्सो ।

* * * * *

तुएवि पिअसहीए सव्वदा सुमरिदव्वम्हि । एसा अ सिरिमाहवसहत्थनिम्माणमणुहरा वउलमाला मालदीजीविदनिव्विसेसं पिअसहीए दट्ठव्वा सव्वधा हिअए धारणीए त्ति ।

[स्वकण्ठादपनीय माधवस्य हृदि विन्यस्यन्ती सहसा अपसृत्य साध्वसोत्कम्पं नाटयति] तदा—

माध [अपवार्य] हन्त !

एकीकृतस्त्वचि निषिक्त इवावपीड्य
निर्भुग्नपीनकुचकुड्मलयाऽनया मे ।
कर्पूरहारहरिचन्दनचन्द्रकान्त-
निष्यन्दशैवलमृणालहिमादिवर्गः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माल [स्वगतम्] अहो ! लवंगिआए मालती विप्पलद्धा !

भवभूतिनाऽवलम्बितोऽयमुपायोऽतीव रमणीयः। स्थानञ्चात्यन्तं पुण्यम्। सरसरमणीयं च संविधानम्।

मालत्या गाढालिंगनप्राप्तिसुखं यन्माधवोऽनुभूतवांस्तत् खलु सर्वथाऽनिर्वचनीयम्।

इदमेव सुखं सीतासंस्पर्शाद्रामस्याप्यभूत्। तथाचोत्तरचरिते—

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति समुन्मीलयति च ॥

अपि च—

प्रश्च्योतनं नु हरिचन्दनपल्लवानां
निष्पीडितेन्दुकरकन्दलजो नु सेकः।
आतप्तजीवनमनःपरितर्षणो मे
सञ्जीवनौषधिरसो नु हृदि प्रसिक्तः ॥

अपि च—

स्पर्शः पुरा परिचितो नियतं स एष
सञ्जीवनश्च मनसः परिमोहनश्च।
सन्तापजां सपदि यः प्रतिहत्य मूर्च्छा-
मानन्दनेन जडतां पुनरातनोति ॥

मालतीजीवनरक्षाकाले यत् तस्या आलिङ्गनदानं तत्तु भयात्, अधुना प्रतारिता साऽलवङ्गिकाबुद्ध्या उपगुह्यातीव लज्जिताऽभवत्। स्वगतञ्चावादीत्—

'हा हद्धी हद्धी हदम्हि, कण्णआअणविरुद्धं किम्पि एसा उवण्णस्सदि।'

इदानीं तु पाणिग्रहणमवशिष्यते। लवङ्गिकयोक्तम्—'महाणुहाव! हिअए वि अप्पडिहदसअंगाहसाहसो अअं जणो, किं दाणिं करग्गहणे विआरेदि।' तदा कामन्दकी प्रविश्य—'पुत्रि! कातरे किमेतत्?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपस्थितोऽयं युवा माधवोऽत्र। मुञ्च जडताम्, अमात्यभूरिवसोरेकमपत्यरत्नं मालती भगवता सदृशसंयोगरसिकेन वेधसा, मन्मथेन मया च तुभ्यं प्रदीयते इत्युक्त्वा प्रदत्ता मालती।

अस्मिन् प्रकरणे प्रणयचित्रं विविधभावेन चित्रितमपि न कुत्रापि संस्पृशत्यशुद्धभावम्। स्वयं प्रबुद्धप्रणयो यया दिशा वर्ण्यते तया दिशैव वर्णितं महाकविना। प्रणय एवास्य प्रकरणस्य वर्णनीयविषयतामवगाहते। स्वकपोलकल्पितोऽस्य कवेर्वर्णनीयो विषयः। यत् प्रणयिन्याः कृते स्वदेहमांसदानं तत्तु नितरामलौकिकवृत्तम्।

उन्मादः

माधवो यथा प्रणयस्य तथा करुणाया अप्यर्णवः। स चादर्शः सर्वशास्त्राणाम्, उत्पत्तिः कलानाम्, कुलभवनं गुणानाम्, आगमः काव्यामृतरसानाम्, उदयशैलो मित्रमण्डलस्य, उत्पातकेतुरहितजनस्य, प्रवर्त्तयिता गोष्ठीबन्धानाम्, धौरेयः साहसिकानाम्, अग्रणीर्विदग्धानाञ्च। एतद्गुणजातं तस्मिन सर्वथा विलसत्येव। स चाप्रतिम आधारो विनयस्य।

'परिचयकरुणायां सर्वथा मा विरंसीः' इत्यनेन भगवत्या कामन्दक्या सनिर्बन्धमनुरुद्धयमानेन तेनोक्तम्—

'श्लाघ्यान्वयेति नयनोत्सवकारिणीति
निर्व्यूढसौहृदभरेति गुणोज्ज्वलेति।
एकैकमेव हि वशीकरणं गरीयो
युष्माकमेवमियमित्यथ किं ब्रवीमि।'

माधव आश्रयो रसिकानाम्। स मालतीवेशधारिणं मकरन्दमालिङ्ग्योवाच कामन्दकीम्—'भगवति! कृतपुण्य एव नन्दनो यः प्रियामीदृशीं मनसा मुहूर्त्तमपि कामयिष्यते' इति।

वधूवरस्य परस्परसम्बन्धमधिकृत्य कामन्दक्या कथितम्—

'प्रेयो मित्रं बन्धुता वा समग्रा
सर्वे कामाः शेवधिर्जीवितञ्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्रीणां भर्त्ता धर्मदाराश्च पुंसाम्
इत्यन्योन्यं वत्सयोर्ज्ञातमस्तु ॥

मालतीवेशधारिणा मकरन्देन स्वाभिलाषपूरणे निष्ठुरं प्रतिहतो विप्रलब्धश्च नन्दनोऽधिकवैलक्ष्यस्खलदक्षरः सरोषनिर्भरदुःखितो मदस्फुरन्नयनो वासभवनान्निर्गतः। अतो वामशीलां मालतीं तिरस्कर्त्तुकामयागतया मदयन्तिकया सार्द्धं विवाहे सम्पन्ने कृत्रिमनिन्दितस्य मकरन्दस्य, मालतीमाधवयोर्विलासकुञ्जमागच्छता मकरन्देन समं पथि नन्दनप्रेषितनगरपालैर्महान् कलहः समजनि। तत्सन्देशं श्रुत्वा तत् स्थानं द्रुतं गत्वा मकरन्देनाऽऽहतशरीरेण साकं पुनः कुञ्जं प्रत्यावृत्य मालतीविहीनं तदपश्यत्। तेषामागमनात् प्राक् प्रतिहिंसापरायणया कपालकुण्डलया बलाद्धृता मालती। तदा कुवलयाक्षीं प्रत्यनिष्टैकबुद्धे र्माधवस्यान्तरात्माऽविरतमनुबद्धोत्कम्प एवाभवत्। वामेतरच्चक्षुरस्फुरत्। स करुणं विललाप। तस्यायं विलापो विक्रमोर्वश्यां पुरूरवसो विलाप इवातीव करुणः।

स च माधवः प्रियाविरहोन्मत्तः पुरूरवा इव कदाचित् काननपशून् पक्षिणश्च, कदाचिच्च जलदान् प्रियामधिकृत्य जिज्ञासते स्म। एवं विलपन स कदाचिद् दुःखितः कदाचिच्च मूर्च्छितोऽभवत्।

अस्मिन् विरहवर्णने कालिदास इव भवभूतिः स्वकृतित्वं न सम्यक् दर्शितवान्। परन्तु कालिदासादते न कश्चिदपरः कविरीदृशविरहवर्णनं कर्त्तुमलमभूत्।

'भवभूतिः करुणरसे अतिरिच्यते' इति यदुक्तं वैदेशिकैस्तत्तु सर्वथा समीचीनमेव। महाकवेरिदं करुणार्थग्रथितपदं विरहवर्णनं वाचकवर्गमपि चिरं रोदयति। दुःखितमपि जनमतितरां दुःखयति। परन्तु अयं दुःखानुभवः सुखायैव कल्पते। यदुक्तं विश्वनाथेन—

'करुणादावपि रसे जायते यत् परं सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम्॥'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवभूतिः खल्वाश्रयः करुणरसात्मकभावानाम्, प्रस्रवणं शमस्य, कर्णधारश्च कल्पनार्णवस्य। श्रुतं प्रियावियोगविधुरस्याजस्य परिदेवनम्, आकर्णितं सीताविप्रयुक्तस्य रामस्य करुणरोदनम्, निशमितश्चोर्वशीविरहकातरस्य विक्रमस्य अरुन्तुदं वचनजालम्, परन्तु माधवस्य प्रियाविनाकृतस्य रोदनं प्रागुक्तविलापादपि हृदयग्राहि शक्नोति वज्रस्यापि हृदयं द्रवीकर्त्तुम्।

इत्थं विलपतो माधवस्य कालः कश्चिदतिचक्राम। मालतीप्राप्तौ धृतद्वैधीभावकातरं तस्य मनः। कथं जीवितं स धारयिष्यति। क्रमेण तस्य धैर्यमहीयत। केन वाऽन्येन विना मकरन्देन स साधारणीकरिष्यति दुःखम्। 'केनोपायेन प्रियतमा प्राप्तव्या' इति तस्य मनसि सततं विपरिवर्त्तमानमासीत्। अयं माधवस्य दैवदुर्नियोगः कोऽपि। स महति जीवितसंशये अवर्त्तत। न कथमपि जातो विशदस्तस्य प्रकाममन्तरात्मा। मालतीविरहेण स हाहानिनादेन दिशो बधिरयन् स्थितः। तस्य दुःखं खलु वचनानामविषयो जातम्। दैवानुग्रहात् सौदामिन्या कौशलेन कपालकुण्डलाहस्तादुद्धृता मालती समर्पिता च माधवाय।

पुनर्मिलनम्

मालतीमाधवावन्योन्यं समवलोक्य स्वाच्छन्द्यमानन्दपरस्परागां किमप्यवापतुः। परन्तु सन्देशोऽयं कामन्दकी-मदयन्तिका-लवङ्गिकाभ्यश्च न विज्ञापितः। ताः सर्वा मालत्याः कृते प्राणान् हातुं मनो दधिरे। अत्रान्तरे (नेपथ्ये) आश्चर्यमाश्चर्यम्।

व्यतिकर इव भीमस्तामसो वैद्युतश्च
क्षणमुपहतचक्षुर्वृत्तिरुद्भूय शान्तः।

काम। [विलोक्य साद्भुतहर्षम्]।
कथमिह मम वत्सस्तत् किमेतत्—
[प्रविश्य मकरन्दः] किमन्यत्।
प्रभवति हि महिम्ना स्वेन योगेश्वरीयम्।
(नेपथ्ये) कथमतिदारुणो जनसंमर्दो वर्त्तते ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मालत्यपायमधिगम्य विरक्तचेताः
सांसारिकेषु विषयेषु च जीवितेषु ।
निश्चित्य वह्निपतनाय सुवर्णबिन्दु-
मभ्येति भूरिवसुरित्यधुना हताः स्मः ।।

मदयन्तिकालवङ्गिके । भत्ति मालतीमाहवाणं संदंसणमहूसवो भत्ति अच्चाहिदं च ।

कामन्दकीमकरन्दौ । [सहर्षम्] हा धिक् कष्टम् । आश्चर्यमाश्चर्यम् ।

किमयमसिपत्रचन्दनरसच्छटासारयुगपदवपातः ।
अनलस्फुलिंगकलितः किमयमनभ्रः सुधावर्षः ।।
सञ्जीवनौषधिविषव्यतिकरमालोकतिमिरसम्भेदम् ।
अद्य विधिरशनिशशधरमयूखसंवलनमनुकुरुते ।।

तदा [नेपथ्ये] हा ताद ! विरम दंसनूसुअम्हि दे वअणकमलस्स, पसीद, सम्भावेहि मं । कहं मम कारणादो समत्थलोआलोआन्तराल-विक्खम्भनिम्मलकुलेक्कमंगलपदीवभूदं अत्तणअं परिच्चअसि, मए उण अलज्जाए निरणुक्कोसा तुह्मे त्ति सम्भाविदं आसि । * *

माधवमकरन्दौ । [ऊर्ध्वमवलोक्य सविस्मयम्] भगवति, दिष्ट्या वर्द्धसे ।

सा योगिन्यम्बरतो विघटितजलदाऽभ्युपैत्ययं यस्याः ।
वागमृतजलासारो जलदजलासारमतिशेते ।।

इयं हि मालतीप्राप्तिप्रवृत्तिः ।

केनोपायेन कपालकुण्डलाहस्तात् सौदामिन्या उद्धरणं कृतं मालया-स्तत्तु तस्या एव मुखाच्छ्रुतमस्माभिः ।

माल । वाढं इमाए क्खु भअवदीसम्बन्धपक्खवादिणीए णिव्भच्छिअ कवालकुण्डलं अत्तणो आवसधं उवणीअ मं भअवदीणिव्विसेसं समासा-सिदम्हि, किञ्च केसरावली साहिण्णाणहत्थाए इह आगन्तूण, सव्वे तुह्मे सन्धारिदा मरणादो, सा एसा जीविदप्पदाइणी सोदामिणी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाराजो मालतीमाधवपरिणयमधिकृत्याऽऽमूलं श्रुत्वा मुदा परमया युतोऽभवत्। स तु तयोर्विवाहमभिनन्दितवान्।

उपसंहारः

भवभूतिर्मालतीमाधवे यन्नायकचरितमङ्कितवांस्तत्त्वतुलनीयम्। ईदृशं निष्कलङ्कचरितं प्रायेण संस्कृतनाटकेषु न विद्यते इति मे मतिः। सर्वे एव स्पृहणीया नायकगुणा अस्मिन् धीरप्रशान्ते नायके विलसन्ति। स च—

त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोऽनुरक्तलोकस्तेजोविदग्धशीलवान्नेता॥

माधवः खलु आदर्शप्रेमिकः। प्रेम्णः कृते स प्राणानपि हातुमैच्छत्। हृदयंगमे सुहृदि तस्य स्नेहो महान्। यदा स मकरन्दं व्याघ्रेणाऽऽहतं विलोकयाम्बभूव तदा तस्य दारुणोऽभूदकथनीयः सन्तापः। मालती-प्रथमदर्शनजनितप्रीतेरस्य कन्दर्पदाहदीपितस्य हृदयस्य कामन्दक्या आश्वासनवाक्यजातमेव विनोदनतामिवागात्। महत्यां विपदि धीरत्वमेव तस्य प्राणसन्धानहेतुरभवत्। कामन्दकीसदृशीनां नारीणामप्राकृताकृतीनामवितथगिरां गिरः कथमपि वैतथ्यास्पदं न भवन्तीति मालतीप्राप्तौ सन्देहदोलारूढस्य माधवस्याश्वासपदमभूत्।

मालती न केवलमन्तर्बहिरपि सा सर्वाशानिबन्धनमासीन्माधवस्य। अपहृतायाश्च मालत्यां न कथमपि तस्य मनो धृतिमलभत। आशीविषवेग-विषमाणां कुसुमसायकानां पतितो गोचरे माधवो मकरन्देन सनिर्बन्धं स्वमनोऽवस्थामधिकृत्य जिज्ञास्यमानो वक्तुकामोऽपि न शक्नोति स्म किञ्चिदपि लज्जाकेलितगद्गदो गदितुम्। तस्य सन्देहदोलामवलम्ब्य संवित् कामन्दक्यै किं वक्ष्यतीति नाज्ञासीत्। परन्तु भक्तिप्रवणेन चेतसा तत्कथायामतिशय-दर्शितादरस्ततसङ्केतेनैव परिचालितोऽभूत्। वहन्नन्तर्गुरुणादरेण प्राणानिव कामन्दक्या आश्वासवाक्यानि तस्थौ। अन्ततश्चेदमेव वक्तव्यम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'ममापि साधुः प्रतिभात्ययं क्रमः ।
चकास्ति योग्येन हि योग्यसंगमः ॥

चरित्रोत्कर्षः

शाकुन्तलस्य नायको दुष्मन्तश्चेदस्य प्रकरणस्य नायकस्य तुलामारोप्यते तर्हि दृश्यते—दुष्मन्तस्य शकुन्तलागतप्रणये माधवस्येवोन्मत्तता नास्ति। दुष्मन्तः शकुन्तलामयोऽपि नालमभूत् स्वकर्त्तव्यमवधारयितुमिति न। परन्तु तत् कर्त्तव्यसम्पादनं स्ववयस्यविदूषकप्रेषणेन। तथाहि—

"सखे माधव्य ! त्वमप्यस्माभिः पुत्र इव गृहीतः।"

स्वयञ्च शकुन्तलया प्रेमसम्भाषणार्थं प्रचलितः। दुष्मन्तः शकुन्तलारूपं दृष्ट्वोन्मत्तः। माधवो मालत्या गुणमुग्धः। शकुन्तला अमानुषीसम्भवा मालती तु मानुषीसम्भवा। दुष्मन्तः सम्राट्। माधवस्त्वमात्यपुत्रः। नाटकद्वयमेव नायकस्य प्रणयमधिकृत्य रचितम्। नायकयोः सादृश्यापेक्षया वैषम्यमधिकतरं विद्यते। दुष्मन्तो धीरोदात्तो दक्षिणो नायकः। तस्य मनो लालसादीप्तम्। स कामुकोऽपि न विवेकहीनः। स बहुपत्नीकः। शकुन्तलायाः प्रत्याख्यानं तस्य भ्रान्तिजनितम्। शकुन्तलायामनुरक्तोऽपि तां विस्मृतवान्। तस्य चरित्रे न लभ्यते सत्यवादितायाः परिचयः। स धर्मभीरुश्चित्रकरः संगीतज्ञश्च। स स्वयं राजकार्यं पर्यालोचयति स्म। स पुत्रवत्सलः कर्त्तव्यपरायणश्च अभिज्ञानशकुन्तलानाटकस्य तेषु तेषु स्थानेषु तस्य प्रागुक्तगुणानामेव परिचयः प्रदत्तः कविना।

"गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥"
"मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥"

"भोस्तपस्विनः ! चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि, तत् कथमिमामभिव्यक्तसत्त्वलक्षणामात्मानमक्षत्रियं मन्यमानः प्रतिपत्स्ये ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"क्व वयं क्व परोक्षमन्मथो मृगशावैः सह वर्द्धितो जनः ।
परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः ।।"

'अस्यास्तुंगमिव स्तनद्वयमिदं निम्नेव नाभिः स्थिता' इत्यादि ।

'रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्' इत्यादि ।

'व्यपदेशमाविलयितुं समीहसे माञ्च नाम पातयितुम्' इत्यादि ।

'सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु ते' इत्यादि ।

'आलक्ष्यदन्तमुकुलाननिमित्तहासैः' इत्यादि ।

'अनेन कस्यापि कुलाङ्कुरेण' इत्यादि ।

अत्रो दृश्यते दुष्मन्तस्य चरित्रं दोषादोषसंमिश्रितम् । परन्तु माधवोऽप्रतिमाश्रयः सद्गुणानाम्, माधवस्य चरित्रं दुष्मन्तस्य तथा मालविकाग्निमित्रस्य चरित्रापेक्षया समधिकमुन्नतम् । अग्निमित्रोऽपि दुष्मन्तवत् कामुकः । माधवस्य प्रणयोन्मादे भोगाकाङ्क्षा मेघदूतस्य यक्षवत्, तथा कातरता अग्निमित्रवन्नासीत् । सुषवित्रभावसम्भावित उन्मादो माधवस्यासीत् ।

अन्ततश्च सुधीवर्गस्य सविधे इदमेव वक्तव्यम्—

शास्त्रे प्रयुक्तं यदयुक्तमस्मिन्
भ्रान्त्या प्रमादेन च तत् सुधीभिः ।
संशोधनीयं विपुलानुकम्पै-
र्मया निबद्धोऽञ्जलिरेष तेषाम् ।।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघनादवधम्

एकादशः सर्गः

[निबन्धकः—श्रीनित्यगोपालविद्याविनोदः]

संलक्ष्य मित्रं समुवाच राम आश्चर्य्यमाश्चर्य्यमहो वयस्य ।
न जातु दृष्टं न मया श्रुतं वा स्वप्नो नु दृष्टोऽहनि जाग्रता किम् ॥१॥
भो मित्ररत्नोत्तरमात्थ सत्यं बोद्धुं न शक्तोऽस्मि निरीक्ष्य मायाम् ।
भवामि सन्देहतमोऽन्धचित्तो द्रष्टुं न शक्नोमि हि कृत्यमार्गम् ॥२॥
वार्त्ता श्रुता चित्ररथाद्रथीन्द्रान्माया नियोज्यस्य सहायभूता ।
आयास्यतीहेति (?)छलेन किं सा लङ्कां प्रविष्टा वद कस्य माया ॥३॥
विभीषणः प्राह धरासुतेश स्वप्नो न नैशः शृणु मित्र वच्मि ।
दैत्यः स नाम्नास्ति ह कालनेमिस्तस्यात्मजेयं प्रथिता प्रमीला ॥४॥
जातेयमंशात् परशक्तिदेव्याः समा हि तस्याः परया च शक्त्या ।
जनं न पश्यामि तथाविधं यः स्पर्द्धेत युद्धे दनुजां प्रमीलाम् ॥५॥
यो वीरसिंहोऽजयदिन्द्रमाजौ तं रक्षईशं पदसेवकं या ।
करोति काष्ठावसना यथेशं दिगम्बरं दृष्टिविमूढसंज्ञम् ॥६॥
विश्वस्य रक्षार्थमियं विधात्रा सृष्टा वरत्रा स तया च तेन ।
बद्धो महावीर महेन्द्रजेता यथा मदच्युद्विरदोऽतिमत्तः ॥७॥
धारा यथाऽपां शमयेद्वाग्निं शत्रुं वनानां सततं प्रमीला ।
निवारयेदेनमनन्यवार्य्यं तथा मधुप्रेमवचःसुधाभिः ॥८॥
फणी दुरन्तो यमुनाजलान्तस्तिष्ठत्यतो लोक इहास्ति सुस्थः ।
देवाश्च नाके फणिनो भुवोऽधो भूमौ नरा हृष्टहृदो वसन्ति ॥९॥
प्रत्याह रामः सकलं हि सत्यं यदात्थ बन्धो स हि मेघनादः ।
महारथिश्रेष्ठ इहान्य आस्ते को वा समस्तस्य सुशिक्षितस्य ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृष्टः स वीरो भृगुवंश्यरामो युद्धेऽचलः शैल इवातितुंगः ।
शुभे मुहूर्त्ते तव(?) भ्रातृपुत्रो जग्राह चापं किमहं करोमि ॥११॥
वयस्य सिंही विपिने पशूनां राज्ञा समेता त्रिजगद्विजेत्रा ।
कस्यास्यते वा भयलुप्तसंज्ञं दीनं समग्रं मृगयूथमेतत् ॥१२॥
प्रेक्षस्व बन्धो परितः समुद्रः स कालकूटो रसति प्रभीमम् ।
संरक्ष सैन्यं त्वदधीनमेतं यथा भवं पीतविषो भवेशः ॥१३॥
भो वीरवर्य्य प्रविचिन्तय त्वं तवाग्रजः कालभुजङ्ग उग्रः ।
वीर्य्येण तस्यातुलवीर्य्य एष जितेन्द्रवीर्य्यो विषदन्तदेश्यः ॥१४॥
भङ्क्तुं समर्थो यदि तं भवेयं मनोरथो मे सफलस्तदा स्यात् ।
मित्रान्यथा बद्धचलोर्म्मिसिन्धुर्लङ्कां वृथागां कथयामि सत्यम् ॥१५॥
विनम्य शीर्षं समुवाच शूरः सौमित्रिरङ्घ्रौ रघुवंशकेतोः ।
विभेषि कस्माद्रघुनाथ युद्धे रक्षोभिराप्तेन्द्रमहासहायः ॥१६॥
नूनं श्व इन्द्रस्य रिपुः क्षपाटो विनाशमायास्यति मे भुजार्त्तः ।
जयं न प्राप्नोति कदाप्यधर्म्मो रक्षोनृपो नित्यमधर्म्मभक्तः ॥१७॥
अमुष्य पापेन सुतो हतात्मशक्तिर्गतासुर्भविता जितेन्द्रः ।
तातस्य पापेन युतो मृतः स्याद् दूतः सुराणां प्रबभाष एवम् ॥१८॥
विभीषणः प्राह यथार्थमुक्तं धर्म्मेण लोको जयतीति तथ्यम् ।
भो वीरमातङ्ग निशाचरेशः स्वपापपाकेन विनाशमेति ॥१९॥
तवैव बाणेन सुरेन्द्रजेता नूनं मृतिं प्राप्स्यति मेघनादः ।
प्रयत्नमाधेहि तथापि वीरा रणप्रिया वीर्यवती प्रमीला ॥२०॥
यत्रास्ति सिंही भयदा वने तत् प्रयत्नचित्तेन जनेन भोग्यम् ।
को वेत्ति भीमा प्रहरिष्यते कं धृतो निशीमां दिवसे निहन्याम् ॥२१॥
प्रोवाच रामोऽङ्ग विभीषणाद्य द्वारेषु सैन्यैः सह लक्ष्मणेन ।
प्रेक्षस्व के कुत्र विनिद्रनेत्रास्तिष्ठन्ति युद्धे हतशक्तिसाराः ॥२२॥
विलोक्यतां सर्वत एव मित्र कुत्राङ्गदो नील इहास्ति वान्यः ।
वीरो मदीयः सशरासनोऽहं द्वारि प्रतीच्यां स्वयमस्मि जाग्रत् ॥२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओमित्युदित्वा सह-लक्ष्मणोऽसौ विभीषणो निर्गत एव सद्यः ।
रराजतुर्द्वौ सहतारकेन्द्रो यद्वा विपुर्व्योममणिः प्रदीप्तः ॥२४॥
द्वारं प्रमीला कनकस्य याता विचित्रवाद्यं ध्वनितं समन्तात् ।
रक्षांसि घोरं रसितानि मेघाः कल्पान्तदृष्टा इव वा गजेन्द्राः ॥२५॥
हेषोत्थिता वाजिगणादिभेभ्यः समुत्थितं बृंहितमप्यजस्रम् ।
रथाङ्गनेमोमुखरा च कुन्ता देध्मीयमानाः परितो बभूवुः ॥२६॥
उत्पत्य नाराचसमूह इन्दुमाच्छादयद्व्योम कृशानुदीप्रम् ।
कोलाहलैः पूर्णमभूद् यथा भू-कम्पे गिरिर्वह्निमिवोज्जगार ॥२७॥
भयेन लङ्का चकिता निशीथे क्षणे क्षणे कम्पमगादभद्रम् ।
नृमुण्डकण्ठ्याह सुचण्डघोष-मस्त्राणि कस्मै विनियोजयानि ॥२८॥
वयं न रक्षोरिपवः प्रपश्य नेत्रे समुन्मील्य कुलाङ्गना नः ।
द्वारेषु मुक्तेषु तदैव लङ्कां सर्वाः प्रविष्टा जयघोषमत्ताः ॥२९॥
अग्न्यर्चिरालोक्य यथा पतङ्गा धावन्ति हर्षेण तथैव पौराः ।
प्रसूनवृष्टिं विदधुः समन्ताद् हुलुध्वनिं माङ्गलिकञ्च वध्वः ॥३०॥
तूर्यध्वनिं चक्रुरशेषवन्द्यस्तथाऽङ्गना जग्मुररण्यमध्यम् ।
तरङ्ग आग्नेय इव प्रदध्मौ विद्याधरीणां गण इष्टवाद्यम् ॥३१॥
गवाक्षमुद्घाट्य निशाचराणां रामा निरीक्ष्यातिसुखाब्धिमग्नाः ।
शशंसुरुक्तया पुनरुक्तयेव वीराग्रगण्याऽस्ति भुवि प्रमीला ॥३२॥
सा वीरवामा समगात् क्षणैश्च सानन्दचेताः पतिमन्दिरं स्वम् ।
अवाप्य नाथं मुदिता बभूव नष्टं मणिं प्राप्य यथा भुजङ्गी ॥३३॥
उवाच हर्षात् स हि मेघनादो निहत्य चन्द्रानन एषि किं त्वम् ।
तं रक्तबीजं युधि भीमवीर्यं कैलासमद्रीन्द्रसुतेव भीमा ॥३४॥
पदोस्तले ते पतितो भवामि यद्यादिशेस्त्वं चिरकिङ्करोऽस्मि ।
स्मेराह रामा तव पादपद्मप्रसादलेशेन जगज्जयामि ॥३५॥
शक्नोमि जेतुं मदनं न भीता भवामि तीव्राद् विरहानलाद् वा ।
उपैस्यतस्तं सततं मनो मे यमिच्छति प्रेष्टमिता स्रवन्ती ॥३६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्ता सतीयत् प्रविवेश सद्म मुमोच वीराभरणञ्च कृत्स्नम् ।
क्षौमं वसित्वा निचुलञ्च बद्ध्वा पीनस्तनी मेखलया विरेजे ॥३७॥
वज्रस्य हारः समुदक्षिपच्च वक्षस्यभान्मौक्तिकमाल्यरत्नम् ।
ललाटिकाकान्तमतीव भालं कर्णौ तथा कुण्डलकान्तिकान्तौ ॥३८॥
विचित्ररत्नाभरणेन रामा स्वलङ्कृता सातिशयं विरेजे ।
रक्षोऽन्वयापीड उदग्रवीर्यस्तया सहाध्यास्त सुवर्णपीठम् ॥३९॥
जगुः सुगातृप्रवराः सरागं नर्त्तक्य आसन् नटनप्रसक्ताः ।
विद्याधरस्तस्य वधूश्च यादृक् स्वर्गे विहङ्गा मधुरं चुकूजुः ॥४०॥
उत्सर्पिता उत्सगणा बभूवुः स्पर्शाद् यथाब्धौ रजनीशभानोः ।
वसन्तवायुर्मधुरं ववौ च मधौ वसन्ते विपिनश्रियेव ॥४१॥
इतः ससौमित्रिविभीषणोऽगाद् द्वारं कुबेरस्य दिशि प्रहृष्टः ।
जागर्ति सुग्रीव इतो मघोनः काष्ठां समारुध्य विनिद्रनीलः ॥४२॥
आशां कृतान्तस्य रुणद्धि वीरः स चांगदः सिंह इव क्षुधार्त्तः ।
कैलासशृंगे धृतभीमशूलो नन्दी प्रभुद्वारपतिर्यथा वा ॥४३॥
इत्थे समन्ताज्ज्वलनोऽतितीव्रो धूमेन शून्यो नगरी च लङ्का ।
मध्ये हि तस्य द्विजराज एवं तारावृतो निर्म्मलदेवमार्गे ॥४४॥
त्रातुं स्वशस्यं कृततुंगमञ्चास्तिष्ठन्त्यनिद्राः कृषिका निशायाम् ।
तथा प्रवीरा रघुनाथगृह्या रक्षन्ति लङ्कां चिरजागरूकाः ॥४५॥
विभीषणः प्रीतिमधात् सुमित्रासुतेन सार्द्धं चलितश्च तत्र ।
यत्रास्त धीरः कटके प्रवीरो गुणार्णवो दाशरथिर्वयस्यः ॥४६॥
सहासमाभाष्य जगाद गौरी प्रेक्षस्व लङ्कां विजये वयस्ये ।
वीरोचितं वेशमदृष्टपूर्वं कृत्वा प्रमीला नगरीं विवेश ॥४७॥
एनां निरीक्ष्यैष नरेन्दरामः सौमित्रिरन्ये च बलिष्ठवीराः ।
चमत्कृता विस्मयविह्वलाश्च वदन्ति रूपं नहि दृष्टमीदृक् ॥४८॥
मयैष वेशो विधृतः कृतेऽङ्ग हन्तुं दुरन्तान् दनुजान् समीके ।
शृणु ध्वनिं भैरवमालि वामा करोति हुङ्कारमतीव भीमम् ॥४९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कम्पन्त उग्रा रघुनाथसैन्या बन्धे कवर्याश्चटुला च चूडा ।
आस्कन्दितेऽध्वस्य विवृत्तगात्री चकास्ति गौरी नलिनीव हैमी ॥५०॥
नैतादृशं रूपमिहास्ति लोके न वाऽभवज्जातु भविष्यतीत्थम् ।
सर्वं त्वदुक्तं सखि सत्यमेव प्रत्यब्रवीत् सा विजयेति गौरीम् ॥५१॥
जानाम्यहं वीर्यवती प्रमीला दासी त्वदीयेति तथापि चिन्ता ।
चित्ते मदीये कथमात्मवाक्यं रक्षिष्यसि त्वं शिवसुन्दरीशे ॥५२॥
एकोऽपि जेता स हि मेघनादो विश्वस्य वीर्येण सहाद्य तेन ।
सुसंगता शौर्यमयी प्रमीला ज्वाला यथाग्नेर्मिलिताऽनिलेन ॥५३॥
कथं नु रामं सह तेन देवि रक्षिष्यसि त्वं समरे समात्थ ।
कथं नु वा लक्ष्मण आजिमूर्ध्नि हनिष्यतीमं हृतशक्रराज्यम् ॥५४॥
क्षणं विचिन्त्याथ जगाद दुर्गा सखि प्रमीला मम शक्तिभूता ।
तेजो मयाऽस्या विहनिष्यते श्वः सायं यथा सौरकरैर्मणीनाम् ॥५५॥
सौमित्रिरव्यर्थशरव्य एनं नूनं समानेष्यति घोरयुद्धे ।
कीनाशगेहं मम शक्तिनष्ट-स्वदारसामर्थ्यमलं सुजय्यम् ॥५६॥
पत्या समं सा पुरमेष्यतीदं शिवश्च सेविष्यत इन्द्रजेता ।
सन्तोषयिष्याम इमां विषण्णां कृत्वा सखीं तुल्यहृदं प्रमीलाम् ॥५७॥

उक्त्वैतावद् गिरिशदयिता मन्दिरं स्वं प्रविष्टा
देवी निद्रा मृदु मृदु पदं धाम कैलासमागात् ।
प्रीतास्तस्मिञ्जनसमुदयाः पुष्पतल्पेषु सुप्ताः
शम्भोर्भाले नवशशिकला भासयामास धाम ॥५८॥

इति श्रीमेघनादवधे महाकाव्ये प्रमीलारामसाक्षात्कारो नाम
एकादशः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरल-चित्सुखीसारम्

(पूर्वतोऽनुवृत्तिः)

[निबन्धकः—स्वर्गत-रमेशचन्द्र-वेदान्ततीर्थः]

तार्किकः ॥—ननु इदं ममापरोक्षव्यवहारयोग्यत्वे सति अवेद्यं न भवति (वेद्यं भवतीति फलितम्) ममापरोक्षव्यवहारयोग्यत्वात् इत्यत्र साध्यव्यतिरेकानुमाने इदं ममापरोक्षव्यवहारयोग्यत्वे सति वेद्यं न भवति ज्ञानत्वादिति भवदभिमतसाध्यसाधनाभावयोर्व्याप्तौ यज् ज्ञानत्वं हेतुः तदभावस्य यथा ज्ञानेतरत्वस्य भवता उपाधित्वमुच्यते, तथा मयापि इदम् अपरोक्षव्यवहारयोग्यत्वे सति वेद्यं न भवति ज्ञानत्वादित्यत्र साध्यव्यतिरेकानुमाने ममापरोक्षव्यवहारायोग्यत्वाद् इत्यस्य हेतोः व्यतिरेकस्य ममापरोक्षव्यवहारायोग्यत्वस्य सुवचमुपाधित्वमुच्यमानं कथं न सहसे ? एवञ्च भवत्प्रदर्शितोपाधेरपि अनुपाधित्वादेतत् सर्वं षण्ढमैथुनायितमिति अव्याहतं मया प्रदर्शितस्य उपाधेरुपाधित्वम्। अपि च भवतो रीतौ चक्रकापत्तिश्च दूषणम्। ज्ञानेतरत्वव्यतिरेकस्य ज्ञानत्वस्य मदीयसाध्यव्यतिरेकरूपत्वदीयसाध्योन्नायकत्वे सिद्धे ज्ञानेतरत्वस्य उपाधित्वम्, तस्य उपाधित्वे व्यतिरेकानुन्नायकत्वात् ममापरोक्षव्यवहारायोग्यत्वस्य अनुपाधित्वम्, तस्यानुपाधित्वे च ज्ञानत्वस्य प्रथमसाध्यं प्रति हेतुत्वमिति। तस्मान्नेयं रीतिः चतुरचेतसां मतिसरणिमधिरोहति।

वेदान्ती ॥—भो विद्वन्, आकर्ण्यतां तावत् अवहितहृदा मदीयोऽभिप्रायः। स्वप्रकाशपरमात्मप्रद्वेषात् सूक्ष्मेक्षिकावतामग्रेसरः कुशाग्रीयधीरपि न प्रवेष्टुमर्हति भवान् मदीयतर्कान्तसूक्ष्मवर्त्मनि। ममापरोक्षव्यवहारायोग्यत्वस्य प्रथमसाध्यव्यतिरेकोन्नायकत्वं तावदसङ्गतम्। वेद्यत्वं हि अनेन साधनीयम्, न च तदप्रसिद्धं येन ममापरोक्षेति विशेषणान्तं सार्थकं भवेत्, तस्मात् मद्वेद्यमिदं मद्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवहारयोग्यत्वाद् इत्येवालमिति व्यर्थविशेषणत्वादहेतुरयम्। अत एव न तद्व्यतिरेकस्य उपाधितेति।

तार्किकः ॥—एवमपि एतदेव दूषणमभिधीयताम्, किमेतावता वागाडम्बरेण ?

वेदान्ती ॥—इयमपि काचन रीतिस्तार्किकैरङ्गीकृतेति प्रदर्शनार्थमियम् अनुसृता मया, अस्याः कस्मिंश्चिद् दूषणे उद्भाविते भवदीयगुरव एव तिरस्कृता भवेयुरिति मे हृदयम्, ध्यायन्तां तावदिदानीम् आत्मनो गुरूणां वाक्यानि।

तार्किकः ॥—किं सन्त्यत्र प्रमाणान्तराणि, यैः सुदृढीभवेत् स्वप्रकाशताऽनुभूतेः।

वेदान्ती ॥—उक्तं प्रागेव मया स्वसंवेद्यस्य स्वप्रकाशात्मनः प्रत्यक्षरूपतया नास्त्यत्र प्रमाणापेक्षा, तथापि भवतां विमतितिरस्काराय अनुमानमपि प्रदर्शितम्, व्यतिरेकिणा अनुमानेन अर्थापत्तिरपि अनुगृहीता, आगमस्तु राजमार्ग एव, नास्त्यत्र अन्धस्यापि अनुसन्धानापेक्षा, अनुभूतौ परप्रकाश्यताया अनुपलब्धेरस्याः स्वप्रकाशता सिध्यतीति अनुपलब्धिरपि प्रभवतितराम्, प्रदीपादिदृष्टान्तेन कथञ्चिदुपमानानुसरणमपि सुकरम्। अपिच **विवादपदानि ज्ञानानि घटज्ञानान्यत्वे सति वेद्यत्वानधिकरणानि ज्ञानत्वाद् घटज्ञानवत्** इत्यादीनि अनुमानान्तराण्यपि अप्रतिहतबलानि अगणितप्रतिवादिबलं प्रसहन्तेतराम्। ज्ञानमात्रपक्षीकरणे घटज्ञानांशे सिद्धसाधनता तदर्थं विवादपदानीति पदोपादानम्, तेन घटज्ञानान्यज्ञानस्य पक्षता वेदितव्या, ततश्च न सिद्धसाधनता। वेद्यत्वानधिकरणमित्युक्ते अप्रसिद्धविशेषणता स्यात्, तन्निवृत्त्यर्थं घटज्ञानान्यत्वे सतीति विशेषणम्, वेद्यत्वानधिकरणस्य अप्रसिद्धत्वेऽपि घटज्ञानान्यत्वे सति वेद्यत्वानधिकरणत्वं घटज्ञाने प्रसिद्धम्, घटज्ञानस्य घटज्ञानान्यत्वानधिकरणत्वादेव, अन्यत्वञ्चात्र तत्त्वानधिकरणत्वम्, घटज्ञानान्यत्वानधिकरणानि इत्युक्ते व्याहतिः, तेषां घटज्ञानान्यत्वादेव, तस्माद् वेद्यत्वग्रहणम्। घटज्ञानान्यज्ञानानां घटज्ञानान्यत्वे सति वेद्यत्वानधिकरणत्वं घटज्ञानान्यत्वानधिकरणत्वान्न सम्भवति व्याघातात्, नहि घटज्ञानभिन्ने ज्ञाने घटज्ञानान्यत्वानधिकरणत्वमस्ति, तस्य घटज्ञानान्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वाधिकरणत्वात्, तस्मात् वेद्यत्वानधिकरणत्वमादायैव घटज्ञानान्यत्वविशिष्ट-वेद्यत्वानधिकरणत्वस्य सिद्धिः, ततश्च सिद्धं ज्ञाने अवेद्यत्वम्।

तार्किकः ॥—अत्रापि अनुमाने घटज्ञानत्वमुपाधिः विराजत एव, घटाज्ञानान्यत्वविशिष्टवेद्यत्वानधिकरणत्वरूपसाध्यस्य व्यापकत्वात् ज्ञानत्वहेतोरव्यापकत्वाच्च।

वेदान्ती ॥—न च एवं दत्तोत्तरेऽर्थे शङ्कितुमर्हति अर्हतामग्रणीर्भवान्। विवादपदं सकर्तृकं कार्य्यत्वात् कुम्भवदिति श्रीमतां परमगुरुभिरुदयनाचार्य्यपादैः प्रोक्ते ईश्वरानुमाने शरीरजन्यत्वोपाधाविव व्यर्थविशेषणत्वात्। यथा उक्तानुमाने शरीरजन्यत्वं व्यर्थविशेषणत्वादनुपाधिः, जन्यत्वमात्रेण साध्यव्याप्तिसिद्धेरितरस्य पक्षमात्रव्यावर्त्तकत्वात्, एवं ज्ञानत्वमित्यनेनैव ज्ञानव्यतिरिक्तव्यावृत्तौ सिद्धायां घटपदस्य पक्षीकृतघटज्ञानव्यतिरिक्तज्ञानव्यवच्छेदकत्वात् पक्षेतरतया अनुपाधिः। तस्मात् विगलितसकलकलङ्कमनुभूतेः स्वप्रकाशत्वानुमानं सिद्धम्। एवमन्येऽपि महाविद्याप्रयोगाः स्वप्रकाशत्वसाधनाय अलंतरां वरीवर्त्तन्ति। वेलातिरेकाद् अस्मत्साध्यस्य सिद्धत्वाच्च नावश्योदाहार्यास्तइति मन्ये। किमत्राभिमतम् सकलविद्यापारावारपारीणस्य वेदान्तमहावाक्यमननविशुद्धमनसो निर्लेपस्य साक्षिणो महाराजाधिराजवर्य्यस्येति-ज्ञातुं सभाजनाः सविनयं प्रार्थयन्ते।

राजा ॥—भो बुधगणमुकुटमणयो विद्वद्वर्य्याः, भोः सभाजनभाजन-सभाजनाः, श्रुतमेतद् भवद्भिर्यत्—

सिद्धा विचारादधुना बुधानां
नित्या त्रिलोकस्य विभासिकेयम्।
संवित् स्वयंभा तमसां निहन्त्री
ज्योतींषि सर्वाण्यपि भान्ति यस्याः ॥

केश्चित् सभासत् ॥—राजन्, सत्यं सिद्धा संविदः स्वयंप्रकाशता, संदेहोऽस्मिन् विगलितोऽस्माकम्, किन्तु श्रुतमस्माभिरात्मा स्वयंज्योतिरिति भगवत्याः श्रुतेरुद्घोषः, नच अनुभूतेः स्वयंप्रकाशतासिद्धावेव आत्मनः तत्सिद्धिः, ज्ञानात्मनोरभेदादिति युज्यते, तयोरभेदे एव सन्देहावतारात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजा ॥—तिष्ठतु तावदेतदद्य, आगामिन्याममावस्यायां, महामायायतने देव्याः पूजोत्सवावसरे अस्यार्थस्य निर्णयो भविष्यति। अम्बरमध्यमधितिष्ठति सम्प्रति अम्बरमणिः, तत् माध्याह्निककियासु प्रवर्त्तन्तां भवन्तः। पर्वणि प्रातरेव महामायामन्दिराङ्गने समवेतैर्भवितव्यं भवद्भिः। विद्वांसश्च तत्र सबहुमानार्हणम् आहूता भविष्यन्ति।

(सर्वे प्रस्थिताः।)

—

तृतीयदृश्यम्

स्थानम्,—महामायामन्दिरम्

[प्राङ्गणे महती सभा, सभासदश्च यथासनमुपविष्टाः]

राजा ॥—(महामायां प्रणमन् युक्तकरः स्तौति,—)

त्वं भूमिस्त्वं जलौघस्त्वमसि हुतवहस्त्वं जगद्वायुरूपा
त्वच्चाकाशो मनश्च प्रकृतिरपि महत्पूर्विकाऽहंकृतिश्च।
आत्मा चैवासि मातः परमिह भवती त्वत्परं नैव किञ्चित्
क्षन्तव्यो मेऽपराधः प्रकटितरदने कामरूपे कराले ॥

कश्चित् सन्न्यासी ॥—(हस्तामलकं पठति)

निमित्तं मनश्चक्षुरादिप्रवृत्तौ
निरस्ताखिलोपाधिराकाशकल्पः।
रविर्लोकचेष्टानिमित्तं यथा यः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥

अपरः सन्न्यासी ॥—(निर्वाणपञ्जरीं पठति)

अहं नामरो नैव मर्त्त्यो न दैत्यो न गन्धर्वयक्षःपिशाचप्रभेदः।
पुमान् नैव योषित्तथा नैव षण्ढः प्रकृष्ट प्रकाशस्वरूपः शिवोऽहम् ॥

वेदान्ती—(प्रविश्य देवीं प्रणमति)

या तिर्य्यङ्नरदेवताभिरहमित्यन्तःस्फुटा गृह्यते
यद्भासा हृदयात्त्वदेहविषया भान्ति स्वतोऽचेतनाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तां भास्यैः पिहितार्कमण्डलनिभां शक्तिं शिवाधिष्ठितां
ध्यात्वा निर्वृतमानसश्चितिमहं वन्दे स्वभासां मुहुः ॥
अचेत्यचित्स्वरूपत्वादचेतन इव स्थिते ।
चैतन्ये चेतनहेतुं तां वन्दे शक्तिमद्भुताम् ॥
भक्ते भक्तिमयीं पशौ पशुमयीं विद्वत्सु विद्यामयीं
सृष्टौ ब्रह्ममयीं स्थितौ हरिमयीं कल्पात् पुरश्चिन्मयीम् ।
जीवे वृत्तिमयीं जडे जडमयीं शक्तिं शिवस्याद्भुतां
तां ध्यायामि पदे परात् परतरे स्वानन्दलीलामयीम् ॥

विदूषकः ॥—अयि शिलामयि शैलसुते शिवे, त्रिलोकीमुदरसात् कृत्वापि ते उदरं ममतद् दग्धोदरमिव न पूर्णतामासादयति, लड्डुकानीव मे कति कति एते वाहारछागा वा गरडूषमपि ते न भवन्ति, मन्ये मादृशी ते दुरवस्था, यथाऽहमस्य उदरस्य चिन्तया शिलामयोऽस्मि संवृत्तः, किं त्वमपि तथा शिलामयीतामधिगता ? अथवा किमन्यथा कल्पनेन, अनेन हतभाग्येन शिलादत्तेन भास्करेण शैलाद् उत्कृत्य निर्मितासीति शैलसुतेति कथ्यसे, शिलामयीता तु प्रत्यक्षत एव दृश्यते, इत्येतत् तत्त्वबोधविकलैः वराकैः कथमन्यथान्यथा स्तूयसे कल्प्यसे चेति नाहं बुद्धिसागरोऽपि बोद्धुमर्हामि, मत्तोऽयं मे वयस्यश्चाटुकार इव राज्ञः, त्वं जलं त्वं स्थलं त्वमात्मा इत्यादि किं किं न प्रालपत्, वराकौ एतौ तावद् भिक्षुकौ पुनः उपलब्धिः आत्मा, अहमित्याद्युक्तिभिः आत्मनः परमबोधमुज्जगार, परन्तु पण्डितम्मन्योऽयं भण्डो वेदान्ती तावत् "स्वभास्यैर्मेघाद्यैः पिहितसूर्य्यमण्डलनिभाम्" अथच "स्वभासां चितिमि"ति त्वां बहुधा विरुद्धवाचा सविशेषं स्तुत्वा आत्मनः पाण्डित्यं प्राचीकशत् । अहो मूर्खता, भवतु एतत्, त्वं तु यासि सासि, मोदकादिप्रसादैर्मां ब्राह्मणं वञ्चयेति सभक्ति निवेदयामि ।

कश्चित् सभासत् ॥—उदरसर्वस्वोऽपि सत्यमाह अयं ब्राह्मणः, प्रत्यक्षतो विरुद्धानि अन्योन्यव्याहतानि च वाक्यान्येतानि श्रुत्वा सन्दिग्धं नो हृदयम्, पूर्वेद्युर्वादतोऽवगतम् अनुभूतिरेव स्वप्रकाशेति, अहंशब्दाभिधेय आत्मा, परमे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वरश्च स्वप्रकाशः परप्रकाशो वा निर्णयो न जातः। मन्ये महत्यामस्यां संसदि अस्यार्थस्य विनिर्णयो भविष्यति।

राजा ॥—भो भो विपश्चिद्वर्याः अनेकसंशयच्छेत्तारः, आत्मा स्वप्रकाशो न वेति संशयस्य निर्णयं ज्ञातुमुत्कण्ठितेयं परिषत्, कृपया तन्निर्णयेन कृतार्थतां गमयितुमर्हन्ति सन्तो नः।

प्राभाकरः ॥—घटमहं जानामीत्यादिप्रतीतेः आत्मनोऽपि प्रकाश्यतानुभवात् घटादिज्ञानप्रकाश्य एव भवितुमर्हति सः, सर्वप्रत्यक्षेऽस्मिन् कथं संशयावकाशः।

वेदान्ती ॥—क एवमाह भोः!

चिद्रूपत्वादकर्म्मत्वात् स्वयंज्योतिरिति श्रुतेः।
आत्मनः स्वप्रकाशत्वं को निवारयितुं क्षमः॥

आत्मा संविद्रूपः संवित्कर्म्मतामन्तरेण अपरोक्षत्वात् संवेदनवदिति प्राभाकरं भवन्तं प्रत्यनुमानात् आत्मनः संविद्रूपता सिध्यति, संविदश्च स्वप्रकाशता प्रागेव सिद्धा।

प्राभाकरः ॥—किं नामात्रापरोक्षत्वं भवतोऽभिप्रेतम्! यदि अपरोक्षज्ञानरूपं तदा आत्मनि उभयवादिसिद्धं तन्नास्तीति असिद्धिः।

वेदान्ती ॥—अपरोक्षव्यवहारविषयत्वमत्रापरोक्षत्वमभिप्रेतम्, नापरोक्षज्ञानविषयत्वम् अपरोक्षज्ञानत्वं वेति न साधनवैकल्यासिद्धी दोषौ अवतरतः।

प्राभाकरः ॥—व्यर्थमत्र ते हेतौ संवित्कर्म्मतामन्तरेणेति विशेषणम्। अथवा संवित्कर्म्मतारहितत्वादित्येवमुच्यतां किं विशेषणद्वयोपादानेन, अतो व्यर्थविशेषणतादोषदुष्टमिदमनुमानं न साध्यसाधनायालम्।

वेदान्ती ॥ नैवम्,—घटादौ अपरोक्षव्यवहारयोग्यत्वं वर्त्तते, अतः तद्व्यावर्त्तनाय संवित्कर्म्मतामन्तरेणेति विशेषणम्, अतीतादौ च संवित्कर्म्मताभावो वर्त्तते अतः तद्व्यावृत्तये अपरोक्षत्वादिति विशेषणं प्रयुक्तमिति न व्यर्थविशेषणतादोषः।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

শীঘ্র প্রকাশিত হইবে

সুরভারতী

সংস্কৃতসাহিত্য-সম্বন্ধীয় বাঙ্গালা

মাসিক-পত্রিকা

'Calcutta Oriental Journal" "সংস্কৃত-সাহিত্য-পরিষৎ" ও "মঞ্জূষা" সম্পাদক, কলিকাতা বিশ্ববিদ্যালয়ের তুলনামূলক ভাষাতত্ত্বের ও সংস্কৃতবিভাগের অধ্যাপক

শ্রীক্ষিতীশচন্দ্র চট্টোপাধ্যায়

সম্পাদিত।

এই অভিনব মাসিক পত্রিকাতে বেদ, বেদান্ত, মীমাংসা, জ্যোতিষ, কাব্য, অলঙ্কার, আয়ুর্বেদ, পুরাণ প্রভৃতি বিবিধ-বিষয়ক প্রবন্ধ থাকিবে। তদ্ভিন্ন মহাকবি ভাসের অমৃতময়-লেখনীপ্রসূত নাটকগুলি সানুবাদ প্রকাশিত হইবে। বৈয়াকরণপ্রবর মহর্ষি পাণিনির অমর ব্যাকরণ বিস্তৃত টীকাদি পরিশোভিত হইয়া প্রকাশিত হইবে।

অগ্রিম বার্ষিকমূল্য ডাকমাশুল সমেত দুইটাকা মাত্র।

আজই গ্রাহক হউন।

শ্রীজ্যোতিষচন্দ্র চট্টোপাধ্যায়

কর্ম্মাধ্যক্ষ—সুরভারতী।

৬১এ, রামকান্ত বোস ষ্ট্রীট, বাগবাজার, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সংস্কৃত-সাহিত্য-পরিষৎ-

পুস্তকালয়ের নিয়মাবলী।

১। পুস্তকালয় ছুটীর দিন ব্যতীত অপর দিন বৈকাল ৩৷৷০ সাড়ে তিনটা হইতে রাত্রি ৯৷৷০ সাড়ে নয়টা পর্য্যন্ত খোলা থাকিবে। পরিষদের কোনও বিশেষ অধিবেশন যে সকল দিনে অনুষ্ঠিত হইবে সেই সকল দিনে পুস্তকালয়ের সাধারণ কার্য্য বন্ধ থাকিবে।

২। পরিষদের পাঠগৃহে বসিয়া যে কোনও ব্যক্তি উক্ত সময়ের মধ্যে যে কোনও পুস্তক দেখিতে ও পড়িতে পাইবেন, পড়িবার জন্য তাঁহাকে স্বাক্ষর করিয়া পুস্তক লইতে হইবে এবং পুস্তকালয় বন্ধ হইবার পূর্ব্বে গৃহীত পুস্তক প্রত্যর্পণ করিতে হইবে।

৩। পরিষদের সভ্য ব্যতীত অপর কাহাকেও পুস্তক গৃহে লইয়া যাইতে দেওয়া হইবে না। সভ্যের দেয় চাঁদা বার্ষিক অন্যূন ৩৲ তিন টাকা।

৪। কোনও সভ্যকে একসময়ে দুইখানির অধিক পুস্তক গৃহে লইয়া যাইতে দেওয়া হইবে না।

৫। এক খণ্ড পুস্তকের জন্য ৪৲ (চারি টাকা) এবং তদতিরিক্ত প্রত্যেক খণ্ডের জন্য ২৲ (দুই টাকা) পরিষদে জমা দিতে হইবে। উক্ত জমার টাকা ইচ্ছামত তুলিয়া লইতে পারা যাইবে, কিন্তু টাকা তুলিয়া লইলে আর পুস্তক দেওয়া হইবে না।

৬। দুর্মূল্য বা দুষ্প্রাপ্য পুস্তক কাহাকেও গৃহে লইয়া যাইতে দেওয়া হইবে না, এবং নিয়মিতভাবে চাঁদা আদায় না হইলে পুস্তক-প্রদান বন্ধ করা যাইবে।

৭। পুস্তক-বিশেষের জন্য (অর্থাৎ মূল্যবান্ অথচ দুষ্প্রাপ্য নহে এরূপ স্থলে) গ্রন্থাধ্যক্ষ স্বয়ং বিবেচনাপূর্ব্বক ৪৲ চারি টাকার অধিক জমাও দাবী করিতে পারিবেন।

৮। কোন সভ্যই একযোগে এক মাসের অধিক কাল কোনও পুস্তক রাখিতে পারিবেন না।

৯। যদি কোনও পুস্তক হারাইয়া যায় বা ব্যবহারের দোষে কোনরূপে পুস্তকের কোন ক্ষতি হয় তবে উহা যথাযথভাবে পুনঃ-স্থাপনের জন্য সমগ্র ব্যয় যে গ্রহীতার ত্রুটীতে ঐরূপ হইবে তাঁহাকে বহন করিতে হইবে।

১০। পুস্তক-গ্রহণকালে গ্রহীতাকে দানাদান-পুস্তকে স্বয়ং স্বাক্ষর করিতে হইবে, যদি তিনি অনুপস্থিত হন তবে তাঁহার স্বাক্ষর-সংযুক্ত পত্র প্রতিনিধির হস্তে পাঠাইতে হইবে। অন্যথা পুস্তক দেওয়া হইবে না।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073

Vol. XVIII, No. 2] [June, 1935.

१८५७ शकीये जैष्ठे १८श-वर्षस्य २य-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, Shyambazar, Calcutta.

Printed at
CALCUTTA ORIENTAL PRESS
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

শীঘ্র প্রকাশিত হইবে

সুরভারতী

সংস্কৃত-সাহিত্য-সম্বন্ধীয় বাঙ্গালা

মাসিক-পত্রিকা

"Calcutta Oriental Journal" "সংস্কৃত-সাহিত্য-পরিষৎ" ও "মঞ্জূষা" সম্পাদক, কলিকাতা বিশ্ববিদ্যালয়ের তুলনামূলক ভাষাতত্ত্বের ও সংস্কৃতবিভাগের অধ্যাপক

শ্রীক্ষিতীশচন্দ্র চট্টোপাধ্যায়

সম্পাদিত।

এই অভিনব মাসিক পত্রিকাতে বেদ, বেদান্ত, মীমাংসা, জ্যোতিষ, কাব্য, অলঙ্কার, আয়ুর্বেদ, পুরাণ প্রভৃতি বিবিধ-বিষয়ক প্রবন্ধ থাকিবে। তদ্ভিন্ন মহাকবি ভাসের অমৃতময়-লেখনীপ্রসূত নাটকগুলি সানুবাদ প্রকাশিত হইবে। বৈয়াকরণপ্রবর মহর্ষি পাণিনির অমর ব্যাকরণ বিস্তৃত টীকাদি পরিশোভিত হইয়া প্রকাশিত হইবে।

অগ্রিম বার্ষিক মূল্য ডাকমাশুল সমেত দুই টাকা মাত্র।

আজই গ্রাহক হউন।

শ্রীজ্যোতিষচন্দ্র চট্টোপাধ্যায়

কর্ম্মাধ্যক্ষ—সুরভারতী।

৬১এ, রামকান্ত বোস ষ্ট্রীট, বাগবাজার, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

June,	१८५७ शकीये ज्यैष्ठे	Vol. XVIII
1935.	१८श-वर्षस्य २य-संख्या	No. 2

रसमयी

षष्ठः परिच्छेदः

(षोडशखण्डस्य १६४ पृष्ठतोऽनुवर्तते)

तस्मिन्नेवाहनि सायं क्षेत्रमोहनस्य शयनागारे खुल्लतातभ्रातुष्पुत्रौ संलपन्तावास्ताम्। दिवा तावत् खुल्लतातमहोदयेन कपाटस्य बहिर्देशे गृहभित्तिषु च सर्वत्र रामनामानि विलिखितानि। अद्य द्वावेवैकस्यां शय्यायां शयिष्येते, उपाधानस्य चाधस्तात् कृत्तिवासविरचितं रामायणं रक्षिष्यते, गृहे च सर्वरात्रं प्रदीपः प्रज्वलिष्यति—एतत् सर्वं स्थिरीकृतम्।

क्षेत्रमोहनेनोक्तम्, तर्हि किं मया कर्तव्यं तात? अपि विवाहस्य रोध एव विधेयः?

खुल्लतातेनोक्तम्, न खलु तत्र किमपि प्रयोजनं पश्यामि।

"अथ किमपि पीडनोपद्रवादिकं सङ्घटेत?"

तातमहोदयेन क्षणं विचिन्त्योक्तम् भयकारणं किमपि नावलोकायामीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत् तयोक्तम्—उदेति मे मानसेऽभिलाषः कण्ठं ते पिनष्मीति।

नहि। न खलु प्रभविष्यत्यसौ तथा विधातुम्। यथा तथा वा भवतु सर्वथा पतिरेवासीति।

अन्यदपि यदुक्तम्—मा कुरु विवाहम् करोषि चेत् अशेषा ते दुर्गतिर्भविष्यतीति।

'अशेषा दुर्गतिर्भविष्यति' इत्यतः अहमेवाशेषां ते दुर्गतिं विधास्यामि इत्यर्थः कदाचिन्न स्यात्। तस्यार्थ एवमेव प्रतिभाति—समधिकवयसि विनिवृत्ते विवाहे यास्तावत् सांसारिक्योऽशान्तयः समुपनमन्ति ता एव तवापि सङ्घटिष्यन्ते इति।

क्षेत्रमोहनमहोदयस्तूष्णीं स्थितः। एकतस्तावज्जागर्ति भीतिर्मनसि, अपरतश्च नैव प्रभवत्यसौ निरोद्धुं विवाहवासनाम्।

निर्वृत्तः परेद्यवि वाग्दानविधिः। परं क्षेत्रमोहनस्य भौतिकपत्राधिगमवृत्तान्तोऽप्यचिरादेव बहुलीभूतः। क्रमेण च मन्त्रिणो रजनीमहोदयस्यापि श्रवणसरणिमापतितोऽयमुदन्तः, स खलु आङ्गलभाषाभिज्ञ इति पूर्वमेवोक्तम्। एतच् श्रुत्वासौ सशब्दमुच्चैर्जहास, उवाच च, भूतम् इति! विंशतितमेऽस्मिञ्छतके भूतस्यास्तित्वे प्रत्यय आधेयः?

विवाहवासरोऽपि निरूपितः फाल्गुनमासस्याष्टमदिवसः। केवलं दिनपञ्चकमेवावशिष्यते। उभाभ्यामेव पक्षाभ्यां सम्यक् सम्भारादिकं सम्भ्रियते। अपराह्णे बहिर्द्वारप्रकोष्ठे क्षेत्रमोहनमहोदयः कतिभिश्चित् सुहृज्जनैः परिवृतः स्थितः। एवु चैको राजकीयव्यवहाराजीवः, तस्य च समाख्या—मनोहरमहोदयः। पारेचत्वारिंशमस्य वयः। नेत्रयुगले च सुवर्णमयमुपनेत्रम्। शिरस्तावदस्य सर्ज्जारुरोमसदृशैः केशसमूहैर्निचितम्। मुखमण्डलं प्रभूतश्मश्रुगुम्फसमावृतम्, पाणौ दीर्घाः कररुहाः, किं बहुना जनोऽयं थियसफिष्ट एव। क्षेत्रमहोदयस्य भौतिकपत्रप्राप्तिवृत्तान्ताधिगमानन्तरमेव मनोहरमहोदयेन संस्थापितं तेन साकं मित्रत्वम्। तत्र चासीदपरः कश्चन नव्यतरुणः सुरेन्द्रनाथाभिधानः। अयम् एल ए परीक्षाम् उत्तीर्णः शिक्षितः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोक्तारपदवाच्यो व्यवहाराजीवः। सुबहून्याङ्गलभाषामयाण्याख्यायिका-पुस्तकानि वाचितान्यनेन।

सुरेन्द्रनाथेनोक्तम्, क्षेत्रमहाशय, अत्र मे किञ्चिद् वक्तव्यं वर्तते। बहुशः खलु पठितमाख्यायिकाग्रन्थेषु यद् बाष्पीयशकटादीनां सङ्घर्षे वा पोतभङ्गे वा अन्यस्मिन् वा तथाविधे व्यतिकरे सर्वैरेव प्रतीयते अमुकस्तावन्मृतः, मृत्योः साक्षिणोऽप्युपलभ्यन्ते, परं ग्रन्थस्यान्तिमे भागे सन्दृश्यते जीवत्येवासाविति। अत एव जीवत्येव वा भवतः पत्नी, कूटपत्रं वेदं भवताऽधिगतम् इति मे प्रत्ययः। पत्रमिदं तदीयमेव हस्ताक्षरं विस्पष्टं प्रकाशयतीति भवतां द्रढीयान् विश्वासः, अतो जीवत्येव भवतां पत्नी इत्यवश्यमेव प्रत्येतव्यम्। अस्यां हि विंशतितम्यां शताब्द्यां कथमपि वेतालानामस्तित्वं न शक्यते प्रत्येतुम्।

तच्छ्रुत्वा थियसफिष्ट-व्यवहाराजीवमहोदयेनोक्तम्, किमिति भद्रमहोदय! किमिति विंशशताब्द्यां वेतालानामस्तित्वं प्रत्येतुं न प्रभवति भवान्?

तरुणेन मोक्तारमहोदयेनोक्तम्, मया कदापि न वीक्षितमिति।

तदाकर्ण्य मनोहरमहोदयेन विद्रोनेव विहस्योक्तम्, अपि कदापि प्रत्यक्षीकृतो भवता सम्राट् सप्तमैडवार्डमहाभागः।

न हि, नैव प्रत्यक्षीकृतः।

अपि प्रत्येति भवान् सोऽस्तीति।

अथ किम्। तत्र बीजमेतदेव यद्यपि मया न प्रत्यक्षीकृतस्तथापि परः-सहस्रैः पुरुषैः प्रत्यक्षीकृतोऽसौ, चित्राणि च बहूनि सन्दृष्टानि, परं "मया प्रत्यक्षीकृतो वेतालः" इत्यद्यापि कोऽपि वदन्न वीक्षितः। सर्वैरेवोच्यते, श्रुतमस्माभिरतिश्रद्धेयपुरुषमुखात् तैः किल दृष्टो वेताल इति।

मनोहरमहोदयः सुनिविडश्मश्रुजालाभ्यन्तरे दीर्घनखराजिं सञ्चालयन्नवोचत्, भवतोक्तम्—परःसहस्रैः सन्दृष्टो जनैः सम्राट् इति। एवमेव परःसहस्रैः प्रत्यक्षीकृतोऽशरीरी जीवात्मा। भवतोक्तम्, सम्राजोऽदूरविंशानि चित्राणि सन्दृष्टानि भवता। एवं वेतालानामप्यदूरविंशानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्राणि प्रभवामि भवते प्रदर्शयितुम्। अथ द्रष्टुमिच्छति भवान्, आगम्यतां सद्यो मदीयं भवनम्। मदीये कचन पुस्तके केटिकिडित्यस्याश्चित्रं वर्तते। प्रथमचार्ल्ससमाख्यस्याऽऽङ्लनरपतेः शासनसमये समवर्तत केटिकिडभिधाना कन्यका। षोडशे वर्षे पदमर्पयन्त्येवासौ व्ययुज्यत प्राणैः। व्यतीतशतकस्य मध्यभागे आमेरिकाया युरोपस्य च तेषु तेषु प्रदेशेषु सुबहुषु सेयाँसेष्वाविर्बभूव स्थूलशरीरं परिगृह्य केटिकिङ्। तस्या हस्तनाडी परीक्षिता, देहाभ्यन्तरे चासिधेनुकां सम्प्रवेश्य दृष्टम् मनुष्याणामिव तस्या अपि शरीराद् विनिर्गच्छन्ति रुधिरबिन्दव इति। तस्याश्छायाचित्रमपि गृहीतम्, ततश्च विनिर्मितमालेख्यं मदीये पुस्तके सन्निविष्टं वर्तते, मम गृहे आगन्तव्यम्, अहं प्रदर्शयिष्यामि।

सुरेन्द्रमहोदयेन विहस्य प्रोक्तम्, अहो भवतामार्जवं यदीदृशेष्वप्यु-द्भावचेषु प्रलपितेष्वाधीयते प्रत्ययः। भूतास्तित्ववादिनां कति वा विप्रलम्भनचेष्टितानि न समुद्घाटितानि! केटिकिडः शरीरे छुरिकाप्रवेशनेन रुधिरपातः समजनि इत्येव समुपन्यस्तं भवता प्रमाणत्वेन विश्वसनीयत्वे। मया पुनरेतद्विपरीतमेव मन्यते। यदि छुरिकया वेधनेनापि नास्रोष्यद् रुधिरधारा, अथ च शरीरी कश्चन प्राणी दण्डायमानः प्रत्यक्ष्यकरिष्यत, तदैव मे प्रत्ययोऽभविष्यत्, नेदं परमार्थतो मनुज इति। प्रकृतमिदानीं पर्यालोच्यताम्। भूतं तावद् गृहस्य पुरस्ताद् वटवृक्षे निवसति। यदा तावत् प्रभवति पत्रं विलेखितुं तदा विनैवायासं प्राभविष्यदत्रागत्य वक्तव्यमात्मीयं विवरीतुम्। परं तथाऽकृत्वा पत्र-पत्रावरणलेखनीमसीप्रभृतीनां संग्रहक्लेशस्य पदमुपनीत आत्मा। अतिसन्निधाने एव वर्तत इत्यत्रागत्य काष्ठमयाधारे पत्रस्य संरक्षणमेव सुकरमासीत्, तथापि स्वीकृत्य श्रमातिशयं क्रोशार्धं गतं पत्रप्रापणाधिकरणे स्थापयितुं पत्रम्। ततश्च ताम्रमुद्राद्वितयं व्ययीकृत्य 'टिकिट्'पत्रस्यापि क्रय आवश्यकीभूतः। महोदय, भौतिकजगति मुद्राश्चेत् परमार्थत एवैवं सुलभास्तर्हि वरं तत्रैव गत्वा व्यवहाराजीववृत्तिमुपक्रंस्ये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनोहरमहोदयः किञ्चिदिवापरक्तोऽवदत्, भद्रमुख, नेदं नर्मोचितं वस्तु। इमे तावद् गभीरा विषयाः। हिमालयात् तावन्महात्मानोऽप्यन्तरान्तरा पत्रप्रापणाधिकरणेन प्रेषयन्ति पत्राणि। न खलु प्रगाढं परिशीलनं गरीयसीं च चर्चामन्तरेण विषयेऽस्मिन् युज्यते स्वाभिमतं प्रकटयितुम्। कुटुम्बिलालाभिधानः कश्चन महात्मा सुबहून्येवंविधानि पत्राणि प्रेषितवानस्मदीयाय मादाम् ग्लाभात्स्कये। तैरपि इच्छामात्रेणैव साक्षात् प्रादुर्भूय वक्तव्यं वक्तुं सुकरमासीत्, अथवा पत्राणि समुत्पात्य काष्ठासनोपरि निक्षेपणमपि सुकरमासीत्। तथापि पत्रप्रापणाधिकरणद्वारेणैव प्रेषितानि तैः पत्राणि।

एतदाकर्ण्य शिक्षितेन मोक्तारमहोदयेन मृदु विहस्योक्तम्, अहो! कः कालः कुटुम्बिलालस्य पत्राणां कूटत्वेन प्रतिपादितस्य। डाक्तारहज़सनसमाख्यः कश्चन विज्ञानवित् स्वयं समागत्य भारतवर्षं विषयमिमं समनुसन्धाय विस्पष्टमेव प्रतिपादितवान् मादाम् ग्लाभात्स्क्या दामोदरसमाख्येन चापरेण केनचन विनिर्मितानि कूटपत्राणि।

निशम्यैतत् थियजफिष्टमहोदयेन सभ्रूभङ्गमुक्तम्—मा तावदधिगीष्ठाः ईर्ष्यालूनां जनानां तानि पुस्तकानि। मम समीषमागन्तव्यम्, समीचीनानि पुस्तकानि मया दास्यन्ते। तेषां वाचनेनाखिलोऽविश्वासो विलीयेत। मादाम्ग्लाभात्स्क्या महत्त्वं तस्या आइसिस् आनूभेल्ड् पुस्तकपठनेनैव प्रत्येष्यति भवान्।

सुरेन्द्रमहोदयेन सस्मितमुक्तम्, न खलु ततपुस्तकमधीतं मया, परम्, आइसिस् भेरी माच् आनभेल्ड् अर् दि ट्रोरि अव् दि ग्रेट् महात्मा होक्स पुस्तकं पठितमेव। अत्रैव पुस्तकालये वर्तते। द्रष्टुमिच्छसि चेत् प्रभवाम्यानीय प्रदर्शयितुम्।

वचनेनानेन मनोहरमहोदयः क्रोधेनाग्निकल्पः सञ्जातः। उक्तवांश्च, अद एवैकं वचनं शिक्षितं भवद्भिः। न खलु विद्यते तथाविधं महद् वस्तु यत् खलु न शक्यते विषयीकर्तुं गालीनाम्। खलैः शठैश्च दुरात्मभिर्मिथ्यैव प्रचारितो मादाम्ग्लाभात्स्क्या अपराधवृत्तान्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवसरे चास्मिन् समुत्थितो बहिः शब्दः, आर्य, वर्तते पत्रम् इति। परस्मिन्नेव मुहूर्ते प्रविश्य पत्रवाहकेण समर्पितं क्षेत्रमोहनमहोदयस्य पाणौ पत्रमेकम्। गृहीतमात्रे एव पाणौ पत्रे शून्याः सञ्जाता दश दिशः क्षेत्रमोहनमहोदयस्य। उक्तञ्च तेन, पुनश्च भोस्तदेव।

उन्मोच्य पत्रस्य बहिरावरणं वाचयित्वा च सर्वेषां पुरतो निक्षिप्तं पत्रम्। थियजफिष्टमहोदयेन महताभिनिवेशेन गृहीत्वा पत्रमनुवाच्य च मोक्तारमहोदयस्य हस्ते संन्यस्तम्।

पत्रं तावदीदृशमेव—

श्रीश्री दुर्गा

स्वहायः।

प्रणामपूर्वकनीवेदनञ्च विसेसः,

अहो ते साहसम्! वाग्दानमपि संवृत्तम्। त्वं मोन्नसे अहं यत् पत्रं त्वां लिखिता तत् वृथा भीतिप्रदर्शकम्। न खलु रसीब्राह्मणी तादृशी स्त्री। मया निषिद्धोऽपि त्रिवाहं करिस्ससि। इदानीमप्यवहितो भव। इमां दुर्मोतिं परित्यज। नो चेत् कदाचिन्निशीथे यदा त्वं निद्रितः स्थास्यसि तदा वटवृक्षात् अवतिर्य तव वक्षसि दशमनमेकं प्रस्तरं संस्थापयिस्यामि। निद्रा ते कदापि न प्रबोधमेष्यति।

रसमइ।

क्रमेण सर्वैरेव वाचितं पत्रम्। वाचयित्वा च स्तब्धा अतिष्ठन्नखिलाः सभासदः। शिक्षितस्य मोक्तारमहोदयस्यापि परिम्लानं वदनकमलम्। तथापि तेन दूरं निक्षिप्य संशयपिशाचिकामुक्तम्—अङ्ग क्षेत्रमहोदय, पुनरपि तावत सम्यक् परीक्ष्यतां लेखनम्। अप्येतत् परमार्थत एव भवतः पत्न्या हस्ताक्षरम्। आहोस्वित् कापि संशयोन्मेषको विशेषो वर्तते।

क्षेत्रमहोदयेनोक्तम्, नास्ति लेशतोऽपि संशयः। केवलं हस्ताक्षरसंवादश्चेत्, तर्ह्यपि कदाचित् समदेक्ष्यम्। तस्या यत्र यत्र या या वर्णाशुद्धयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वदैवाभवन्, पत्रेऽप्यस्मिंस्ता एव सन्दृश्यन्ते। सा हि सर्वदैव श्रीद्वितयमेकत्र विलिख्य किञ्चिद्दूरे दुर्गाशब्दं लिखति स्म—पत्रद्वितयेऽपि तथैव वर्तते। किञ्च, पत्रे तथाविधा वाचोयुक्तिर्वर्तते या किल जीवन्त्या तया सदैव प्रयुक्तासीत्।

सर्व एव तूष्णीं स्थिताः। व्यतीते च कियतिचित् काले सुरेन्द्रमहोदयः कण्ठं संशोध्यापृच्छत्, अपि समुपस्थित आसीद् भवांस्तस्या मरणावसरे ?

क्षेत्रमहोदयेनोक्तम्, वाढम्।

शवमनुसृत्य श्मशानभूमिं गतो भवान् ?

अथ किम्।

चिताया उपरि देहस्य विन्यासादूर्ध्वं कदापि प्रत्यक्षीकृतं तस्या मुखम् ?

न प्रत्यक्षीकृतम्! मयैव तावत् स्वयं मुखाग्निर्विहितः। न खलु यत् त्वया मन्यते तत्तथा। कोऽपि प्रमादो न समजनि।

तरुणमोक्तारस्तदानीमधोवदनः स्थितः। तत्रैकेनोक्तम्—

There are more things in heaven and earth, Horatio, than are dreamt of in your philosophy.

(भो होरेशिओ, विद्यन्ते खलु स्वर्गे मर्त्ये च तथाविधानि बहूनि वस्तूनि येषां सत्ता स्वप्नेऽपि न सम्भाव्यते दर्शनशास्त्रेषु।)

अपरेण केनचनोक्तम्, अथ किम्। दृश्यतां तावदस्मद्देशे अथवा कथमस्मद्देश एव केवलम्—सर्वेष्वेव देशेषु आदिमकालादारभ्य प्रवृत्तो यः प्रत्ययप्रवाहः अस्ति भूतमिति कश्चन पदार्थः स किं सर्वथा निर्मूल एव ?

राजकीयव्यवहाराजीवमहोदयेनोक्तम्—न खलु केवलमन्यविश्वास एवायम्। विगतपञ्चाशद्वत्सरेषु युरोपे आमेरिकायां च निःसंशयमेव प्रतिपादितं प्रेतानामस्तित्वम्। आसीत् स समयो यदा वैज्ञानिकप्रवरेण टिण्डालेनाप्युपहासपुरःसरं प्रत्याख्यातं भूतानामस्तित्वम्। सुप्रथितपत्रिकासम्पादकेन ष्टेड्महोदयेन तस्य कस्मिंश्चित् पुस्तके विलिखितम्—Of all the vul-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

gar superstitions of the half-educated, none dies harder than the absurd delusion that there are no such things as ghosts (अर्धशिक्षितानां जनानां मानसेषु ये तावद् विलसन्ति व्यामोहास्तेषु नास्ति भूतमित्येव संस्कारो दुष्करतमः समुच्छेत्तुम् ।) एवमुक्त्वा लब्धविजय इव वीरोऽपातयत् कटाक्षं सुरेन्द्रमहोदये ।

सन्ध्या समागता । अतस्तस्मिन् दिने सभाभङ्गः समजनि । तस्य वटवृक्षस्य अधस्ताद् गच्छतः सुरेन्द्रमहोदयस्यापि गात्राणि छमछमायन्ते स्म ।

(क्रमशः)

देवभाषा-देवनागराक्षरयोरुत्पत्तिः

[निबन्धकः—श्रीद्विजेन्द्रनाथगुहचतुर्धुरीणः ।]

"चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥"

ऋग्वेद ४।५८।३

अत्र व्याकरणमहाभाष्यभाषको गोनर्दीयो गोणिकातनयो नानादर्शननिष्णातो भगवान् पतञ्जलिः प्राह—"चत्वारि शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादाः । त्रयः कालाः भूतभविष्यद्वर्त्तमानाः । द्वे शीर्षे । द्वौ शब्दात्मानौ, नित्यः कार्यश्च । सप्त हस्तासो अस्य । सप्त विभक्तयः । त्रिधा बद्धः । त्रिषु स्थानेषु बद्धः । उरसि कण्ठे शिरसीति । वृषभो वर्षणात् । रोरवीति शब्दं करोति । कुत एतत् । रौतिः शब्दकर्मा । महो देवो मर्त्यां आविवेशेति । महान् देवः शब्दो मर्त्यां मरणधर्माणो मनुष्याः तानाविवेश । महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम् ।" (इति महाभाष्ये पस्पशायाम्) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रैव भगवान् यास्कः—"चत्वारि शृङ्गेति वेदा वा एत उक्ताः। त्रयो अस्य पादा इति सवनानि त्रीणि। द्वे शीर्षे प्रायणीयोदयनीये। सप्त हस्तासः सप्त च्छन्दांसि। त्रिधा बद्धस्त्रेधा बद्धो मन्त्रब्राह्मणकल्पैः। वृषभो रोरवीति रोरवणमस्य सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिर्यदेनमृग्भिः शंसन्ति यजुर्भिर्यजन्ति सामभिः स्तुवन्ति महो देव इत्येष हि महान् देवो यद्यज्ञो मर्त्यां आविवेशेत्येष हि मनुष्यानाविशति यजनाय"। (इति नैरुक्ते परिशिष्टे—१३।१।७)।

यद्वा—

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥

ऋग्वेदे १।१६४।४५, अथर्ववेदेऽपि ९।२५।२७।२९।१

अत्रापि च यास्काचार्यपादाः—"चत्वारि वाचः परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मेधाविनो गुहायां त्रीणि निहितानि नार्थं वेदयन्ते। गुहा गूहतेस्तुरीयं त्वरतेः। कतमानि तानि चत्वारि पदान्योङ्कारो महाव्याहृतयश्चेत्यार्षम्। नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः। मन्त्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिकाः। ऋचो यजूंषि सामानि चतुर्थी व्यावहारिकीति नैरुक्ताः। सर्पाणां वाग्वयसां क्षुद्रस्य सरीसृपस्य चतुर्थी व्यावहारिकीत्येके। पशुषु तृणवेषु मृगेष्वात्मनि चेत्यात्मप्रवादाः। अथापि ब्राह्मणं भवति सा वै वाक् सृष्टा चतुर्धा व्यभवदेष्वेव लोकेषु त्रीणि पशुषु तुरीयम्। या पृथिव्यां साऽग्नौ सा रथन्तरे यान्तरिक्षे सा वायौ सा वामदेव्ये। या दिवि सादित्ये सा बृहति सा स्तनयित्नौ। अथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधुस्तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति या च देवानां या च मनुष्याणामिति।" (इति नैरुक्ते परिशिष्टे—१३।१।९)। अथैषाक्षरस्य स्तुतिः तावत् ऋग्वेदे १।१६४।३९, अथर्ववेदे ९।२८।८, तैत्तिरीय आरण्यके १०।१३, पुनः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋग्वेदे १०।७१।८, नैरुक्ते परिशिष्टे च १३।१।१०-१३ वर्तते। अत्रत्य' दुर्गाचार्य्यव्याख्यानमपि द्रष्टव्यम्)।

भूयश्च नैरुक्ते उपोद्घातप्रकरणे पदचतुष्टयोद्देशे उक्तम्—"तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति"। अनन्तरं सप्तचत्वारिंशदक्षराण्युद्भूतानीति श्रूयते। यथा—"सर्वे स्वरा इन्द्रस्यात्मानः। सर्वे उष्माणः प्रजापतेरात्मानः। सर्वे स्पर्शा मृत्योरात्मानः।" (सामवेदीयछान्दोग्योपनिषद् २।२२।३)। अत्र स्वराणाम् इन्द्रः एव कर्त्ता (अर्थात् सर्वे अकारादयश्चतुर्दश स्वरा देवराजेन इन्द्रेण उद्भाविताः)। शषसहाः—प्रजापतिना चन्द्रेण च। कादयो मपर्यन्तानि समुदयाक्षराणि महादेवेन च वर्णितानि (ककारादयः स्पर्शवर्णा यरलवाश्च)। अत्रैव शाङ्करभाष्यम्—"सर्वे स्वरा अकारादयः इन्द्रस्य बलकर्मणः प्राणस्याऽत्मानो देहावयवस्थानीयाः। सर्व उष्माणः शषसहादयः प्रजापतेर्विराजः कश्यपस्यैवाऽत्मानः। सर्वे स्पर्शाः कादयो व्यञ्जनानि मृत्योरात्मानः * * * *

* * * * *"

इन्द्रादयो वेदे देवताः प्रख्याताः। तेषाम् आवासात् (त्रिदशालयात् देवनगराद् वा) सप्तचत्वारिंशदक्षराण्याविर्भूतानि। तन्निमित्तमेव "देवनागरः वर्णः" इति कथ्यते, तदन्विता भाषा "देवभाषा" इति व्यपदिश्यते। तथाहि —"एते वै देवाः प्रत्यक्षं यद् ब्राह्मणाः।" ऋक्संहितायामपि नेम ऋषिः (८।१००।११)—"देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।"

अत्र सायणभाष्यम्—"एषा माध्यमिका वाक् सर्वप्राण्यन्तर्गता धर्माभिवादिनी भवतीति विभूतिमुपदर्शयति यां देवीं द्योतमानां माध्यमिकां वाचं देवा माध्यमिका अजनयन्त जनयन्ति तां वाचं विश्वरूपाः सर्वरूपाः व्यक्तवाचः अव्यक्तवाचश्च पशवो वदन्ति ततपूर्वकत्वात् वाक्यप्रवृत्तेः * * * *"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीर्घतमा औचथ्यः पुनरेव—"मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम्" (ऋग्वेद १।१६४।१०)। सायणभाष्यम् तत्रैव—

"* * * * *

दिवः पृष्ठे द्युलोकस्योपरि अन्तरिक्षे मन्त्रयन्ते गुप्तं परस्परं भाषन्ते देवाः किं विश्वविदं विश्ववेदनसमर्थां विश्वैर्वेदनीयां वा अविश्वमिन्वाम् असर्वव्यापिनीं वाचं गर्जितलक्षणाम् अमुष्य आदित्यस्य संबन्धिनीं मन्त्रयन्ते इत्यर्थः।" तस्मिन् काले भाषा अव्याकृता अभूत्। यथा—"वाग् वै पराची अव्याकृता अवदत्।" देवसृष्टा भाषा 'देवभाषा" सर्वजनमान्या सर्वविदिता च। ततश्च, चतुर्मुखस्य आदेशात् इन्द्र-चन्द्र-महेशाः "व्याकरणं" नाम शब्दशास्त्रं विरचयाम्बभूवुः।

तत्र माहेश-व्याकरणविषये किंवदन्ती-

"यान्युज्जहार माहेशाद् व्यासो व्याकरणार्णवात्।
किन्तानि पदरत्नानि सन्ति पाणिनिगोष्पदे॥" इति।

पक्षान्तरे यमस्य शब्दशास्त्रं न विद्यते इत्येव प्रसिद्धिः। तथाहि पाणिनीयशिक्षाग्रन्थे, (३)—"त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते स्थिताः"। अत एव अत्र जगति त्रेतायुगस्य इन्द्र-चन्द्र-भूतेशाः आदितोऽक्षरोत्पादनकर्त्तार एवेति सम्यग् बोध्यम्।

प्रत्याहारसूत्राण्यखिलानि माहेश्वराण्येव विराजन्ते। गार्ग्य-गालव-शाकटायन-आपिशलि-काश्यप-चाक्रवर्म्मण-भारद्वाज-शाकल्य सेनक- स्फोटायनाः इति दश वैयाकरणाः पाणिनिमुनेः पूर्वाचार्याः आसन्। बहुशः सूत्राणि इतस्ततः प्राक् अकारिषुः। पश्चात् शालातुरीयो दाक्षीपुत्रो वैयाकरणकेशरी पाणिनिः सर्वेषां शिक्षार्थिनां सौकर्याय "अष्टाध्यायी-सूत्रपाठम्" (अष्टकं पाणिनीयं वा) व्यरीरचत्।

पूर्वस्मिन् कालेऽपि षट्सु वेदाङ्गेषु व्याकरणं नाम शब्दशास्त्रं प्राधान्येन परिगण्यते स्म। तथाचोक्तं—"प्रधानं च षडङ्गेषु व्याकरणम्। * * दुष्टाञ्छब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्।" (महाभाष्ये) पस्पशः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपिच—"सर्ववेदपारिषदं हीदं शास्त्रम्।" पाणिनि सूत्रभाष्यकारकः पातञ्जलिः (पाः ६।३।१४, अधस्तात्।) वैदिकलौकिकसंस्कृतपठनविषये व्याकरणस्य नितरां प्रयोजनमस्ति। तत्र वाक्यपदीये भर्त्तृहरिणा वर्णितम्—"पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते। तथैव लोके विद्यानामेषा विद्या परायणम्"। (१।१४) अन्यच्च—"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥" (१।१२४)। तत्रैव पुण्यराज-टीकायाम्—"सा हिवाग्रूपता प्रत्यवमर्शः सविकल्पकज्ञानं तत्सम्पादिकेत्यर्थः" (१।१२५)।

शार्मण्यदेशोत्पन्नेनेलंडदेशनिवासिना मोक्षमूलरमहोदयेन महर्षेः पाणिनेर्विषये कीर्त्तितम्—

"In grammar, I challenge any scholar to produce from any language a more comprehensive collection and classification of all the facts of a language than what we find in Pāṇini's Sūtras."

पाणिनीय शब्दशास्त्रप्रवीणेनः अध्यापकेन Goldstücker महाभागेन अभिव्यक्तं—

"Pāṇini's work is indeed a kind of natural history of the Sanskṛt language."

अन्यच्च अध्यापकः Monier Williams अपि आह—"The grammar of Pāṇini is one of the most remarkable literary works that the world has ever seen, and no other country can produce any grammatical system at all comparable to it, either for originality of plan or analytical subtlety. * * His Śāstras are a perfect miracle of condensation." (*Indian Wisdom*, p. 172).

सूरिपुङ्गव-डाक्तार डि, आर, भाण्डारकरेणाप्युक्तम्—

"Pāṇini occupies a unique position in the history of Sanskṛt literature. His system of Grammar is a marvel of technical perfection, a monument of encyclopædic research and originator of the philosopy of linguistics. All the speculations of his predecessors were superseded by his thorough, original and far-reaching work, and he at once

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

became the founder of a School of Grammar which has taken such a complete possession of the field that it seems destined never to escape it. It is thus no wonder that Pāṇini was held in such high esteem that he was elevated to the rank of a Ṛṣi or Seer. And this estimation of his countrymen has been upheld even by the European scholars who freely acknowledge that the modern Science of Comparative Philology is much indebted to the exposition of Grammar by Pāṇini and his school." (A Historical investigation on Pāṇini together with a brief account of Kātyāyana and Patañjali. By R. K. Gupta. With an introduction by Dr. D. R. Bhāṇḍārkar.)

व्याकरणं विना पदपदार्थानां सम्यग् ज्ञानं न लभ्यते स्म। उक्तञ्च—

"निघण्टुना विना वैद्यो विद्वान् व्याकरणं विना।
अनभ्यासेन धानुष्कस्त्रयो यान्तीह हास्यताम्॥"

बहवो वैयाकरणा अस्मिन् भारतवर्षे प्रादुर्भूता आसन्। जैनहेमचन्द्रस्य प्राकृतव्याकरणम् अद्यापि विद्यमानमस्ति। वररुचिकृतः प्राकृतप्रकाशोऽपिबहुजनमान्यः सर्ववेद्यश्च विद्यते। वार्त्तिकमहाभाष्यवाक्यपदीयभाषावृत्तिकाशिकान्याससिद्धान्तकौमुदीचान्द्रजैनेन्द्राभिनवशाकटायन (न तु उणादिसूत्रकारः शाकटायनः)-हैम (यद्वा, सिद्धहेमचन्द्राभिधस्वोपज्ञशब्दानुशासन) सारस्वतसुपद्मसंक्षिप्तसारमुग्धबोधलघुकौमुदीप्रयोगरत्नमालाकारिकावलीत्येवमादीनि बहूनि व्याकरणानि बहवश्च वैयाकरणाः श्रूयन्ते। वेदतत्त्वार्थप्रकटनाय प्रातिशाख्यानि प्रणीतानि। इह तु वेदस्य व्याकरणविशेषो ज्ञेयः। ऋग्वेदस्य ऋक्प्रातिशाख्यं (महर्षिशौनककृतम्), सामवेदस्य पुष्पसूत्रम् (सामप्रातिशाख्यं वा, महर्षिपुष्पप्रणीतम्), कृष्णयजुर्वेदस्य तैत्तिरीयप्रातिशाख्यं, शुक्लयजुर्वेदस्य वाजसनेयिप्रातिशाख्यं (महर्षिकात्यायनविरचितम्), अथर्ववेदस्य अथर्वप्रातिशाख्यं (महर्षिशौनककृतम्) इति। ततश्च वेदषडङ्गानि शास्त्राणि रचितानि। तथाहि—

"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः। ज्यौतिषामयनं चैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षडङ्गो वेद उच्यते ॥" तत्र पाणिनीययाज्ञवल्क्यनारदीया इत्यादयः शिक्षाग्रन्थाः। यज्ञरीतिर्यत्र विद्यते स एव कल्पः। त्रिप्रकारास्ते श्रौतगृह्यसामयाचारिकाः। वेदार्थावबोधनाय आग्रायणआचार्यएकेऐतिहासिकाऔदुम्बरायण औषमन्यव औणभावामःकात्थक्यकौत्सक्रौष्टुकिगार्ग्यगालवचर्मशिरातैटिकिनैदानानैरुक्तापूर्वयाज्ञिकाब्राह्मणमूयाज्ञिकावार्ष्यायणिवैयाकरणाशतवलाक्षशाकटायनशाकपूणिशाकल्यस्थौलाष्ठीविकाठकहारिद्रविकब्राह्मण इत्यादयो महामुनयो निरुक्तानि (वैदिककोषाणि) व्यरचयन्। भगवता पिङ्गलाचार्येण छन्दोग्रन्थो रचितः। पश्चात्, वृत्तरत्नाकरछन्दोमञ्जरीश्रुतबोधप्रभृतयो छन्दोग्रन्थाः प्रवृत्ताः। लगधनामा कश्चित् मुनिविशेषः सर्वादौ ज्योतिषशास्त्रं रचयामास। परतो भृगुनारदादयः बहून् ज्योतिषग्रन्थान् अलिखन्। वैदिकयुगे तु लगधेन 'पञ्जिका' च उद्भाविता इति संभवति स्मैव। शेषमुनेः यजुर्व्वेदीयवेदाङ्गज्योतिषं प्रचलितमासीत्। तथाचोक्तं—"वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः। तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम् ॥" (वेदाङ्गज्योतिष, ३)।

अव्याकृता देवभाषा काले व्याकृतिमभजत्। तदानीं "संस्कृतं" अभिहितम्। दण्डिना तु "संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः" (काव्यादर्श १।३३), इत्युक्त्वा दैवी वागेव प्रकृतिप्रत्ययविभागाख्यसंस्काररूपेण संस्कृतभाषेति व्याख्यातम्। वाग्भटालङ्कारे च (२।२) स्पष्टतः ध्वनितम्,—

"संस्कृतं स्वर्गिणां भाषा शब्दशास्त्रेषु निश्चिता।" उक्ता संस्कृतभाषा भूमण्डले सर्वैरेव सर्वत्र प्रज्ञाता। तथाच, ऋग्वेदीयकौषीतकिब्राह्मणे ७।६,—"पथ्या स्वस्तिः तस्माद् उदीच्यां दिशि प्रज्ञाततरा वाग् उद्यत। यो वा तत आगच्छति तस्य वा शुश्रूषन्त इति ह स्माह एषा हि वाचो दिक् प्रज्ञाता।" (Ed. by B. Lindner, Jena, 1887, p. 31). इति।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघनादवधम्

द्वादशः सर्गः

[निबन्धकः—श्रीनित्यगोपालविद्याविनोदः]

कवीनामादिमं वन्दे वाल्मीकिं कविकुञ्जरम् ।
राज्ञो दासो यथा तीर्थं त्वत्पादमनुयाम्यहम् ॥१॥
ध्यात्वा तव पदाम्भोजमहोरात्रमसंख्यकाः ।
कवयोऽमरभावाप्ता यशोमन्दिरपूजिताः ॥२॥
श्रीकण्ठपदभाक् सूरिर्भवभूतिस्तथाऽमरः ।
कालिदासः सरस्वत्या वरपुत्र इति श्रुतः ॥३॥
श्रील-भर्त्तृहरिः श्लाघ्यो मुरारेर्मुरलीध्वनि- ।
प्रीतं जगत् कीर्त्तिवासः कृत्तिवासो जगन्मणिः ॥४॥
क्रीडाम्यहं कथं तात त्वत्प्रसादं विना गुरो ।
कवितासरसि प्रीतैं राजहंसकुलैः समम् ॥५॥
काव्योद्यानात्तवाऽऽचार्य्य सञ्चित्य कुसुमावलीम् ।
माल्यं ग्रन्थितुमिच्छामि मातृभाषाविभूषणम् ॥६॥
दीनोऽहं कुत्र प्राप्नोमि रत्नालीं त्वत्कृपां विना ।
रत्नाकर कुरु कृपां शिष्ये निष्किञ्चने प्रभो ॥७॥
हिरण्मयी पुरी लङ्का सुवर्णदीपमालिनी ।
राजेन्द्राणी यथा रत्नहारा राजति हर्षिता ॥८॥
तूर्य्यं ध्वनति गेहेषु नर्त्तक्यो नृत्यविह्वलाः ।
गायन्ति गायकाश्चारु क्रीडन्ति नायिकागणाः ॥९॥
अट्टहासपराः काश्चिदन्या निधुवनोन्मदाः ।
अपराः शीधुपानेन मत्ता धावन्ति सर्वतः ॥१०॥
द्यूतं नृत्यन्ति माल्यानि फलपुष्पयुतानि च ।
उत्पतन्ति केतनानि क्षौमाणि गृहशीर्षके ॥११॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वातायनेषु दीप्यन्ते मणिदीपाः सहस्रशः ।
यान्ति लोकास्तथायान्ति सन्ततं राजवर्त्मनि ॥१२॥
उत्तिष्ठति च सर्वत्र जन-कोलाहलो महान् ।
महोत्सवदिने यादृङ् माद्यन्ति पुरवासिनः ॥१६॥
वृष्यन्ते कुसुमासाराः परितो नगरीं शुभाम् ।
गन्धभारं वहन् स्निग्धो मन्दं वाति समीरणः ॥१४॥
जागर्त्तीव निशीथेऽद्य लङ्का कृत्स्नेति धावति ।
निद्रा द्वारेषु लोकानां विरामवरदायिनी ॥१५॥
रामं सलक्ष्मणं युद्धे श्वो हनिष्यति रावणिः ।
निराकर्त्ता च शत्रून् स फेरून् सिंहो यथा नदन् ॥१६॥
वर्द्धमानेष्यति तथा ज्ञातिवैरिविभीषणम् ।
वीक्ष्य चन्द्रं तमोमुक्तं विश्वं प्रीतिमवाप्स्यति ॥१७॥
आशाकुहकिनी गीतमेतद् गायति सर्वतः ।
पृथि तीये गृहे द्वारे श्रुत्वा हृष्टाः क्षपाचराः ॥१८॥(विशेषकम्) ।
अशोकवनिकामध्ये सीता राघववल्लभा ।
शोकार्त्तैका तमश्छन्ने कुटीरेऽश्रूणि मुञ्चति ॥१९॥
भीमाश्चेट्यः सतीं हित्वोत्सवकौतुकनिर्भराः ।
हीनप्राणां मृगीं त्यक्त्वा व्याघ्रीवाटन्ति दूरतः ॥२०॥
तत्र म्लाननना देवी सूर्य्यकान्तमणिर्यथा ।
आकरे तमसाच्छन्ने यद्वेन्दिरोदधेस्तले ॥२१॥
स्वनति श्वसनो दूराद् विलापीव क्षणे क्षणे ।
पत्राणि मर्मरायन्ते यान्ति मूकाश्च पक्षिणः ॥२२॥
महीरुहैर्मनस्तापादुन्मुक्तवेशवत् क्षितौ ।
पतितानि तले तेषां कुसुमानि समासते ॥२३॥
रुदत्य इव धावन्ति तटिन्य ऊर्मिनिस्वनैः ।
वक्तुं प्रियतमं सिन्धुं सीताया दैन्यदुर्दशाम् ॥२४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुधांशुकिरणास्पृष्टमभवत्तद् महद् वनम् ।
अस्वच्छसलिले कचिद् विकाशं याति पङ्कजम् ॥२५॥
तथाप्युज्ज्वलमासीत्तद् वनं तद्रूपकान्तिभिः ।
यत्रासीद्वाग्नि सा ह्येका देवी दिव्यप्रभामयी ॥२६॥
तदा तत्राययौ रामा रुदती सरमा सती ।
वधूवेशेन ततपादं राजश्रीरिव रक्षसाम् ॥२७॥
क्षणेन कियता साध्वी विमृज्याश्रु सुलोचना ।
प्रोवाच जानकीं वाचं मधुरं प्रीतिकोमलम् ॥२८॥
निश्यद्य भीषणाश्चेट्यो देवि त्वां कौतुकोन्मदाः ।
हित्वा याताः पुरमिति श्रुत्वागां त्वत्पदाम्बुजम् ॥२९॥
आनयं सम्पुटं पूर्णं सिन्दूरेण त्वदाज्ञया ।
तिलकं दातुमिच्छामि ललाटे तेऽतिसुन्दरे ॥३०॥
आयुष्मतीशिरोरत्न नैतं वेशं त्वमर्हसि ।
हन्त दुष्टो नृशंसश्च राक्षसाधिपतिर्भृशम् ॥३१॥
कश्छिन्द्यान् मृदुलं पर्णं कमलस्य तथा कथम् ।
सोऽहरन्मण्डनं दिव्याद्देहात्ते बोद्धुमक्षमा ॥३२॥
उन्मुच्य सम्पुटं साध्वी सीताया भालपट्टके ।
विदधे चित्रकं यत्नादग्रहीच्च रजः पदोः ॥३३॥
ललाटफलके तस्याः सिन्दूरबिन्दुरुद्बभौ ।
तारारत्नं यथा चारु सायं गोधूलिभालके ॥३४॥
देवाराध्या तनुः स्पृष्टा क्षम्यतां देवि ते मया ।
ज्ञात्वा मां त्वत्पदाम्भोजसेवाकार्य्यैकमानसाम् ॥३५॥
उत्तवेयत्तरुणी भूय आसाच्चक्रे पदोरधः ।
जज्वाल तुलसीमूले हैमदीप इवोज्ज्वलः ॥३६॥
शनैरुवाच वैदेही वृथा निन्दसि रावणम् ।
चन्द्राननेऽमुचं सर्वं मण्डनं स्वयमाश्रमे ॥३७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धृताहं तेन तत् सर्वं पापिष्ठेन वनाश्रमे ।
अक्षिपं तत् समालक्ष्य लङ्कां वल्लभ आगतः ॥३८॥
रत्नानि मणयः किंवा मौक्तिकानि भवन्तीह ।
यानि तानि समस्तानि हन्मि पद्भ्यां प्रियाप्तये ॥३९॥
प्रत्याह सरमा देवि श्रुत्वा तव सुधानिधेः ।
मुखात् स्वयंवरकथां शुश्रूषेऽहमिदं वद ॥४०॥
कस्माद्रघुशिरोरत्नमाजगाम वनं शुभे ।
कथं वा राक्षसेन्द्रस्त्वां जहार विजनस्थिताम् ॥४१॥ (युग्मम्)॥
शमय त्वं सुधावृष्ट्या दास्यास्तृष्णां मृगेक्षणे ।
अस्मिंश्चेत्यः स्थिता दूरे विस्तरेण शृणोम्यहम् ॥४२॥
व्याजेन केन स चौरोऽववञ्चत सलक्ष्मणम् ।
राघवं छद्मना केन रत्नं वैतदपाहरत् ॥४३॥
मधुमञ्जुवचाः साध्वी जानकी प्राह सादरम् ।
पवित्रा वारिधारेव पतन्त्यद्रेर्गुहामुखात् ॥४४॥
सीताकल्याणपरमे सरमे सखि ते स्पृहा ।
श्रोतुं यदि तदा वच्मि शृयतामवधानतः ॥४५॥
तीरे गोदावरीनद्याः सुनेत्रेऽभूव निर्वृतौ ।
कपोतदम्पतीवैकनीडे प्रीतिरसाल्पुतौ ॥४६॥
भूमौ नन्दनकल्पायां पञ्चवट्यां महावने ।
आस्व तत्र सिषेवे नौ सुमतिर्लक्ष्मणः सदा ॥४७॥
कोऽभावस्तस्य यस्यासीद् भाण्डारी दण्डकः स्वयम् ।
तत्रालि लक्ष्मणो नित्यमाहरत् फलमूलकम् ॥४८॥
चकार मृगयां स्वामी क्वचित्तु जीवहिंसकः ।
नासीत् स करुणासिन्धुर्बलिष्ठ इति विश्रुतः ॥४९॥
नास्मरं पूर्वसौख्यं मे सती राजेन्द्रनन्दिनी ।
रघुकुलवधूर्भूत्वा वनेऽपि सुखितावसम् ॥५०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्फुटन कति पुष्पाणि नित्यं तत्र समन्ततः ।
वक्तुं तान्यक्षमा शश्वद् वसन्तस्तत्र राजते ॥५१॥
प्रातर्मधु-कुहु-ध्वानैः प्रत्यहं मां पिकेश्वरः ।
विनिद्रामकरोद्दृष्ट्वा सुखिनी मत्समा कचित् ॥५२॥
काक्षि निमीलयेद्राज्ञी कल्ये वैतालिकस्तुता ।
अन्वहं मादृशी प्रोता सुधांशुवदने वद ॥५३॥
अनृत्यच्छिखिनी सार्द्धं शिखिना सुखिनी सुखम् ।
मम द्वारि न वै तुल्यं नर्त्तकद्वन्द्वमीक्ष्यते ॥५४॥
प्रत्यहं विविधाः सत्त्वाः नानावर्णा विहङ्गमाः ।
करभा मृगपोताश्च ममायन्नतिथित्रजाः ॥५५॥
असेवेऽहिंसकाञ्च जीवान् सादरं तटिनी यथा ।
मरौ शीतजलैः पूर्णा तृषार्त्तान् प्राणिसञ्चयान् ॥५६॥
दर्पणो मे सरस्यासीत् केशान् प्रासाधयन्तथा ।
कुवलयैस्तथा पुष्पैर्विचित्रैर्भूषिताभवम् ॥५७॥
सस्मितं वीक्ष्य मां नाथो वनदेवीति संलपन् ।
तोषयामास परमं भूयः किं लप्स्यते मया ॥५८॥
दग्धे नेत्रे पदं किं तद् द्रक्ष्यतोऽस्मिन् कुजन्मनि ।
आशासरसि राजीवं यन्मे नेत्रमणिश्चिरम् ॥५९॥
इत्युक्त्वा सारुदत्तूष्णीं देवी रामैकजीविता ।
रुरोद सरमा चास्याः सिक्तं वस्त्रमभूज्जलैः ॥६०॥
क्षणेन कियता नेत्रे विमृज्य सरमा सती ।
अब्रवीद् विनीता सीतापदाम्भोजं प्रणम्य च ॥६१॥
पूर्ववार्त्ताप्रसङ्गेन चित्तं ते व्यथते यदि ।
अलं स्मृत्वा निरीक्ष्याश्रु हृदयं मे विदीर्यते ॥६२॥
मधुस्वरेव कादम्बा प्रत्याह जानकी शुभे ।
विनेमां दुर्भगां कान्या रुद्याद् भुवि निरन्तरम् ॥६३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वोदन्तं प्रभाषे त्वां वयस्येऽवहिता शृणु ।
दीनाय दैन्यविज्ञप्तिः परीवाह इवाम्भसाम् ॥६४॥
अतस्त्वां कथयिष्यामि शृण्वालि सरमे प्रिये ।
त्वद्दतेऽरिपुरेऽस्मिन् मे कान्यास्ति हितकाङ्क्षिणी ॥६५॥
गोदावरीतटे रम्ये पञ्चवट्यां सुखं वयम् ।
आस्म कान्ति कथं वक्ष्ये तस्या लोकोत्तरां वराम् ॥६६॥
स्वप्ने नित्यमशृणवं वीणां वनश्रियाहताम् ।
आसीना सरसीतीरेऽपश्यं सौरकरच्छटाम् ॥६७॥
देववालामिवासक्तां केलौ कमलकानने ।
कदा मुनिवधूरायाद्वसन्ती पर्णमन्दिरम् ॥६८॥
वितत्य विटपिमूले कदा वा रञ्जिताजिनम् ।
उपाविशं सखीमिव छायां सम्बोध्य सुन्दरीम् ॥६९॥
अन्यदानर्त्तिपं रङ्गात् कुरङ्गथा सह कानने ।
पिकध्वनिं समाकर्ण्य व्यधां गीतं मधुस्वरम् ॥७०॥
नवमालिकया बध्वा चूतोद्वाहमसाधयम् ।
दम्पत्योर्मञ्जरीं नप्त्रीं सम्बोध्य सुखमाप्नवम् ॥७१॥
गुञ्जितेऽलौ सुमधुरं नप्त्री-जामातृसंज्ञया ।
सकौतुकं समाहूय तमानन्दमलं गता ॥७२॥
कदा वा प्रभुणा सार्द्धमभ्राम्यं तटिनीतटे ।
अपश्यं चामलास्वप्सु सभेन्दुनूतनाम्बरम् ॥७३॥
अन्यदारुह्य तुङ्गाद्रिमासीनाहं पदोस्तले ।
नाथस्य व्रतती-कल्पा मूले चूतस्य शाखिनः ॥७४॥
बहुभिरादरैः प्रेष्ठोऽतोषयन्मां सुधामयैः ।
वचोभिस्तन्नु कं वक्ष्ये केनोपायेन वा पुनः ॥७५॥
कैलासाद्रौ यथा शम्भुः पञ्चभिर्वदनैरुमाम् ।
वेदानशिक्षयत्ताहगश्रौषं भर्त्तृवक्त्रतः ॥७६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषण्णा जोषमासिष्ट कर्णान्तायतलोचना ।
ततोऽब्रवीद् वरारोहा सरमा समदुःखिता ॥७७॥
वाणीं ते शृण्वती भद्रे जुगुप्से राजसम्पदः ।
ईदृशो वनवासो मे रोचते नृपवैभवात् ॥७८॥
मनो मे भयमाधत्ते चिन्तयन्त्या इमां कथाम् ।
यतः सौरकरस्पर्शात् तमोऽरण्यं विगाहते ॥७९॥
एवं निशः समासत्तौ देशे यस्मिन्नपि क्वचित् ।
भवन्ति म्लानवदनाः सर्वे तद्वासिनो जनाः ॥८०॥
कथं लोका न हृष्यन्ति तत्रत्या यत्र ते गतिः ।
मधुमयि सुधामूर्त्ते भवेद् भुवनमोहिनि ॥८१॥
कृपया ब्रूहि मे देवि कथं राक्षसभूपतिः ।
जहार त्वां पतियुक्तां केन वा कौशलेन सः ॥८२॥
अशृणोद् मधुरां वाणीं दासी तव मधोर्दिने ।
मत्तकोकिलगीतञ्च न त्वीदृश-सुधावचः ॥८३॥
पश्य नीलाम्बरे चन्द्रस्त्वद्रूपद्युतिनिष्प्रभः ।
हसन् पिबति त्वद्वाक्यसुधां सुधानिधिः स्वयम् ॥८४॥
खगाः सर्वे मूकाः परभृतमुखाः पुष्पितवने
त्वदीयं पीयूषं सुललितवचः श्रोतुमनसः ।
अतो याचेऽहं त्वाममृतवचनैः शान्तय तृषां
शशाङ्कास्ये तेषां तव सहचराणां प्रणयिनाम् ॥८५॥

इति श्रीमेघनादवधे महाकाव्ये प्रमीलारामसाक्षात्कारो नाम
द्वादशः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरल-चित्सुखीसारम्

(पूर्वतोऽनुवृत्तम्)

[निबन्धकः—स्वर्गत-रमेशचन्द्र-वेदान्ततीर्थः]

तार्किकः ॥—आत्मानं जानामीति प्रत्यक्षमपलपन् जरन्मीमांसककरालम्बो भवादृशः आत्मनि संवित्कर्म्मता नास्तीति प्रलपितुं न शङ्कते कणभक्षाक्षपाद-मतानुसारिषु जीवत्सु अस्मादृशेषु, अतः आत्मनः ज्ञानकर्म्मतायाः प्रत्यक्षसिद्ध-त्वेन असिद्धोऽयं संवित्कर्म्मतारहितत्वविशिष्टोऽयं हेतुः ।

वेदान्ती ॥—विरमतु तावद् भवान्, श्रीमतां मुखप्रावरणमुपहियते मया, **घटतज्ज्ञानयोः सम्बन्धः आत्मनिष्ठः ज्ञाननिष्ठत्वात् पदविषयत्वादिति** भवतः **नैयायिकादीन् प्रति अनुमानात् आत्मनश्चिद्रूपत्वसिद्धिः ।** यद्यपि भवतां मते ज्ञानज्ञेययोः विषयविषयिभावः नाम न भावरूपः कश्चित् सम्बन्धः, तथापि अभावरूपत्वात् अस्त्येव आश्रितत्वम्, वेदान्तराद्धान्ते तु आध्यासिकः सम्बन्धोऽत्र अस्त्येव । सम्बन्धस्य सम्बन्धिमात्रनिष्ठत्वात्, सम्बन्धिभूतयोः ज्ञानघटयो-रन्यतरस्य आत्मत्वमादाय आत्मनिष्ठत्वं पर्यवस्यति, अत्रापि घटस्य आत्मत्व-मुभयवाद्यनभिमतमिति विप्रतिपन्नज्ञानस्य आत्मतामापादयति ।

तार्किकः ॥—विपक्षे बाधकतर्काभावेन कथमनेन तेऽभिमतस्य साध्यस्य सिद्धिर्भवितुमर्हति ।

वेदान्ती ॥—**विपक्षे चात्मनः संशयविपर्यासगोचरत्वापत्तिर्बाधिका,** यदि आत्मा चिद्रूपो न स्यात् तर्हि संशयविपर्यासगोचरः स्यात्, यतश्च आत्मा संशयविपर्यासगोचरो न भवति अतो नात्मा अचिद्रूपः, **नहि आत्मनि अहमनहं वेति कश्चित् सन्दिग्धे, नैवाहमिति वा विपर्यस्यति । न चैतत् स्वप्रकाश-ज्ञानरूपतामन्तरेण अवकल्पते ।** अतो विपक्षबाधकतर्कसत्त्वात् आत्मन-श्चिद्रूपता सिध्यति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तार्किकः ॥—**अन्तरेणापि ज्ञानरूपतां दुःखादिवदेतद् उपपद्यते इति शङ्कनीयम्** अस्ति, यथा दुःखादि चिद्रूपं न भवति एवं संशयादिगोचरोऽपि न भवति, नहि कश्चिद् अहं दुःखी न वेति सन्दिग्धे, दुःखे सति नैवाहं दुःखीति वा विपर्यस्यति, अतः अचिद्रूपस्य दुःखादेः संशयविपर्ययाभाववत् अचिद्रूपस्यापि आत्मनः संशयविपर्ययाभावो भविष्यतीति अङ्गीकारे का हानिर्भवतः ।

वेदान्ती ॥—**न च** एवं विवक्तुमर्हति भवान्, **तेषां दुःखादीनां स्वसत्तायां ज्ञानाव्यभिचारात् तदुपपत्तेः**, नहि दुःखादीनां ज्ञानव्यतिरेकेण स्थितिर्विद्यते, ततः सदा ज्ञानप्रकाश्यत्वात् ज्ञानस्य च स्वप्रकाशत्वात् तत्सहचारिणामपि दुःखादीनां संशयाद्यभावः, अहो माहात्म्यं स्वप्रकाशज्ञानसम्राजः ।

तार्किकः ॥—**आत्मनि** अपि **एवं** ज्ञानाव्यभिचारः **अभ्युपगम्यते** ।

नेदान्ती ॥—**न च** एतत् स्वीकर्तुं युज्यते, **सुषुप्त्यभावप्रसङ्गात्**, एतन्निष्ठजन्यज्ञानेन एतस्य प्रकाशाव्यभिचारेऽस्य सुषुप्तिर्न स्यात्, एतन्निष्ठकार्यज्ञानोपरमस्यैव एतत्सुषुप्तित्वात् ।

तार्किकः ॥—**ज्ञानात्मनोः सम्बन्धः अनात्मवृत्तिः ज्ञानवृत्तित्वात् सत्तावत्** इत्यस्मिन् सत्प्रतिपक्षे जाग्रति कथमुक्तानुमानात् प्रबलविपक्षक्षीणस्येव अभिमतसाध्यस्य सिद्धिः ?

वेदान्ती ॥—**न च** इत्थं **शङ्कनीयम्, ज्ञानमेव आत्मा इत्यभ्युपगच्छतां नः ज्ञानात्मनोः सम्बन्धस्यैव अभावात् आश्रयासिद्धेः** प्रतिपक्षस्यैवानुत्थानात् । न हि शवीभूतविपक्षमध्यगतविजयिनः जिगीषोर्विजयासिद्धेराशङ्का समुदेतितरां कस्यापि चेतसि ।

तार्किकः ॥—ननु परमप्रमाणभूताभ्यः भवद्भिः कथमपि शङ्कितुमनर्हाभ्यः श्रुतिभ्य एव **"न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इतिद्रष्टृदृष्ट्योः सम्बन्धः अधिगत इति** अस्मदाचार्य-मानमनोहरकारः **प्रातिष्ठिपत्**, तत् कथं प्रतिपक्षस्य आश्रयासिद्धेरनुत्थानमिति साटोपमभिधातुं शक्यते भवता ?

वेदान्ती ॥—**मैवम्, श्रुतेः लोकप्रसिद्धसम्बन्धानुवादेन दृष्टे विनाशित्वा-**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावमात्रप्रतिपादनपरत्वात्, अप्राप्ते हि शास्त्रमर्थवदिति न्यायात्, मुख्यार्थेऽद्वैतश्रुतिविरोधात्, राहोः शिरः इतिवदुपचारेणापि सम्बन्धश्रुतेरुपपत्तेश्च ।

तार्किकः ॥—अहो महती स्वपक्षाग्रहग्रहिलता भवतः, शिरश्छेदेऽपि काकिणीमपि न ददामीति न्यायापातः, अनयोस्तुल्यबलतया भेदप्रतिपादिकया द्रष्टुर्दृष्टेरित्यादिश्रुत्या अद्वैतश्रुतेः स्वार्थत्यागरूपः संकोचात्मको वा विपर्ययः कथं न भवति ?

वेदान्ती ॥—न च एवम्, तत्परत्वातत्परत्वविशेषोपपत्तेः । अस्ति हि श्रुत्यर्थावधारणे तात्पर्यज्ञानस्यापि कारणता, श्रुतेरस्याः अद्वैते एव तात्पर्यं वर्त्तते, तत् कथमतः सम्बन्धसिद्धिर्भवितुमर्हति ?

तार्किकः ॥—सम्बन्धप्रतिपादनेऽस्याः श्रुतेस्तात्पर्यं नास्तीति कथमवगतं भवता ? तदेतत् निरपेक्षया बुद्धया विविच्यताम् ।

वेदान्ती ॥—अद्वैतश्रुतिरुपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गोपेता इति सर्वत्र उपनिषत्सु उपलभ्यते, सम्बन्धसमर्पकत्वेनाभिमतां तावदिमामेव श्रुतिं परीक्षस्व । श्रुतेस्तात्पर्यनिर्णयाय तावत् "उपक्रमोपसंहारावभ्यासापूर्वतेफलम् । अर्थवादोपपत्तिश्च लिङ्गं तात्पर्यनिर्णये ॥" इत्युक्तानि षड्विधानि लिङ्गानि वर्त्तन्ते । अत्र च श्रुतौ अद्वैतविषये एतानि सर्वाणि लिङ्गानि सन्ति । तथाहि,—"आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेन इदं सर्वं विदितमि"ति मैत्रेयीब्राह्मणोपक्रमे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञया अद्वैतेन उपक्रम्य, तथा "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं विजानीयात्, केन कं पश्येत्" इत्यादिना अद्वैते एव उपसंहृतः । अतः उपक्रमोपसंहारयोरैक्यात्, अद्वैते तात्पर्यमवसीयते, एवं,—"एतावदरे खल्वमृतमि"ति फलश्रवणम्, "अस्य महतो भूतस्य निःश्वसितमेतद्यग्वेद" इत्यादौ सृष्ट्यादिप्रतिपादनम् अर्थवादः । "स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दान्" इत्याद्युपपत्तिः दुन्दुभ्यादिदृष्टान्तैरुपपादिता, अतः उक्तषड्विधलिङ्गैरद्वैते निर्णीततात्पर्या अतिबलवती अद्वैतबोधिका श्रुतिः लोकप्रवादोपजीविनीं प्राप्तार्थबोधकतया अनुवादरूपां सम्बन्धश्रुतिं कथं न बाधते ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तार्किकः ॥—ननु तथापि श्रुतस्य षष्ठ्यर्थसम्बन्धस्य परित्यागो नोचितः, अश्रुतकल्पनाप्रसङ्गात् ।

वेदान्ती ॥—अत्र चेददृष्टदोषात् अश्रद्दधानस्य अपरितोषः, तदा अन्यथा व्याख्यायते मया, यथा सम्बन्धकल्पनासम्भावना न भवेदिति श्रूयताम्,—

देवदत्तस्य गन्तुरितिवत् "द्रष्टुर्दृष्टेरिति" द्रष्टृरूपायाः दृष्टेः दृष्टि-लक्षणो वा यो द्रष्टा तस्य विपरिलोपो नास्तीति सामानाधिकरण्येन षष्ठ्योः सम्बन्धसम्भवे वैयधिकरण्यस्य कल्पनाऽयोगात् अभेदकल्पना एव ज्यायसीति सन्तोष्टव्यम् श्रीमता । ततश्च दृष्टिरूप एव द्रष्टा आत्मा सिद्धः ।

तार्किकः ॥—ननु भवतां परमप्रमाणभूतश्रुतावेव "न दृष्टेः द्रष्टारं पश्येः" इत्यादौ वैयधिकरण्येन प्रयोगदर्शनात् दृष्टिद्रष्टृोर्भेदः प्रमीयते, तद्वत् अत्रापि वैयधिकरण्येन भेदसम्बन्धः कथं न भवेत् ।

वेदान्ती ॥—"न दृष्टेर्द्रष्टारं पश्येरि"त्यादाविव वैयधिकरण्येऽपि अन्तःकरणपरिणामरूपायाः दृष्टेः यो द्रष्टा इति वा परिणामिनोऽन्तःकरणस्य द्रष्टुः साक्षिभूता या दृष्टिः तस्या विपरिलोपो नास्तीति वा अद्वैतश्रुत्यनुगुणे सम्भवति सम्बन्धे गुणिगुणभावेन सम्बन्धकल्पना अविदितमीमांसावृत्तान्त-स्यैव परं शोभते ॥

तार्किकः ॥—न ह्येवं व्याख्यानं युक्तं श्रीमतः, "नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इत्यनेन आत्मनो नित्या दृष्टिरभिधीयते इति नित्यदृष्टिसम्बन्धः स्वरस-प्रतीतिसिद्धः श्रुतेः, तत् कथमन्यथा व्याख्यानं युक्तं भवेत् भवतः ?

वेदान्ती ॥—किञ्च एतत् श्रूयताम्, जीवेश्वरयोर्भेदमभ्युपगच्छता भवता नित्यदृष्टिसम्बन्धः कस्य उच्यते इति विवेचनीयम् । न तावत् जीवस्य तस्य अनित्यज्ञानाभ्युपगमात् । नापि ईश्वरस्य, मैत्रेयीब्राह्मणे "न वा अरे पत्युः कामाय पतिः प्रियो भवती"त्यादिना पतिजायादिप्रियसंसूचितं जीवमुपक्रम्य तस्यैव "चैतेभ्यः भूतेभ्यः समुत्थाय तान्येव अनुविनश्यति न प्रेत्य संज्ञास्ती"ति अवस्थान्तरप्रतिपादनावसरे विनाशमाशंक्य "अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवति । यद्वै तन्न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पश्यति, पश्यन वै तन्न पश्यति, नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादित्यविनाशितोपपादनात्। ज्योतिर्ब्राह्मणे च जागराद्यवस्थोपन्यासपुरःसरं "अथ यत्र सुप्तो न कञ्चन कामं कामयते न कंचन स्वप्नं पश्यती"ति सम्प्रसादावस्थानमवतार्य "यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति विशेषविज्ञानाभावेऽपि स्वरूपविज्ञानस्य नित्यत्वप्रतिपादनात्। ईश्वरपक्षे च विशेषविज्ञानाभावस्य वक्तुमयुक्तत्वात् तस्य सर्वदा सर्वज्ञत्वात् सुषुप्ताद्यवस्थाऽभावाच्च। तस्मात् ज्ञानात्मनोः सम्बन्धः अनात्मनिष्ठः इत्यनुमानम् आश्रयासिद्धमिति सिद्धम्।

तार्किकः ॥—ननु ज्ञानम् आत्मा न भवति गुणत्वात् रूपवत्, तथा ज्ञानम् आत्मा न भवति अनित्यत्वाद् इत्याद्यनुमानप्रयोगविरोधात् कथम् आत्मनः ज्ञानात्मकत्वम् ?

वेदान्ती ॥—भोः प्रेक्षावन्, कथमेवं प्रलपति भवान्, यस्य मते हि नित्यात्मस्वरूपता अभिमता विज्ञानस्य तस्य वेदान्तिनः कथं गुणत्वम् अनित्यत्वं वा ज्ञानस्य स्यात्' अतः—यत् गुणत्वादनित्यत्वाद् ज्ञानमात्मा न भवति रूपादिवदिति अनुमानं तत् सर्वम् अन्यतरासिद्धतया स्वरूपासिद्धत्वेन अपास्तम्।

तार्किकः ॥—ननु कथं ज्ञानस्य अगुणत्वं प्रतिपद्यसे, घटज्ञानयोः सम्बन्धः गुणनिष्ठः ज्ञाननिष्ठत्वात् सत्तावत् इत्यनुमानात् ज्ञानस्य गुणत्वं सिद्धम्, सम्बन्धिमात्रनिष्ठस्य सम्बन्धस्य गुणनिष्ठत्वम् अन्यतरसम्बन्धिनि गुणत्वमन्तरेण न घटते, घटस्य तु गुणत्वमुभयानभिमतम् इति ज्ञानस्य गुणत्वसिद्धिः।

वेदान्ती ॥ विपक्षे बाधकाभावात् नानेन अभिमतसाध्यसिद्धिर्भवितुमर्हति।

तार्किकः ॥—विपक्षे च जानामीति प्रत्ययस्य निरालम्बनत्वप्रसङ्गो बाधकः। यदि च ज्ञानस्य गुणत्वं न स्यात् तदा जानामीति ज्ञानाश्रयं विषयीकुर्वतः प्रत्ययस्य निर्विषयतापत्तिः स्यात्। ज्ञानस्य आत्मस्वरूपत्वे आत्मनः ज्ञानं प्रति आधारत्वायोगात् उक्तप्रतीतिः सर्वथा बाधिता भवेत्।

वेदान्ती ॥—मैवं ब्रूहि, रूपतज्ज्ञानयोः सम्बन्धः द्रव्यनिष्ठः ज्ञाननिष्ठत्वात् सत्तावत् इति प्रतिप्रयोगसम्भवात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तार्किकः ॥—ज्ञानस्य द्रव्यत्वे जानामीति प्रतीतेर्निराश्रयतापत्तिः स्यादित्युक्तो बाधकस्तर्कः ।

वेदान्ती ॥—**जानामीति चानुभवस्य अन्तःकरणवृत्त्याश्रयप्रमातृविषयतयाऽपि उपपत्तेः** न प्रत्ययाधारत्वानुपपत्तिः । तथाहि विषयसंयोगे अन्तःकरणस्य यो वृत्तिरूपः परिणाम उदेति, चैतन्योद्भासिता सा वृत्तिः ज्ञानत्वेन व्यवह्रियते, तस्यास्तु वृत्तेराश्रयः अन्तःकरणावच्छिन्नचैतन्यात्मकप्रमातृचैतन्यम्, अतः प्रमातृचैतन्यस्य वृत्त्यवच्छिन्नचैतन्यं प्रति आधारत्वात् जानामीतिज्ञानाधारत्वं प्रमातुरुपपद्यते ।

तार्किकः ॥—तादृशवृत्तेरङ्गीकारः नास्मत्सम्मतः गौरवात् ।

वेदान्ती ॥—मैवं वादीः, श्रुत्यनुग्रहाय नित्यज्ञानमेकं तावत् भवताम् अनेकात्मस्थानीयम् अस्माभिः कल्प्यते, भवतां प्रतिक्षणोत्पत्तिविनाशशालिज्ञानस्थानीयाऽस्माभिः वृत्तिरङ्गीक्रियते, कुतोऽत्र लाघवस्थाने गौरवभयं भवतां, प्रत्युत श्रुत्यनुग्रहात् श्रेयसीयं प्रणालीति सिद्धा आत्मनश्चिद्रूपता ।

तार्किकः ॥—का नाम श्रुतिरनुगृह्यतेऽनया कल्पनया ?

वेदान्ती ॥—**"विज्ञानमानन्दं ब्रह्म" "प्रज्ञानं ब्रह्म" "ज्ञानघन एव" इत्यादिश्रुतिभ्यश्च आत्मनः चिद्रूपत्वसिद्धिः,** कल्पनया चानया सा एव अनुस्रियते ।

तार्किकः ॥—श्रुतौ अत्र प्रज्ञायतेऽस्मिन् इति व्युत्पत्त्या **अधिकरणपरतया ज्ञानशब्दो योज्यः ।**

वेदान्ती ॥—**अद्वैतश्रुतिविरोधात् नच** एवं व्याख्यातुं युज्यते । **तस्मात् साधूक्तं मया चिद्रूपत्वादिति ।** अथेदानीं श्रूयताम् आत्मनः स्वप्रकाशत्वं द्वितीयहेतुः । **अकर्मत्वाच्च आत्मनः स्वप्रकाशत्वम् ।** आत्मनः वेद्यत्वे अभ्युपगते **स्वाश्रयज्ञानविषयतया** कर्मकर्तृभावविरोधप्रसङ्गात्, नहि सम्भवति आत्मैव ज्ञानस्य कर्तृत्वेन ज्ञानाश्रयः, स एव ज्ञानविषयतया कर्मेति ।

तार्किकः ॥—कथमेतन्न सम्भवति,—यतः,—**सुखादिविशिष्टस्य अहं सुखीत्यादिज्ञानकर्म्मत्वं केवलस्य च कर्तृत्वमित्याकारभेदादविरोधो** भवि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ष्यति को दोषः । यथाहि लोके एकस्य प्रतियोग्युपाधिभेदात् अनेकाकारता पिता, भ्राता, मातुलः, श्यालक इत्यादिः, एवम् उपाधिभेदाद् एकस्य कर्तृत्वं कर्मत्वं च भविष्यति ।

वेदान्ती ॥—**नच** एवं वक्तुं शक्यते, एवं सति **गमनादिक्रियास्वपि केवलस्य कर्तृत्वं गमनादिविशिष्टाकारेण च कर्मत्वमित्याकारभेदेनाविरोधात् कर्मकर्तृभावविरोधस्य सर्वत्रोच्छेदप्रसङ्गात्** । पित्रादीनां स्वरूपत एकत्वेऽपि प्रतियोगिनानात्वात् सम्भवति तदपेक्षया अनेककल्पनाविषयत्वम्, इह तु उपाधिविशिष्टस्यैव तं प्रति कर्तृत्वं कर्मत्वं चेति विप्रतिषिद्धम्, नियमेन अनुपलब्धेः, गमनादौ अपि एवम् उपाधिभेदेन अविरोधप्रसङ्गाच्चेति ।

प्राभाकरः ।—(पार्श्वस्थः चोदयति) ननु भवतु आत्मनः अकर्मत्वम्, **तथापि नात्मनः स्वप्रकाशत्वं तत्तदर्थसंवेदनाश्रयतयापि स्फुरणोपपत्तेः** । घटादिविषयाणि यानि संवेदनानि तदाश्रयतया आत्मनः स्फुरणकर्मतामन्तरेणापि स्फुरणोपपत्तौ न स्वप्रकाशत्वं कल्पनीयम् ।

तार्किकः ॥—तूष्णीं स्थीयतां तावत् तौतातिकदेशिकैर्भवद्भिः, क्रियाफलभाक्त्वं हि कर्मत्वम्, अतः भवन्मतेऽपि **ज्ञानक्रियाजन्यस्फुरणरूपफलभाजोऽपि अस्य** आत्मनः स्यादेव कर्मत्वम् ।

प्राभाकरः ॥—अहो प्रदर्शितं महद् विद्वत्त्वम् परिडतप्रकाण्डेन तार्किकवर्येण श्रीमता कर्मलक्षणस्य अंशतोऽपह्नवपूर्वकसङ्गतिप्रदर्शनेन । नहि केवलं क्रियाफलभाक्त्वं कर्मत्वं, स्मरतु तावत् भवान्, किन्तु परसमवेतक्रियाजन्यफलशालित्वमेव कर्मत्वम्, अन्यथा नगरं गच्छति चैत्रः इत्यत्र चैत्रनगरोभयसमवेतस्य गमनक्रियाफलस्य संयोगस्य चैत्रेऽपि समवायात् तस्यापि कर्मत्वं स्यात् । अतः स्वसमवेतज्ञानक्रियाजन्यस्फुरणभाक्त्वेन **परसमवेतक्रियाफलशालित्वाभावात् न चास्य कर्मत्वम्** ।

तार्किकः ॥—**ननु** आत्मनः संविदाश्रयतया स्फुरणोपपत्तौ भवतः किमिति एवमाग्रहः ? एतत् स्फुरणम् आत्मानं जानामीति **मानसप्रत्यक्षेऽपि** कर्मतया **समानं वरीवर्त्ति** । आत्मनः ज्ञानकर्मत्वाभावे **जानातेः सदा सकर्मकतया कर्मणा**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याप्तस्य तन्निवृत्तौ ज्ञानरूपस्य निवृत्तेः न साम्प्रतम् आत्मनः कर्मत्वाभावोपपादनम् ।

वेदान्ती ॥—(प्राभाकरपक्षं समर्थयमानः स्वसम्मतम् आत्मनः कर्मत्वाभावेऽपि संविद्रूपत्वम् उपपादयति) संविद्व्यतिरिक्तस्य घटादेः संवित्कर्मत्वेनैव अपरोक्षत्वनियमात् आत्मनः कर्मत्वाभावे तदनुपपत्तेः । आत्मा यदि संविद्व्यतिरिक्तः स्यात्, तर्हि कर्मतयैव अपरोक्षव्यवहारविषयः स्यात्, घटादिविषयेषु तथा व्याप्तिदर्शनात्, अतः आत्मनि कर्मत्वं व्यावर्त्तमानं संविद्व्यतिरिक्तत्वं व्यावर्त्तयतीति सिद्धमात्मनः ज्ञानरूपत्वम् ।

प्राभाकरः ॥—तत्तत्संविदाश्रयतया एव आत्मा अपरोक्षो भवतु कोऽत्र दोषः ?

वेदान्ती ॥—अस्त्येवात्र आत्मनः संविदाश्रयत्वाभावोपपादकमनुमानम्,—संवेदिता संविदाश्रयतया अपरोक्षो न भवति अपरोक्षत्वात् संवेदनवदिति । अत्र बाधनिवृत्त्यै प्रथमविशेषणम्, भवतः प्रसिद्धिमादायैव प्रतियोगिप्रसिद्धिः ।

प्राभाकरः ॥—विपक्षे बाधकतर्काभावात्, एतदननुमानमेव भवतः ।

वेदान्ती ॥—न च विपक्षे बाधकतर्काभावः आरोपयितुं शक्यते, प्रकाशान्तराधीनव्यवहारवत्त्वे नित्यज्ञानवत्त्वानङ्गीकारात् स्वसत्तायां प्रकाशव्यभिचारवतः कदाचित् संशयादिगोचरत्वप्रसङ्गस्यैव बाधकत्वात् । यदि नित्यज्ञानाभाववान् आत्मा प्रकाशान्तराधीनव्यवहारवान् स्यात्, तर्हि स्वसत्तायां प्रकाशभावस्यापि सम्भवात् आत्मनि संशयविपर्ययौ स्याताम्, न च आत्मनि तौ स्तः इत्युपपादितं पुरस्तात् इति बाधकतर्कात् संवेदिता आत्मा न ज्ञानव्यतिरिक्त इति सिद्धम् । अपरोऽपि श्रूयतां विपक्षे बाधकस्तर्कः ।

आत्मनो घटादिज्ञाने भासमानत्वाङ्गीकाराच्च घटादिवदेव चाक्षुषत्वं प्रसज्येत । यदि आत्मा घटादिज्ञाने भासमानः स्यात् तदा घटादिवत् चाक्षुषः स्यात् इति ।

प्राभाकरः ॥—चक्षुषा असंयुक्तस्य आत्मनः कथं चाक्षुषत्वं प्रसज्यति चक्षुष्मन्मन्यो भवान् ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान्ती ॥—यदेव चक्षुषा संयुक्तं तदेव चाक्षुषम् इत्यस्ति न कश्चिन् नियमः, परमाणूनां चक्षुःसंयुक्तत्वेऽपि अचाक्षुषत्वात्, तथा सोऽयं देवदत्त इति प्रत्यभिज्ञायां चक्षुषा असंयुक्ताया अपि तत्तायाः चाक्षुषत्त्वाङ्गीकारात्, ततः—**तज्ज्ञाने भासमानताया एव तत्त्वात्,**—चक्षुर्जनितज्ञाने भासमानस्य आत्मनः चाक्षषत्वप्रसङ्गात् न युक्तं भवदुक्तदूषणम् ।

प्राभाकरः ॥—ननु भवतु घटमहं जानामीत्यादिप्रतीतौ अरूपस्यापि आत्मनः प्रत्यक्षत्वम्, अरूपस्य रूपस्य चाक्षुषत्ववत्, भाट्टानाम् अरूपस्य आकाशस्य चाक्षुषतावच्चेति रमणीयम् ।

वेदान्ती ॥—**नीरूपस्य च द्रव्यस्य चाक्षुषत्वायोगात्** न युक्तम् आत्मनः चाक्षुषत्वम्, रूपस्य सामान्यस्य च अद्रव्यत्वात् भवति चाक्षुषत्वम्, भाट्टानां च आकाशस्य चाक्षुषत्वं स्वसमयमात्रसिद्धम्, न तु तत्राऽस्ति विचारसहं प्रमाणम् । आत्मनश्चाक्षुषत्वे **आत्मा चाक्षषज्ञाने न प्रकाशते अरूपिद्रव्यत्वात् आकाशवदिति प्रतिप्रयोगसम्भवाच्च ।**

प्राभाकरः ॥—ननु भाट्टानां साध्यविकलता दृष्टान्तस्य, तन्मते आकाशस्य चाक्षुषत्वाङ्गीकारात् ।

वेदान्ती ॥—मैवम्, आकाशस्य प्रत्यक्षत्वे प्रमाणाभावात्, प्रत्युत आकाशं न चाक्षुषम् अरूपिद्रव्यत्वात्, अस्पर्शवद्द्रव्यत्वात् मनोवत्, सर्वगतत्वादात्मवत् इत्यादिप्रयोगसम्भवाच्च । अतः पूर्वोक्तहेतुद्वयेन सिद्धमात्मनो ज्ञानरूपत्वम् ।

तार्किकः ॥—ननु भवतु एवं तथापि आत्मनः स्वयंप्रकाशचिद्रूपत्वे साक्षात् श्रुतिर्न दृश्यते, तत् कथम् आगमैकशरणेन भवता तत् साधयितुं शक्यते ?

वेदान्ती ॥—श्रूयताम्,—**अत्रायं पुरुषः स्वयंज्योतिरिति श्रुतेश्चात्मा स्वप्रकाशः ।**

तार्किकः ॥—**ननु स्वप्नावस्थामधिकृत्येदमाम्नायते तत्र मनसोऽनुपरमात्,** अपरप्रकाशव्यतिरेकेण केवलस्य आत्मनः ज्योतिषः स्वप्ने दर्शयितुमशक्यत्वात् न स्वयंज्योतिष्ट्वसिद्धिरात्मनः ।

वेदान्ती ॥—मा मैवम् स्वप्नावस्थायां मनसो गजाद्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारपरिणतस्य अवभासकार्य्यतयैव अवस्थानात् करणान्तराभावाच्च आत्मैव स्वयंज्योतिः स्यादिति ।

तार्किकः ॥—न च एवं शंकनीयम्, यदि हि मनसो दृश्यतया अवस्थानं स्यात् न स्यात् तर्हि तस्य करणत्वम्, तथाच करणान्तराभावात् स्वयंज्योतिष्ट्वं स्यात् आत्मनः, न त्वेतदस्ति, मनसः चक्षुरादिवत् इन्द्रियत्वेन अयोगिनः प्रत्यक्षत्वानुपपत्तेः । शरीरसंयुक्तमतीन्द्रियं साक्षात् प्रतीतिसाधनमिन्द्रियमितीन्द्रियलक्षणम्, मनोऽतीन्द्रियम् इन्द्रियत्वात् चक्षुर्वत् इतिप्रयोगसम्भवाच्च । तस्मात् मनसो गजादिपरिणामस्वीकारे तस्य इन्द्रियग्राह्यत्वमनुपपन्नं भवेत् । अतः स्वप्नावस्थायां मनसः ज्ञानकरणत्वमेव न तु ज्ञानविषयत्वमिति मनोव्यतिरेकाभावात् न आत्मनः स्वयंज्योतिष्ट्वं सिद्धम् ।

वेदान्ती ॥—एवं सति "अत्रायं पुरुषः स्वयंज्योति"रिति श्रुतेरर्थः कथं मन्यते भवान् ?

तार्किकः ॥—तस्मात् मनःसंयोगजन्यज्ञानाधारत्वेन स्वयंशब्दवाच्य आत्मा ज्योतिरिति अभिधीयते, ज्योतिःसाधनत्वाद्वा "वाचैवायं ज्योतिषा" "अग्निनैवायं ज्योतिषा" इत्येतत्प्रकरणषठितवागग्न्यादिवत्, न तु आत्मा स्वयंज्योतिः द्रव्यस्य आत्मनः गुणत्वानुपपत्तेः । आत्मा हि द्रव्यम्, ज्ञानन्तु गुणः, न हि अनयोरभेदः शक्यसम्भवः कदाचित् ।

वेदान्ती ॥—क एवमाह, यत्, मनसः प्रत्यक्षत्वे तस्य इन्द्रियत्वव्याघात इति ? यतः,—

सम्बन्धस्याश्रयत्वेन विज्ञानासमवायिनः ।
इन्द्रियत्वाविघाताच्च मनः प्रत्यक्षमात्मवत् ॥

मनः प्रत्यक्षं ज्ञानासमवायिकारणाधारत्वात् आत्मवत्, इत्यनुमानात् मनसोऽपि प्रत्यक्षत्वोपपत्तेः । सम्भवति चास्य गजादिपरिणामेन दृश्यत्वम् ।

तार्किकः ॥—ननु प्रत्यक्षत्वे मनस इन्द्रियत्वव्याकोप इत्युक्तं मया प्राक् ?

वेदान्ती ॥—तस्य (मनसः) साक्षिवेद्यस्यापि ऐन्द्रियकज्ञानाविषयत्वेन इन्द्रियत्वाव्याघातात्, इन्द्रियस्य तावत् न इन्द्रियग्राह्यत्वमित्यस्ति नियमः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नहि इन्द्रियस्य साक्षिरूपान्यप्रकाश्यत्वे इन्द्रियत्वव्याघातो भवति, साक्षिणः सर्वावभासकत्वात्। तस्मात् निरस्तसमस्तकलङ्कावकाशमात्मनः स्वप्रकाशत्वम्।

तार्किकः ॥—एवं सति, ज्ञानरूपस्य आत्मनः कथं ज्योतिःशब्दवाच्यता? यतः भूतविशेषे वह्निसूर्यादौ ज्योतिःशब्दो व्युत्पन्नः।

वेदान्ती ॥—तच्च (ज्योतिः) आत्मरूपम् अविद्यापरिकल्पितप्रपञ्चावभासकत्वात्, अविद्यातमोनिवर्त्तकत्वाच्च ज्योतिःशब्दाभिधेयम्, यथाभावरूपशार्वरादितमोनिवर्त्तनेन जगदवभासकमादित्यादि ज्योतिरिति सिद्धम्।

(क्रमशः)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Vol. XVII 1934-35

१८५६ शकीये सप्तदशवर्षस्य

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता

वार्षिकं मूल्यम्—
रूप्यकत्रयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषत्-पत्रिकायाः
सप्तदशवर्षीया सूची

[वर्णसमाम्नायानुसारिणी]

निबन्धनाम	निबन्धकनाम	पृष्ठम्
	[अ]	
अगुरुदाही	... ...	२५७
अग्निकुम्भः	... ...	२५८
अम्भस्येवान्धलग्नस्य विनिपातः पदे पदे	... ...	२७७
अपूपभोजी ...	... ...	२६४
अभिनन्दनम्—		
भारतीकृष्णतीर्थानाम्	... ...	११८
मन्मथनाथसुखोपाध्यायानाम्	... ...	११६
रामानुजाचार्याणाम्	... ...	११८
अभिभाषणम् ...	'संस्कृत एसोसिएशन' सभापतिः ...	१३५*
अलङ्कारलम्बकः ...	... ...	२५८
असन्तुष्टा द्विजा नष्टाः	... ...	२६२
अहो कृतपदा दूरे पतन्ति खपदे जडाः	... ...	२७८
अहो मूढप्रभुर्वेत्ति निग्रहं नाप्यनुग्रहम्	... ...	२८६
	[आ]	
आख्यगान्धर्विकी	... ...	२६७
आरब्धयामिनी	... ...	२३०-३३२-३५३
	[उ]	
उपनिषत्कथा ...	म० म० दुर्गाचरणसाङ्ख्यवेदान्ततीर्थः	९५

* संशोधितेयं संख्या। भ्रमादियं भाद्रसञ्चिकायां ११८ संख्यायां परिणता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निबन्धनाम	निबन्धकनाम	पृष्ठम्
[क]		
कन्यावर्धयिता नृपः	... ...	२८४
कपिञ्जलाधिकरणन्यायः	सम्पादकः	१८३
काचरलोचनः कपिलधूसरः	... ...	२७३
कालविलसितम् ...	म० म० दुर्गाप्रसादद्विवेदः	३२१
कालस्खेङ्गितम् ...	स्वर्गत-तारकनाथस्मृतिरञ्जनः	३३०
कुर्वेति पदस्य वैदिकत्वनिरासः ...	श्रीहाराणचन्द्रशास्त्री	८६
[ख]		
खर्जूरीच्छेदकः	... ...	२६०
[ग]		
गणकशिरोमणिः	... ...	२८३
गर्दभदोहनम् ...	... ...	२७०
गायत्रीरहस्यम् ...	श्रीशरत्कमलन्यायस्मृतितीर्थः	१२७*
गोदोहकः ...	... ...	२६१
[च]		
चक्रवाकः ...	... ...	२६६
चन्द्रदर्शी ...	... ...	२७१
चातकसन्देशः ...	श्रीभोलानाथ-कविराजः	८८
[ज]		
जानकीहरणम् ...	[सम्पादकेन संस्कृतम्]	२५१
जाम्बवतीपरिणयम्	... ...	१५८
[ड]		
डिम्भसंबोधनम् ...	महालिङ्गशास्त्री	२२५
[त]		
तण्डुलभक्षकः	... ...	२५८

* संशोधितेयं संख्या। अमादियं भाद्रसञ्चिकायां १११ संख्यायां परिणता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निबन्धनाम	निबन्धकनाम			पृष्ठम्
त्वरन्तां वाचकमहाभागाः	सम्पादकः	...	...	२०७
तिलकार्पिकः	...	...	...	२५७
तुल्येऽपि स्निग्धतायोगे तैलं तैलं घृतं घृतम्	...	...	...	२८०
तूलिकः	...	...	...	२६९
[द]				
दोषाय निर्विमर्शेव भीतप्रश्नोत्तरक्रिया	...	...	...	२७५
दाररक्षकः	...	...	...	२६५
द्विशिराः सर्पः	...	...	...	२६९
[ध]				
धनिकपशुपालः	...	...	...	२५८
ध्रुवपरित्यागेनाध्रुवनिषेवणम्	...	...	...	२८६
[न]				
न किञ्चित्ते ददामि	...	...	...	३५१
नासिकारोपणः	...	...	...	२५८
निधानदर्शी	...	...	...	२६०
निष्प्रज्ञो नाशयत्येव प्रभोरर्थमथात्मनः	...	...	...	३५१
नैव प्रीणाति मूढोऽर्थान् यावदर्थैः स नोज्झितः	...	...	...	२८०
न्यायतत्त्वकणिका	श्रीचण्डीचरणतर्कतीर्थः	...	...	२००
[प]				
पणव्ययेन काकिणीलाभः	...	...	...	२८५
परिदेवनम्	श्रीभोलानाथ-कविराजः	...	...	९३
पारिषदं किञ्चन निवेदनम्	...	...	...	१२०
पुरघाती	...	...	...	२८२
पृच्छा	...	...	...	२४
प्रकटमपि दोषं खं नैव बुध्यन्ते बालिशाः	...	...	...	२८४
प्रतिवचनम्	सम्पादकः	...	...	८३
प्राणेभ्योऽप्यन्नमुष्टिर्हि कृपणानां गरीयसी	...	...	...	२७२
प्राप्तं पवम्	...	...	...	२२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निबन्धनाम		निबन्धकनाम			पृष्ठम्
		[ब]			
ब्रह्मचारिसुतः		...	...	...	२८३
		[भ]			
भात्मभीतः		...	...	...	२८२
		[म]			
मतिमञ्जरी	...	सम्पादकः	...	...	१
मधुमासे	...	श्रीहरिपदभारती	...	...	४
मयूरकविः	...	...	...	...	१४९
मालतीमाधवे नायकचरितम्		... श्रीशिवशङ्करशास्त्री	...	...	३५९
मासिकश्राद्धकालाः	...	श्रीविष्णुधरतर्कतीर्थः	...	...	५
मूढ-पथिकः	...	...	...	...	२८२
मूर्खः पुत्रः	...	...	...	...	२७०
मूर्ख-भिषक्	...	...	...	...	२६७
मूर्खभृत्यः	...	...	...	...	२६२
मेघदूतम्	...	श्रीनित्यगोपालविद्याविनोदः	...	...	७९
मेघनादवधम्	,,	...		२५-१६९-२४१-३५५-३७३	
		[र]			
रवीन्द्रनाथः	...	के० श्रीनिवासकृष्णः	...	...	७५
राजसूयम्	...	नारायणभट्टस्य	...	...	२८७
राजसूयप्रबन्धस्योपोद्घातः		... के० रामपिषारटि यं० ए		...	३५२
रिक्थविभागिनौ भातरौ		...	...	...	२६२
		[ल]			
लवणाशी	...	...	...	...	२६०
लौमशः फलभक्षकः		...	...	...	२७०
		[व]			
वाचोयुक्तिपटुसहिषभक्षकः		...	...	...	२६५
विशेषतो द्रष्टव्यम्		...	...	...	८४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निबन्धनाम		निबन्धकनाम			पृष्ठम्
		[श]			
शब्दविमर्शः	...	श्रीविधुशेखरभट्टाचार्य्यः	...	...	३२६
शिथदयम्	...	....	...	...	२६८
शृङ्गारलीलातिलकम्	...	भास्करकवेः	...	...	३३
श्वदृष्टः श्रमणः	...	...	...	...	२७१
		[स]			
संस्कृत-साहित्य-परिषदः अष्टादशवर्षीयं कार्यविवरणम् (श्रीअमरेश्वरठाकुर-वेदान्तशास्त्री एम्. ए. पी. एइच्-डी)			...	...	१८१
,,	,,	अधिवेशनम्	...	...	२१५
,,		अष्टादशवर्षीय आयव्ययनिष्कर्षः	...	...	२१२
,,		१३४१ वङ्गाब्दीयकार्यपरिचालकाः		...	२१७
सत्त्वानुरूपं सर्वस्य धाता सर्वं प्रयच्छति		...	...	...	२८७
* सभापतेरभिभाषणम्	...	श्रीकिरणचन्द्रदे	...	...	१९८
समालोचनम्—		सम्पादकः			
आयुर्वेदमञ्जूषा		,,	...	...	१५७
किङ्किणीमाला		,,	...	...	१२४
मेघदूतम्		,,	...	...	१९०
श्रीवैष्णवकण्ठरत्नम्		,,	...	...	१९८
संस्कृतपद्यवाणी		,,	...	...	९२
Notes on Poetry Selections			...	...	१८७
समीचीनमभिज्ञानम्			...	...	२८५
सरलचित्सुखोसारम्	...	स्वर्गत-रमेशचन्द्रसाङ्ख्यवेदान्ततीर्थः		...	९-६३-१०४-१४६-१७९-२४९-३३८-३८३
सदृशचित्तप्रमाणेन सदृसदृ वऽभिवाञ्छति		...	...	...	३५१
सुभाषितानि		...	...	..	१५५
सुभाषितानि ...		कल्हणस्य	...	...	२३-७७

* संस्कृत-साहित्य-परिषदोऽष्टादशवर्षीयमहोत्सवे सभापतीनां 'आइ, सि, एस,' इत्यधिकारवतां श्रीमतां किरणचन्द्र-दे-महोदयानां वङ्गभाषामयस्याभिभाषणस्यानुवादः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निबन्धनाम	निबन्धकनाम	पृष्ठम्
सुवर्णसुग्धः	... ...	२६३
सौजन्यम्	ब्रह्मचारी ब्रह्मदेवः	३१
स्वबुद्धिरेव मुग्धस्य वरं न त्वनुशासनम्	... ...	२७६
स्वयमसिद्धः कथमन्यान् साधयेत्	... ...	२७८
स्वर्गतः कविराजशिरोमणिः	... ...	९०
स्वर्गत-श्यामादासवाचस्पतेर्जन्मपत्रम् ...	श्रीअतुलकृष्णज्योतिषार्णवः ...	११४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषत्

(Registered under Act. XXI of 1860)

समितिरियं संस्कृतभाषायास्तन्मूलकप्राकृतादीनाञ्च सम्यगालोचनया यथावत्-प्रसारप्रतिपादनाय १९१६ खृष्टाब्देऽस्यां कलकत्तायाम् प्रतिष्ठापिता—

(१) प्रतिमासं सभायां शास्त्रार्थविचाराद्यनुष्ठानेन।

(२) स्वकीये विद्यालये प्राचीनरीत्या विद्यार्थिनामध्यापनेन।

(३) छात्राणाम् आहार-वासस्थानादिप्रदानेन।

(४) मुद्रापितानां हस्तलिखितानाञ्च ग्रन्थराशीनां परिषद्-ग्रन्थागारे नियतसञ्चयनेन।

(५) अन्तरान्तरा रङ्गेषु संस्कृतरूपकाणां प्रयोगेण।

(६) यथानियमं मासिक-पत्रिका-प्रचारेण (पत्रिकेयं कोचिन-महीशूर-प्रदेशस्य शासकसम्प्रदायैरपि विद्यालयेषु ग्रन्थागारेषु च व्यवहारार्थमनुमोदिता)।

(७) नवीनया रीत्या अमुद्रापित-संस्कृतग्रन्थानां प्रकाशनेन तथा विविधैरुपायान्तरैश्चाम्बमुद्देश्यकूलयति।

त्रिंशता सभ्यैः स्थापितेयं परिषदिदानीं विंशतितमे संवत्सरे नानाप्रदेशेगतसहस्रसभ्यसमलङ्कृता।

सदस्यानां लाभः—

सदस्याः (१) निखिलेषु परिषत्कृत्येषु लब्धाधिकाराः (२) रूपकाभिनयदर्शनशक्ताः (३) ग्रन्थागारस्थ-पुस्तकादिपठन-समर्थाः (४) मूल्यं विनैव मासिकीं संस्कृतपत्रिकां ते लभेरन (५) परिषत् प्रकाशितग्रन्थाश्च तेषां सुलभतराः स्युः।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिकाता ओरियेण्टाल सिरिज

१। **युक्तिकल्पतरुः**—महाराजश्रीभोजविरचितः। पण्डितश्रीईश्वरचन्द्रशास्त्रिसांख्य-वेदान्त-न्याय-दर्शनतीर्थेन संशोधित.। अत्र राजनीतिः, गृह-दुर्ग-नगरादिनिर्माणम्, ध्वज-चामरालङ्कारादिनिर्णयः, मणिरत्नाश्वगजादिपरीक्षा, शस्त्र-नौका-यानादिलक्षणानि च सविशेषं निरूपितानीति तत्तद्विषयमनुसन्धित्सूनां महोपयोगोऽयं ग्रन्थः—२॥०)

२। **चाणक्यराजनीतिशास्त्रम्**—विद्वद्वर जोहान-फ्यान्-प्यानेन-कृताङ्गलभूमिकासमेतम्—॥।=०

३। **मुक्ताफलम्**—बोपदेवविरचितम् हेमाद्रिकृतटीकासहितम् वैष्णवानामत्युपादेयतया परिगृहीतं भागवततत्त्वरत्नमिदं डाः श्रीनरेन्द्रनाथ लाहा, पि-एइच-डि. लिखितबृहदाङ्गलभूमिकया समलङ्कृतम् खण्डद्वयात्मकम्—६)

४। **चाणक्यकथा**—रविनर्त्तकविरचिता। विशाखदत्तकृत-मुद्राराक्षससंवादिनीयं कथा सुललितपद्यमयी (द्वितीयाङ्कनाहत्तिः)—१)

५। **वक्रोक्तिजीवितम्**—श्रीराजानककुन्तलविरचितं खोपज्ञवृत्तिसमेतमतिप्रमाणभूतमलङ्कारशास्त्रम्, डाः श्रीसुशीलकुमार दे, डि-लिट्. महोदयेन संशोधितम्—३॥०)

६। **पद्मपुराणम्**—स्वर्गखण्डस्य पञ्चाध्यायात्मक शकुन्तलोपाख्यानम् पातालखण्डस्यैकादशाध्यायात्मक-रघुवंशवर्णनञ्चात्र बङ्गदेशोपलब्धहस्तलिखितमादर्शमाश्रित्य संशोधितमध्यापकश्रीहरदत्तशर्म्मणा सुबृहदाङ्गलभाषामयभूमिकायां प्रमाणीकृतञ्च कालिदासोक्तशाकुन्तल-रघुवंशयोर्बीजभूतत्वं पद्मपुराणस्य—२)

७। **जयमङ्गला**—श्रीशङ्कराचार्य्यविरचिता। ईश्वरकृष्णकृतसांख्यसप्ततिग्रन्थस्य टीकेयं श्रीहरदत्तशर्म्मणा संशोधिता—२)

८। **योगचिन्तामणिः**—श्रीशिवानन्दसरस्वतीकृतिरतिप्राचीनो ग्रन्थोऽयं योगशास्त्रस्य बुधिरिति शक्यते वक्तुम्—२)

९। **ब्रह्मसूत्रम्**—श्रीमद्भागवतभाष्यसमेतम्। "अर्थोऽयं ब्रह्मसूत्राणां श्रीमद्भागवतादिभिः" इति गारुडवचनस्य याथार्थ्यं प्रदिदर्शयिषता पण्डित-श्रीहरिदासविद्यावागीशेनात्र श्रीमद्भागवतग्रन्थादुद्धृता ग्रन्थांशब्रह्मसूत्रभाष्यतया निरूपिताः, ब्रह्मसूत्राणि च बङ्गभाषया विशेषेण व्याख्यातानि—२॥०

प्राप्तिस्थानम्—

कलिकाता ओरियेण्टाल बुक एजेन्सी

९ पञ्चानन घोष लेन, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073

Vol. XVIII, No. 3] [July, 1935.

१८५७ शकीये आषाढे १८श-वर्षस्य ३य-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्



सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, Shyambazar, Calcutta.

Printed at
CALCUTTA ORIENTAL PRESS
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

শীঘ্র প্রকাশিত হইবে

সুরভারতী

সংস্কৃত-সাহিত্য-সম্বন্ধীয় বাঙ্গালা

মাসিক-পত্রিকা

"Calcutta Oriental Journal" "সংস্কৃত-সাহিত্য-পরিষৎ" ও "মঞ্জূষা" সম্পাদক, কলিকাতা বিশ্ববিদ্যালয়ের তুলনামূলক ভাষাতত্ত্বের ও সংস্কৃতবিভাগের অধ্যাপক

শ্রীক্ষিতীশচন্দ্র চট্টোপাধ্যায়

সম্পাদিত।

এই অভিনব মাসিক পত্রিকাতে বেদ, বেদান্ত, মীমাংসা, জ্যোতিষ, কাব্য, অলঙ্কার, আয়ুর্বেদ, পুরাণ প্রভৃতি বিবিধ-বিষয়ক প্রবন্ধ থাকিবে। তদ্ভিন্ন মহাকবি ভাসের অমৃতময়-লেখনীপ্রসূত নাটকগুলি সানুবাদ প্রকাশিত হইবে। বৈয়াকরণপ্রবর মহর্ষি পাণিনির অমর ব্যাকরণ বিস্তৃত টীকাদি-পরিশোভিত হইয়া প্রকাশিত হইবে।

অগ্রিম বার্ষিক মূল্য ডাকমাশুল সমেত দুই টাকা মাত্র।

আজই গ্রাহক হউন।

শ্রীজ্যোতিষচন্দ্র চট্টোপাধ্যায়

কর্ম্মাধ্যক্ষ—সুরভারতী।

৬১এ, রামকান্ত বোস ষ্ট্রীট, বাগবাজার, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

July, 1935. | १८५७ शकीये आषाढे १८श-वर्षस्य ३य-संख्या | Vol. XVIII No. 3

धर्मपरिस्थितिः

[निबन्धकः—महामहोपाध्याय-श्रीयुक्त-कुञ्जविहारी तर्कसिद्धान्तः]

सुखात् परं दुःखं दुःखात् परं सुखम्, अभ्युत्थानात् पतनं पतनादभ्युत्थानम्, जन्मनो मरणं मरणाच्च जन्मेत्येवं चक्रवत् परिवर्तनं लोकशास्त्रप्रत्यक्षसिद्धम्। तथाच पतितानामपि मानवानां कदाचिदवश्यमेवाभ्युत्थानं भवेदिति मन्ये। अधःपातचरमतामुपगते सम्प्रति भारते मादृशामपि शिश्नोदरपरायणानां कदाचिद्धर्मानुसन्धित्सा जायत इति। सम्प्रति प्रायः सर्वेषामेव मर्मणि धर्मभावबीजमङ्कुरितम्, तच्च यदि सदुपदेशाद्यमृतसेकेन पल्लवितमपि कर्त्तुं शक्येत तदा क्रमशः शाखाप्रशाखादिभिर्वर्द्धमानं महापादपपदवीमासाद्य काले फलादिभिः परमां प्रीतिमुत्पादयेत्।

इतः पूर्वञ्च ये नव्यशिक्षिता धर्मकथा-नामत एव श्रवणं विधाय भ्रूकुटिविक्षेपेण पलायाञ्चक्रिरे वञ्चकानेव च धर्मयाजकान् मन्यमाना यथेच्छमवामंसत, कालप्रभावात्त एव सम्प्रति धर्मोपदेशं सादरं शिरसि दिधीर्षन्तीति किञ्चिदाशास्थानमस्माकम्। परन्तु दुःखमेतावदेव यत्तेषां धर्मबुभुत्सायां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्त्तमानायामपि धर्मकर्मानुष्ठानं प्रति न तिष्ठन्ति प्रायो मनांसि। अबुद्धा किमपि ते कर्त्तुं नाग्रेसरन्ति, सर्वेष्वेव कार्यकलापेषु केवलं युक्तिं परिज्ञातुमभिलषन्ति, युक्तिमृते न कुत्रापि तेषामनुरक्तिर्दृश्यते। किन्तु कर्मानुष्ठानं विना धर्मस्य मर्म नैवावगन्तुं शक्यते, लौकिकदृष्टान्तेन धर्मतत्त्वनिर्द्धारणमतीवाशक्यम्, समतीव सूक्ष्मा धर्मस्य गतिः। अत्र च—

"कानीनस्य मुनेः सहोदरवधूवैधव्यविध्वंसिनो
नप्तारः किल गोलकस्य तनयाः कुण्डाः स्वयं पाण्डवाः।
तेऽमी चैकवधूपभोगनिपुणास्तेषाञ्च सङ्कीर्त्तना-
च्छान्तिः स्वस्त्ययनं भवेदनुदिनं धर्मस्य सूक्ष्मा गतिः॥"

इति श्लोकः सम्यगुपन्यासमर्हति लब्धुम्।

अपरैश्च लब्धयोगमाहात्म्यैर्भूयो भूयः सन्दिष्टम्—"धर्मोपदेशतात्पर्यं न साधारणलौकिकदृष्टान्तैरवधार्यं परन्तु योगानुष्ठानादिविशुद्धचेतसामनायासाधिगम्यमिति प्रथमतः केवलं धर्मोपदेशो मान्य एवे"ति। अत एव धार्मिकधुरीणेन धर्मनन्दनयुधिष्ठिरेणाप्यभिहितम्—

"धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः॥"

इति। तथा च धर्मं बुभुत्सुभिर्युक्तिं निर्द्धारयितुमसमर्थैरपि आप्तवाक्यविश्वासेनावश्यं तन्निर्दिष्टं कर्मानुष्ठातव्यम्। एतदपि तैरवहितैश्चिन्तनीयं यन्मादृशामदृश्ययुक्तिकत्वेऽपि तत्तद्वचनप्रतिपाद्यविषयाणामप्रामाण्यं नार्हति भवितुम्। यस्मान्मादृशादृश्ययुक्तिकानामपि बहूनामेव वचनानां प्रामाण्यमनुमन्यते। योगबलेन स्थूलसूक्ष्मभूतभविष्यद्वर्त्तमानेषु सर्वेष्वर्थेषु तुल्यदृश्यः खल्वस्माकं शास्त्रकारास्तात्पर्यादिकमवधार्यैव शास्त्राणि प्राणैषुः। वेदास्तु ह्रद्या अनादिसिद्धाः सर्वथैव दोषकलङ्कासङ्कुलाः। तथाहि—

"दोषाः सन्ति न सन्तीति पौरुषेयेषु युज्यते।
वेदे कर्त्तुरभावाच्च दोषाशङ्कैव नास्ति नः॥

इति। तस्मात्तत्तत्प्रतिपाद्यं सर्वमेव युक्तिसिद्धमित्यवबोध्यम्। सर्वेषामेव सयुक्तिकत्वे कथमस्माभिर्न सर्वत्रावबुध्यन्ते युक्तय इति तु न विषादस्थानम्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्मादाधुनिकविज्ञानवित्कार्याणामपि तात्पर्यं प्रायो नाकलय्यते मादृशैः, का कथा दिव्यदृष्टिसम्पन्नोपदिष्टानां तत्तत्कार्याणाम् ।

अबुद्ध्वा कार्यानुष्ठानेन फलावाप्तिरेव न भवेदित्यपि नाशङ्कनीयम् , बहूनामेवापरिज्ञातफलयुक्तिकानामपि कार्याणां फलदर्शनात् । दाहकत्वमजानन्नपि वह्नौ पतन्नविदग्धः किं न दग्धो भवेत् ? तृष्णानिवारकत्वमजानन्नपि जलं पिबन् वितृष्णः किं न जायेत ? यत्तु यन्त्रेण संवादप्रेषणादिकं मादृशां धारणातीतं सर्वदा सम्पद्यते, तत्र नियुक्ता अपि कर्मकारिणः किं "कथमेकत्र कृतः शब्दः सुदूरतरापरप्रदेशे गच्छती"ति सयुक्तिकं प्रतिपादयितुं शक्नुवन्ति ? परन्तु नैव ; किन्तु तथापि ते यथारीति कार्यमनुष्ठाय संवादादानप्रदानादिरूपं फलं लभन्त एवेति सुविदितमेव सर्वेषाम् । तस्मात् केवलं युक्त्यनुसरणं परित्यज्य शास्त्रोक्तरीत्या यथायथं कर्मानुष्ठानेन क्रमादग्रेसरीभूय स्वत एव क्रियानुष्ठानबलाद् युक्त्यादिकमवधारयितुं शक्येत, नोचेत् केवलं कर्कशतर्केण युक्त्याद्यनुसन्धानत एवायुः क्षीयेत । बुद्ध्वा करोमीति कृत्वा कर्माण्यननुतिष्ठतः केवलमनल्पं जल्पतो बोधः करणञ्च द्वयमेव दुःसम्पादम् । यथा "सन्तरणपाटवमनासाद्य नाहं जलावगाहनं करिष्यामी"ति प्रतिज्ञातवतो जलावगाहनैकसाध्यं सन्तरणपाटवं जलावगाहनञ्च द्वयमेवासाध्यं भवेत् ।

वस्तुतो यं कमपि विषयं दिधारयिषुभिरेव प्रथमतस्तूष्णीम्भूयोपदेष्टुर्वाक्यार्थो ग्रहीतव्यः, ततश्च क्रमशस्तत्र निविष्टैः स्वचेष्टयैव बहवः संशया उच्छेत्तुं शक्येरन् , शिष्टाः पुनरुपदेष्टुरुपदेशपरम्परया । अन्यथा प्रथमत एव यदि ते संशयापसारणे यतेरंस्तदा बहूपदेशतोऽपि प्रकृतं तत्त्वमवधारयितुमसमर्था अगत्या एतद्विषयावधारणाद्विरता एव भवेयुः ।

सर्वदैवैतदुपलभ्यते यानि कानिचिच्छास्त्राणि विशेषतो नव्यन्यायादिशास्त्राण्यध्येतुं प्रवृत्ता धीरधिषणा अपि यदि प्रथमत एव सर्वं युक्त्यादिभिर्बोद्धुं प्रवर्तेरंस्तदा कथमपि तत्तत्तात्पर्यमवधारयितुं न प्रभवेयुः, परन्तु बोद्धमशक्नुवन्तः कर्कशतर्कसङ्कुलतामापादयन्तस्तत्र विरक्तास्तत्तदध्ययन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेव परित्यजेयुः। किन्तु तत्रैव यदि किञ्चिद्धैर्यमवलम्ब्य गुरूपदेशनिविष्टमनसा कांश्चिद् ग्रन्थान् सम्यगवबुद्ध्वाधिगच्छेयुस्तदा क्रमशस्तत्र प्रविष्टाः स्वचेष्टयैव बोद्धुं शक्नुयुः कीदृगिष्टकारीणि युक्तियुक्तानि च तानि शास्त्राणीति। बहिःस्थिताः कदाचिदपि नावगन्तुमर्हन्त्याभ्यन्तरविवरणम्, परन्तु केवलं कदर्थमेव परिकल्पयन्ति। यथाच हट्टाद् बहिरटाट्यमानाः केवलं कलहव्यञ्जकं कोलाहलमाकलयन्तो हट्टस्थितानां वितण्डाकारित्वं विभावयन्ति, त एव पुनस्तत्र प्रविशन्तः स्वस्वकार्येषु च मनांसि निवेशयन्तस्तादृशं कलरवं नाकर्णयन्ति पश्यन्ति च सर्वानेव स्वस्वकार्येषु व्यापृतान्, स्वस्वप्रयोजनसाधका एव शब्दाः परस्परं मिलितास्तत्तत्कोलाहलरूपेण परिणताः, नास्ति तत्र कलहलेशोऽपीति ज्ञातुमपि प्रभवन्ति। तथैव यावदस्य धर्मापणस्य बहिरवतिष्ठन्ते, धर्मिष्ठा अपि कर्मानुष्ठानविरता लोकास्तावत् सर्वं विवादास्पदमनुभवन्ति यदि च कथञ्चित् तत्र प्रविश्य मनो निवेशयितुं प्रभवेयुस्तदा न तत्र विवादलेशमप्यवलोकयेयुः, पश्येयुश्च सर्वानेव धर्मापणप्रविष्टान् स्वस्वकर्मानुष्ठाननिरतान्। शक्ष्यन्ति च तदा सर्वेषामेव पुरुषार्थसाधकतामवलोक्य सार्थकतामात्मनः सम्पादयितुम्। तथाच सिद्धं—केवलं धर्मबुभुत्सया नहि सम्भवेदभिलषितं फलम्, परन्तु कर्मानुष्ठानमेव श्रेष्ठसम्मतमभीष्टसाधननिदानमिति।

तत्र च कोऽसौ धर्मः कीदृशं वा तदनुष्ठानमित्यत्र सन्ति बहुधा विप्रतिपत्तयः। नात्र किमपि विवदामहे, किन्तु सनातनधर्मावलम्बिनामिदानीन्तनीमवस्थां कर्त्तव्यञ्चावलम्ब्य किमपि समालोचयामः। सम्प्रति नव्यशिक्षयोन्नतिमधिगता बहव एव युवानो धर्मपिपासया पुरुषपरम्पराचरितं क्रियाकलापादिकं सर्वं परित्यज्य "कुतस्तादृशं मन्त्रमधिगच्छामो येनानायासमाध्यात्मिकोन्नतिमधिगच्छाम" इति चिन्तयन्त इतस्ततो विचरन्ति। पैतृकगुरुदत्तमन्त्रेण किमपि फलं न भवेदित्येव तेषां विश्वासः। हन्त! ते यदि पैतृकगुरूपदेशानतिक्रमेण क्रियाकलापादिकमनुतिष्ठन्तोऽकृतार्था एवमसिद्धान्तयिष्यंस्तदा किमपि खेदकारणं नाभविष्यत्, किन्तु ते प्रथमत एव पुरुषपरम्परागतं गुरुं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मपण्यं वणिजं मत्वाऽवहेलयन्ति। परन्तु ते इतस्ततो बंभ्रम्यमाणाः स्वीकृत्यापि स्वेच्छया कतिपयान् गुरून् कुत्रापि परितृप्तिमलभमानाः कतिपययोगाङ्गाभ्यासेनैवाविवेकलोकमोहकाद् अचिरेणैवोपनिबद्धसम्प्रदायविशेषाद्विधृतसन्न्यासिवेशात् कस्माच्चिज्जीवन्मुक्तम्मन्याद् गुरुप्रवरात् सम्प्रदायप्ररोचनया करविलसितापवर्गसोपानमिव कञ्चिन्मन्त्रं गृहीत्वा कियत्कालं तन्मतानुवर्त्तिनस्तिष्ठन्ति। तदुपदेशानुसारेण योगाङ्गानुष्ठानमपि कर्त्तुमारभन्ते। किन्त्वविशुद्धचित्ततया यथोचितमनुष्ठातुं नार्हन्ति, अयथानुष्ठिततत्तदनुष्ठानाच्च केचनाकालमृत्युतां भजन्ते, केचिदुन्मादरोगग्रस्ततां लभन्ते, केचिद्वा इतो भ्रष्टास्ततो नष्टा जडवत्तिष्ठन्ति। एवं सम्प्रदायविशेषप्ररोचनया देशस्य कियानपकारः प्रचलतीत्यालोचनतोऽपि चेतः समुद्विजते। तस्मादेवमुच्यते—येषां धर्मपिपासा वर्त्तते ते यदि सत्कर्मानुष्ठानादिना चित्तशुद्धिं विधायाध्यात्मिकोन्नतिसाधनाय यतेरंस्तदा नैवं समुपलब्धापदो भवेयुः। यथा च वृक्षस्य निम्नदेशारोहणमन्तरेणाग्राधिरोहणमशक्यम्, तथैव कर्मानुष्ठानादिमन्तरेण प्रथमत एव ज्ञानमार्गविचरणमशक्यमिति मन्यामहे। तथाचोक्तम्—

उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः।
तथैव ज्ञानकर्मभ्यां जायते परमं पदम्॥

इति। ये तु जन्मान्तरीणकर्मवशादेव विधौतकल्मषा अमलमानसा उत्तमाधिकारिणस्तेषामिह कर्मानुष्ठानमन्तराऽपि भवतु नाम निःश्रेयसाधिगमः, किन्तु तादृशाधिकारिणां दृष्टान्तेन मादृशामपि कीटसदृशामनुसरणं सर्वथैव हास्यव्यञ्जकं विपज्जालसङ्कुलञ्चेति मन्तव्यम्। तथाच मादृशैः सर्वैरेव प्रथमं स्वस्वाश्रमोचितकर्मानुष्ठानेन चित्तशुद्ध्यर्थं यत्नो विधेयः, नो चेत् यः कोऽपि गुरुराश्रयणीयो भवतु कोऽपि केवलं मन्त्रप्रदानेन सदुपदेशप्रदानेन वा समुद्धारयितुं न प्रभवतीति सुदृढं विचिन्त्य कर्त्तव्यमनुष्ठेयं मोक्षार्थिभिरिति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आइ० सि० एस्० जामाता

[निबन्धकः—आर् रङ्गाचार्यः शिरोमणिः]

नीलकण्ठः। अस्य जन्मभूमिर्देवीपट्टणम्। प्रथमे वयसि वर्तमानस्याप्यस्य लण्डन् (London) नगरमधिकृत्य महती महनीयता-मतिरासीत्। तत्र गृहा वीथ्यो गोपुराण्यन्यानि च कनकमयोभिरिष्टकाभिराचितानीत्येवास्य प्रायः प्रत्ययो बभूव। कथमपि इङ्गलण्ड-(England)-देशो द्रष्टव्य इति मनीषाऽस्य मेदुरा प्रादुरास। कथमिदमस्य सुसाधम्। यतोऽस्य पिता धनुष्कोटिवास्तव्यः समापतद्भ्यो यात्रिकजनेभ्यो लब्धेन भैक्ष्येण जीविकां निर्वर्तयन् कश्चन दीनः पुरोहितः। अथापि प्रातिवेशिको ज्यौतिषिकः कश्चन वृद्धो नीलकण्ठस्य जातकं समीक्ष्य "राजयोगोऽस्ति, नियतमयं भविता कस्यचिद्देशस्य शासिते"ति भावि शुभंयु दैवं समादिदेश।

युवा नीलकण्ठो भृशं व्यवसायपरः पठितिनामग्रेसरो बभूव। "श्रिया दुरापः कथमीप्सितो भवेदि"ति पाठं व्यत्यस्य "मयेप्सिता श्रीः किमहो दुरासदा" इति पपाठ। एकवधूं काञ्चन कन्यां परिणीय तयात्मानं सर्वोन्नतं स्थापयितुममंस्त।

नीलकण्ठोऽल्पेतरेणोत्साहेन परीक्ष्यान् ग्रन्थान् पपाठ। ज्ञातव्यान् धार्यानंशान् सुदृढं चिन्तयामास। बि० ए० अनरस् परीक्षायां सर्वोत्तमतया जयं प्राप। आइ० सि० एस् परीक्षायां परीक्ष्येषु स्वयमन्यतमो भवितुमियेष। हन्त! स मनोरथो न फलायाकल्पत। कथमपि लण्डन्-नगरी गन्तव्या। परीक्षका द्रष्टव्याः, आत्मानमवगमयितव्याः। समीहितं साधयितव्यमिति निश्चिकाय। क्षणमपि न विललंबे।

भगवान् विवस्वानपि विहायावाचीमुदीचीं प्रतस्थे। प्रथमाश्रमिणां समुन्मेषसमयः प्रादुरभूत्। सर्वतः कोलाहलः समुदजृम्भत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमसुन्दरशास्त्री। अयं धूमशकटास्थान्यां नियुक्तः कश्चनाधिकारी। तस्यैकैव दुहिता। नाम्ना वासन्ती। वयसा गुणेन रूपेण शोभया च स्पृहणीया। एकश्च पुत्रोऽस्य बालश्चतुर्वर्षदेशीयः। यद्यप्यायतिर्न स्फीता तथापि मितंपचेन व्ययेन समधिकां संपदमयमुदचयामास। स नीलकण्ठमन्तरेण बहुशः शुश्राव। दानीयं तममन्यत। वासन्ती नीलकण्ठाय दारक्रियया दातव्येति निरणैषीत्। यौतकं प्रति नाधिकं वक्तव्यम्। आइ० सि० एस् परीक्षावधिकस्य लण्डन्नगरावस्थानस्य यावदपेक्षितं तावद्धनं श्वशुरेण दातव्यमिति निश्चितम्। वासन्तीनीलकण्ठीयः परिणयविधिमेहता समारोहेण अन्याद्दशेनाडम्बरेण समपद्यत। नीलकण्ठश्च अविलम्बितं लण्डन्नगरं प्रचण्डोद्यमः प्रतस्थे। तत्र चाचरणेन, आकृत्या, वेषेण, गत्या, भाषणेन, उच्चारणेन सर्वथा लण्डन्नगरजातां जनतां लघुतरमतिशिश्ये। यो यः पश्यति स सर्वोऽपि तं कमपि सुन्दरम् आङ्गलजात्यां लब्धजन्मानमेवामन्यत। नीलकण्ठोऽपि असकृदात्मानमधिकृत्य दूयते स्म। "अहो अपण्डितता विधेः। जनुषेऽङ्ग्लण्डेयो यदहं नाभव"मिति। तथापि इन्द्राभूमौ लब्धजनुषो वासन्त्या रूपं लावण्यं च न तस्य चक्षुषोर्मनसश्च नैव पुस्फोर। हन्त! स एक एव हेतुरात्मनो हैन्दवत्वप्रकाशको जातः। तत्तादृशमात्मनो नामापि तस्मै नतरामरोचत। यत इदं सुदीर्घं परुषाक्षरघटितमसुखोच्चारणं बभौ। सद्य एव तत्तथाऽन्यथयति स्म यथा श्रवणमात्रेण तत् किञ्चिदाङ्गलं नामेव भायात्। ननु कीदृशं तत्। "नैल. ओ. केण्टन्" इति। अपि तु भीतिरियमेका नैव तं जातु जहौ यत, यत्किञ्चिच्चिन्हमात्मनो हैन्दवत्वद्योतकं गूढं संलक्ष्येत वेति। एको हायनः पूर्णः। नैल. ओ. केण्टन् उपाधिकरणिकस्थाने (Sub-collector) नियुक्तः। प्रतिप्रयाणाय मतिं चकार। नावमारुरोह। कथमपि एकस्मिन् वत्सरे द्वित्राणि पञ्चषाणि वा दिनानि श्वशुरगृहे वस्तव्यानि न तु ततोऽधिकमेकमपि, अन्यथा लाघवमिति मेने।

सुन्दरशास्त्री आत्मन आइ० सि० एस् जामातरमधिकृत्य प्रत्यहं सचिन्तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थितः। अहो !! काचन तन्त्रीवार्ता !! को विशेषः। आइ० सि० एस् जामाता लण्डन् नगरतो निवर्तमानोऽस्तीति। कथमिह कथनीयो वासन्त्यास्तदानीन्तनः कुतूहलस्यातिरेकः। दवीयसो द्वीपान्तरादावर्तमानं जामातरं प्रत्युत्थातुं सभाजयितुं च सुन्दरशाला अनल्पेनाऽऽदरेण महता च प्रमोदेन प्रतीक्षाञ्चक्रे। स महान् किल कश्चनातिथिविशेषः। अद्य चतुर्थवादनसमये तदीयमागमनं प्रतीक्षितम्। महान् संभ्रमः। अन्यादृशः कोलाहलः। अस्मदीयो नैल्. ओ. केण्टन् जामाता श्वशुरमन्यांश्चालक्षितमतर्कितं चागत्य विस्मापयितुमियेष। श्वशुरगृहस्य नातिदूरतो धूमशकटादवारुरोह। केनचित्प्रवहणेन प्रतीक्षितकालात्पूर्वमेव श्वशुरगृहमाजगाम। प्रवहणशब्दो द्वारि शुश्रुवे। बालकः पुत्रः सरभसं बहिराजगाम। कमपि सुन्दरयुवानं पुरुषविशेषमाप्रपदीनैकाकारप्रावारकवेष्टितं पिटकायमानशिरस्त्राणं प्रवहणादवतरन्तमैक्षत। अहो !! किमाश्चर्यम् !! "लण्डन्-नगरादागतो जामाता" इत्युच्चैरुद्घोषयन् निपतन्नुत्पतन्नन्तः प्रविवेश। जामाता च सस्वागतं ससभाजनं प्रातिस्विकतया आरचिते अपवारके सोपचारं निवेशितः। कतिपयनिमेषानिव विश्रम्भालापाः स्वैरं प्रावर्तन्त। जामाताऽपि विश्रान्तिसुखमनुभवितुं विविक्तं विसृष्टः। अभ्यागतं जामातरं वीक्षितुं बन्धवः पौराश्च संवशः समाजग्मुः प्रतिजग्मुश्च।

लोके यदि नाम यत्किञ्चित्प्रेयस्या वासन्त्या अपि समधिकतरं स्पृहणीयं वस्तु नीलकण्ठस्य मानसीं वृत्तिमावर्जयितुमीष्टे स्म, तर्हि दिगन्तविश्रुतं सर्वबालमनोहरं तादृशं तत्स्वादुतमं "काराबून्दी" नामकं प्रसिद्धं भक्ष्यविशेषमतिरिच्य किमन्यदुज्जिहीताम्। अहो ! कष्टम् ! ब्रह्मणा सृष्टेषु इदमतिरमणीयं वस्तु सर्वत्रापि लण्डन्नगरे सुदुरासदमासीत्। यदाऽयं श्वशुरगृहमागच्छन्नासीत् तदा मध्येपथमस्य किञ्चित पथिकजनपेयगृहं (hotel) नयनपथं गतम्। यद्यपि सर्वमिन्द्याजातं वस्तुजातं सर्वथा तस्य प्रद्वेषजनकं तथाऽपि यदा तत् श्रीमत् प्रेयः काराबून्दीभक्ष्यकमस्य दृष्टिपथं गतं तदा चापलमवर्धत। जिह्वाग्राल्लालाबिन्दवः स्वैरमव्याहतं निःसुस्रुवुः। हा !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैवी चित्रा गतिः। जनुषा कृष्णं कुक्कुरं कः श्वेतयितुमीष्टे। तादृशं प्रेम-सर्वस्वभूतं भक्ष्यकमक्रीत्वा क्षणमप्यवस्थातुं नायं शक्नोति स्म। आङ्गलानां संप्रदायमाचारेणानुष्ठातृणामग्रेसरो नीलकण्ठः पथि चरन् जनः पामर इव तत् पश्यतां पुरश्चर्वितुं नैव चकमे। यतोऽन्यथा द्रष्टृजनाः आइ० सि० एस्० परीक्षायामुत्तीर्णमात्मानं पथि भक्ष्यं चर्वन् (?) गच्छन्तं मिथ्यांगलवेष-धारिणं कमपि इन्द्याभूमिजातमित्येवावगच्छेयुरिति। अतोऽलक्षितमेव तदुपभोक्तुमचकमत। भद्रं तत्पोटलीकृत्य पेटिकायां निक्षिप्य तद्ध्यानपरो ररक्ष। तदाप्रभृति विविक्तमतृतीयाक्षिगोचरमुपभोक्तुं तत्किञ्चित्समय-विशेषमुदीक्षमाण एवावतस्थे।

सर्वोऽपि भार्याजनो निवृत्तः। इतस्ततो नीलकण्ठः पश्यति स्म। दिष्ट्या न कोऽपि ददृशे। पेटिकामुद्घाट्य पोटलिकां जग्राह। कोणीभूतं तदग्रं किञ्चिदिव नखमुखेन चिच्छेद। ऊर्ध्वमुदधार। वक्त्रं प्रकटं व्याददौ। च्यावयति स्म। पोटलिकागतं सर्वं वस्तुजातं सहसा गुहामुख इव तस्य वक्त्रकन्दरे तिरोदधे। हन्त! प्रमादः! पदशब्द इव श्रुतः। श्वशुरजना इतस्ततः परिचक्रमुः। तपस्वी नीलकण्ठः किं करोतु नाम। इदं प्रत्य-भात्। यथा लण्डन्निवृत्तो जामाता सरभसं सप्रेमानुबन्धं "काराबून्दी" चर्वन्नस्तीति ते यथा न जानीयुः तथा चरितव्यमिति। एवं निरचैषीत्। जीवितनाशेनापि आत्मीयं वक्त्रं नोद्घाटनीयम् न केनापि सह किञ्चिदपि संभाषणीयमिति। हा! कष्टम्। वक्त्रगतं वस्तुजातं लालान्वितं प्रतिक्षणं स्फायमानमासीत्। कपोलावुच्छूनौ। उच्छ्वासनिःश्वासा व्यतिदोलायिताः। गात्रमासकलं परिसिष्वेद। गलो बद्धः। अक्षिणी प्रलम्बिनी। कीदृशी तदानींतनी तदीया मुखश्रीरिति भावुकाः स्वयं भावयन्तु। हा! अन्ततः सर्वथा वृश्चिकदष्टस्य वलीमुखस्य दशां सुतरामन्वकरोत्। अद्भुतानि नव-नवानि असदृशि भक्ष्यजातान्यादाय नारीजना नीलकण्ठमभितः परिवव्रुः। सुनिपुणं तं किञ्चिदिव निरूपयामासुः। हा! किमिदम्! अत्याहितम्! किमयमायुष्मान् अस्मत्प्रेमसर्वस्वं जामातृरत्नं नीलकण्ठ उतान्यः! अहो!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुत्र गता सा तद्वदनगता सौन्दर्यश्रीः ! या क्षणमिव पुरा चिरं तस्य चन्द्रमुखे चारु विललास ! हन्त ! कुत्र गतं तदव्याजमनोहरं वाग्विलसितम् ! कोऽयं दारुणो दशापरिणामः ! इति व्याहरन्त्यः करुणं परिदेवयामासुः। आस्माको नीलकण्ठस्तु वक्तुं व्यावृत्य नैव वाचमेकामुदाजहार। करावेवेतस्ततो विचालयन् सर्वांस्तान् निष्क्रमितुं संज्ञामातेने। जामाता हि नाम वहिश्चराः प्राणाः श्वश्रूजनस्य। तं विहाय पदात्पदमपि नापससार। आवस्रावं विलेपुः। श्वशुरदेवोऽविलम्बितमानीतः। स पाणिना मन्दमन्दं सुखस्पर्शं जामातुः कपोलौ परामर्श। स रोगी नैव तं तथा कर्तुमनुमेने दृढोपमर्दनाज्जातु रहस्यमुद्भिद्येत वेति विभाय। श्वशुरोऽनुयोगपरंपराया नैव विरराम। हा ! सर्वमपि वृथा जातम्। रोगी करचालनं विना नान्यज्जानाति स्म। जोषमवातिष्ठत। सर्वथा माया बलीयसी। कस्तां विजेतुं प्रभवति विना तमेकं कालस्य महिमानम्। किं बहुना। अन्ततो गत्वा अयमेव सिद्धान्तसारः संपन्नः। हा ! महानयं दुर्विचिकित्स्यो व्याधिः। तीव्रममुं पीडयति। जिह्वास्तम्भे परिणतः। किं कुर्मः ! केयं दुरवस्था। क्षणमपि नोदासितम्। न विलम्बितम्। सत्वरमांगलभिषगानीतः। स च सहसा साटोपं करधृतेन हृत्परीक्षणयन्त्रेण अन्तः प्रविश्य तमद्भुतं रोगिणमैक्षत। न करेण पस्पर्श। यन्त्रेण परीक्षितुमुदयुङ्क्त।

नीलकण्ठः आकस्मिकमिमं परिभ्रमं वीक्ष्य "कोऽयम् उपद्रव" इति व्यमनायत। समीपस्थान् कांश्चन पाणिभ्यां कांश्चन पादाभ्याम् अन्यान् मुष्टिभिश्च परिजहार। रोगिणस्तादृशमाचरितं सर्वान् कूलंकषमुद्वेजयति स्म। दारुणो व्याधिः क्षणे क्षणे परिववृधे। आंगलभिषङ्मणिरनीशः कीशवदाशाः पर्यपश्यत्। न किमपि बुबुधे। निष्क्रमं वरममन्यत। न मयेदृशो रोगो दृष्टपूर्वः श्रुतपूर्वो वेत्यस्फुटं जल्पन् निष्क्रान्तः। अहो ! कति कति नवनवा भिषजः। कति ज्यौतिषिकाः। कति जरठा नार्यः। कत्योषध्यः कति तन्त्रीवार्ताः। कति दूरभाषीणि यन्त्राणि। न किमपि फलेग्रहि बभूव।

"काराबून्दी" खण्डा रोगिणो लालासरसि चिरवासेन पीतपीताः शूनशूनाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वपथीना दीनस्य तस्य महतीमिव पीडां नियतमारचयामासुः। इयमेकैव चिन्ता तपस्विनो रोगिणो हृदये सदा परिलुलोठ। क्षणमिव विविक्तता संपद्येत वा? वक्त्रगता खण्डविशेषाः कियन्तो निःसरेयुर्वेति। निष्च्यूताः स्युर्वेति। स तु इंगितेन अंगविक्षेपेण हस्तचालनेनाऽऽत्मानमद्वितीयं क्षणमवस्थापयितुं बहुधा प्रययास।

अहो समयस्य वैचित्र्यम्। शास्त्रिणो गृहिण्या एवं प्रत्यभात्। सर्वथायंदृष्टिदोषः। मान्त्रिकः समाह्वातव्य इति। सहसा मुण्डः परिहारी (pariyari mottai) समानीतः। स मुष्टिमेयैरभिनवैर्निम्बपत्रैः कृष्णौर्णेन तन्तुना सह रोगिणमुपससर्ष। कूर्चीकृतैः पत्रैः कपोलयोः क्षणं तस्य भृशं वीजयामास। कृष्णतन्तुं तस्य दक्षिणकटकमभितो बन्धुं यदा करं ग्रहीतुमुदयुङ्क्त तदा नैल्. ओ. केण्टन् आङ्गलयूनां यत्सदृशं तदाचरंस्तादृशानां मूढविश्वासनिबन्धनानामुपरोधानामात्मानमास्पदमाधातुं नैवानुमेने। निम्बपत्राणामुग्रो गन्धस्ततोऽप्यधिको मान्त्रिकदेहजः प्रस्वेदगन्धः सुबहु तमात्मदोषज्ञं रोगिणं विह्वलयतः स्म। नेदमाश्चर्यम्! यन्माहिषचर्मनिर्मितोपानदावृतेन सव्येन पादेन पार्श्वे उच्चावचमसंबद्धं प्रलपतो मान्त्रिकमूर्धन्यस्य, तस्योरसि प्रसभं किञ्चन सावेगं प्रहाररत्नं दृढतरमावासयामास। येन स मुण्ड उच्चैस्तमामविहेयाक्रोशन् स्थूलस्थूलं निःश्वसन् बहिरङ्गने कूष्माण्डपातं पातितः। स पार्श्वस्थैः सानुशयमुत्थापितो रोगिणो मुखमनालक्ष्यन्नेव "महता भूतेनाऽऽविष्टोऽयमार्य इति प्रजल्पन्ननिवृत्तमुखो नैजमुरः परिमृशन् पलायामास।

जामातरमधिकृत्य श्वशुरवर्गो निराशोऽभूत्। अल्पमप्येकोऽपि जामात्रर्थं परिष्कृतानां भक्ष्यजातानां गन्धमपि न जिघ्राय। बालकं क्षुधातुरपुत्रं प्रति का कथा। कोणे कापि स्वपन्तं क्लान्तं तं न कोऽपि सस्मार। स्त्रियः शान्ताः। सुन्दरशास्त्री सर्वमपि दिवा व्यापृतः पश्यन्नेव निद्रां गतः सर्वं निर्जीवमिव स्थितम्। महदिव स्तैमित्यम्। उच्छ्वासनिःश्वासं विना नान्यः शब्दश्चचालेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्तरालमिदं समीचीनम्। नीलकण्ठः वामतो दक्षिणतश्च परिलुलोठ। दक्षिणपार्श्वं किञ्चिदिव परितो व्यापारयामास। दग्धारण्यमिव सर्वं ददृशे। शनैः शयनादुत्तस्थौ। वातायनमुपससार। कवाटं किञ्चिदिव विवृतं चकार। वक्त्रं गवाक्षे संलग्नं कृत्वा यदा मुखान्नैर्जं प्रेयः किञ्चिदिव निःसारयितुमुद्यतः अहो! प्रमादः। पदशब्दः। (वस्तुतः कवाटशब्दः) हा! महाननर्थोऽस्थाने। अपचरिते मन्त्रोषदेश इव अनवसरे रहस्यसर्वस्वमुद्भिद्येतेति चकितचकितः शय्यागतः कूर्मो महाहद इव गाढनिद्रोदधौ निमग्नः। पर्याप्ताहाराभावस्य, अध्वखेदस्य निशीथप्रसृमरशिशिरमन्दमारुतस्पर्शस्य वा हेतोः दारुणां घुरणामावर्तयामास।

बालकः पुत्रो जामात्रर्थं संभृतानाम् अशितव्यानामर्धमात्मना समापनीयमिति बहुधा मनोरथप्रासादोपरि नृत्यन्नपि हन्त प्रतारितः। नेषदपि लभते स्म। कष्टम्। केयं विडम्बना! सर्वेऽपि अभ्यागतपरायणा नैव तं गणयन्ति स्म। "कोऽयं दुर्जातो जामाता शनिः। यस्य हेतोर्मम भोजनमपि दुर्लभमासीत्। नंक्ष्यति चेत् शीघ्रं नश्यतु। सत्यमियं लोकोक्तिः यज्जामाता दशमो ग्रहः इति। अवम इति वक्तव्यम्। इयं पीडा लघु परिहरणीया। अन्यथा पिण्डो दुर्लभः मरणमेव नियतमिति" चान्यन्नाकल्पयत्। स किञ्चित् कर्त्तुमजानानः क्षणं निदध्यौ। भवतु। यदि नाम म्रियतेऽचिरान्म्रियताम्। मरिष्यति चेन्नियतं मरिष्यत्येव। तावता जनानां नाधिकस्यातङ्कस्य क्लेशस्य वा अवसरः। मम पितामहोऽसकृन्मां उपक्रोशति। "किं त्वं वेत्सि? नासिकायां रुद्धायां वक्त्रं व्यादातुमपि न जानीषे" इति। स उपायोऽधुना प्रयोक्तव्य इति मेने। आत्मानं रोगिणः शिरोभागस्य पश्चादवस्थापयन् अशंकितं गाढं निद्राणस्य रोगिणो नासिकामङ्गुष्ठतर्जनीभ्यां सुदृढं गृहीत्वा निष्पीडयायास।

आः। पश्यत! पश्यत! काराबून्दीखण्डा वक्रान्तश्चिरावस्थानजातद्विगुणस्फीतिमान आत्मनि प्रविष्टेनेव नीलकण्ठहृदयगतप्रेमरसेन गुरुभूताः वर्षासु पल्वलेषु सरसीषु बिलमुखेभ्यो बहिः क्रमेणोत्प्लवन्तः पर्याय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवर्त्यमानकरालक्रन्दनाध्ययनपरायणा भेकाभीका इव स्वयं व्याददानात्तद्-वक्त्रक्रन्दरान्निश्चक्रमुः। रश्मिषु गृहीत इव रोगी झटिति प्रबुद्धः। उत्थितः। शय्यायामुपविष्टः। अहो! निद्राणस्य मे वक्त्रात् स्वयमेव निर्गताः किलामी खण्डाः। किमिदानीं कर्तव्यम्। अतृतीयाक्षिपातं सत्वरमेव गोपनीयाः इति सर्वांस्तान् स्वकीये वस्त्रखण्डे समाहृत्य बद्ध्वा पेटिकायां निधाय तां योक्त्रेण संयम्य कुञ्चिकां स्वीयधनभस्त्रिकायां कृत्वा दिष्ट्या रक्षितोऽस्मीति निश-श्वास। स्वस्थो जात इति अन्यान् बोधयितुकाम इव प्रबलमक्षुवत्। सर्वे प्रबुद्धाः। अहो! अन्तिमः स्वरसंयोगः। "हा गतोऽसि जामातः" इति सोरस्ताडकरुणं विलपितुं प्रावर्तन्त। सुन्दरशास्त्री नोदताम्यत्। सर्वथा नियतिर्बलीयसी। कस्तामन्यथयितुमीष्टे। भवतु पश्यामः। हा दैवमनुकूल-मिव भाति। पश्यत मुखे प्रसादम्। हा आमोदः! प्रमोदः! सम्मोदः! शुभंयु लक्षणं दृश्यते। न स्फीतिमा। नापि श्वयथुः सर्वं सुन्दरम्। वत्से वासन्ति दिष्ट्या प्रत्पुज्जीविताऽसि। वन्दस्व ते मांगल्याधिष्ठानदेवताम्। कुरु देवतापूजाम्।

नीलकण्ठः किञ्चिदिव कांजिकं स्वीचकार। तादृशमृदुपानीयं विनाऽन्यत् कठिनं किमपि सत्रणे कण्ठे कथं नाम स निगिरतु।

प्रभातायां रजन्यां नीलकण्ठः स्वस्थो जातः। न कोऽपि विकारः। सर्वं सुस्थम्। अन्येद्युः सायं वासन्त्या सह वाष्पशकटश्रेण्यां प्रथमकक्ष्याय-मास्थितः स्वाधिकारस्थानमाससाद।

अधुना महान् कश्चन स्वभावभेदो नीलकण्ठे समदृश्यत। पाश्चात्त्यान्नां वेषभाषादिषु यावत्तन्मयत्वावलम्बनं तत् सर्वं दूरापेतम्। अधुना प्राचीनभारतीयसंप्रदायानुगतमुष्णीषादिकं धरन्नवर्तत। अयं च भेदो वासन्त्युपज्ञमित्येव शुश्रुवे। अथापि नियतमहमेकं विषयं ब्रवीमि नीलकण्ठपुरोहितः न पुनरपि कारावुन्दीभक्षणे मतिं यावज्जीव-मावत्रन्थ। दग्धपयः पीत्वा विडाली वस्तुदर्शं त्रस्यति। स्वभावनियतं नित्यं शोभते नैव कृत्रिमम्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघनादवधम्

त्रयोदशः सर्गः

[निबन्धकः—श्रीनित्यगोपालविद्याविनोदः]

अथ राघवजीवितप्रियाऽवददालि न्वनयं दिनं बहु ।
सुसुखं विपिने तव स्वसा दयितस्यैत्य चकार विप्रियम् ॥१॥
हृदयं सजनि ह्याकुलं व्यथतेऽतीव तदीयवार्त्तया ।
रमणीकुलवाञ्छितं पतिं मम घातेन वरीतुमैहत ॥२॥
दयितावरजः क्रुधा हि तां निरकार्षीदिति रक्षसां गणः ।
अगमत् प्रधनं विभीषणमभवच्चेति कुटीरमाविशम् ॥३॥
धनुषः सखि घोरटङ्कृतेः श्रवणेनारुदमार्त्तमानसा ।
अवितुं दयितं कृताञ्जलिरसकृद्देवगणं समाह्वयम् ॥४॥
गगनं मुखरं रणस्वनैः पतिताऽहं भुवि मूढचेतना ।
नहि वेद्मि पुनः कदाऽभवं रघुनाथेन सखि प्रबोधिता ॥५॥
मृदुकण्ठपतिः समीरणो मधुमासीव वने सुपुष्पिते ।
अवदद्रघुवंशकेतनं त्वरितं चेतनमाप्नु हि प्रिये ॥६॥
अयि राघवजीवितेश्वरि वसुधातल्पमिदं किमर्हसि ।
चपलं शयनं महीतलं त्यज चोत्तिष्ठ सुवर्णवर्णिनि ॥७॥ (युग्मम्)
सरमे श्रवणे पुनः किमु मधुरध्वानममुं समेष्यतः ।
ब्रुवतीत्थमियाय मूर्च्छितं सहसा सा च दधार तां सखी ॥८॥
विहगीव शरेण ताडिता मृगयोरापतिता भुवस्तले ।
व्यथयाऽतितरां निपीडिता सरमाक्रोडतलं विवेश सा ॥९॥
कियतः क्षणतः सचेतनां सरमा प्राह सखि क्षमस्व माम् ।
अहमेव तवाधिकारणं कुमतित्वादभवं रघुप्रिये ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरमां पुनराह जानकी मृदुवाक्येन रघूत्तमप्रिया ।
स्खलितं तव नैव लक्ष्यते शृणु पूर्वं वचनं ब्रवीमि ते ॥११॥
कपटेन पुरा कथं श्रुता छलिताऽहं तनयेन ताडका- ।
प्रभवेण यथा मृगो मरौ किरणैरुष्णरुचेः पतिस्त्वसुः ॥१२॥
अशुभे समये मयाऽर्थितः सखि हेम्नो हरिणस्ततो मम ।
धृतचापपतिर्बहिर्ययौ गृहरक्षार्थनियुक्तलक्ष्मणः ॥१३॥
कपटो हरिणस्तडिद्द्युतिर्वनमुज्ज्वल्य सुखं पलायितः ।
मृगराजगतिः पतिश्च मे तमधावन्नयनामृताञ्जनम् ॥१४॥
सहसाऽशृणवं ध्वनिं "कुतः प्रिय सौमित्र इहापदः क्षणे ।
परिरक्ष विपन्नमग्रजं" श्रुतिमात्रेण च सोऽतिशङ्कितः ॥१५॥
अवदं चकिता भयातुरा व्रज धीराशु वनं निशामय ।
जनमार्त्तममुं य इच्छति तव साहाय्यमलं विभेम्यहम् ॥१६॥
श्रवणेन ममासवो ध्वनेः करुणस्य व्यथिता व्रज द्रुतम् ।
रथिकाह्वयतीति मे मती रघुनाथोऽवरजं सुहृत्तमम् ॥१७॥
अवदत् स कथं करिष्यते तव वाक्यानुसृतिः कथं नु वा ।
विजने विपिने त्वमेकला स्थितिमाधास्यसि रक्ष-आकुले ॥१८॥
भयमेषि कुतः क ईश्वरः शसितुं तं रघुवंशशेखरम् ।
भुवनत्रितये बली च यो भृगुरामादपि वीरकुञ्जरात् ॥१९॥ (युग्मम्)
ध्वनिरार्त्त इति श्रुतो मया "क्व नु सौमित्र इहासुसङ्कटे ।
तनये जनकस्य कुत्र वा दयिते" धैर्यमतश्च्युतं मम ॥२०॥
रघुसिंहसखः पुनर्मया कथितस्त्वं जनितः सुमित्रया ।
न हि सत्यमिदं वचः खल हृदयं तेऽश्ममयं विधीप्सितम् ॥२१॥
कुमते विपिने भृतो भवान् वृकपत्न्या विदितो हि रे शठ ।
रघुवंशकलङ्क दुर्बल स्वयमेमीक्षितुमार्त्तनादिनम् ॥२२॥
अपभाषित एवमित्युरुडरुणाक्षो धृतचापमार्गणः ।
इषुधिं परिबध्य पृष्ठकेऽकथयन्मां परिलक्ष्य लक्ष्मणः ॥२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जननीसदृशी त्वमेव मे जनकक्ष्मोणिपतिप्रियात्मजे ।
सकलं तव दुर्वचः सहे प्रचलामि प्रवसेह जाग्रती ॥२४॥
न हि दूषणमीषदस्ति मे तव वाक्याद् भवतीमहं जिहे ।
कथयन्नियदेव लक्ष्मणः प्रजगाम त्वरयाऽन्वितो वनम् ॥२५॥
विमना विजने तदा स्थिता बहुशङ्काकुलितं मनोऽभवत् ।
कथमालि वदामि तां कथां दिवमाचक्रम उष्णगुर्द्रुतम् ॥२६॥
सुखिता विहगा मृगव्रजा मृगपोताश्च तथा सदाव्रताः ।
करभाः प्रियया युतास्तदा पशवश्चाययुरस्मदाश्रमम् ॥२७॥
समदर्शमहं तदन्तरेऽनलकल्पं जटिलं महाद्युतिम् ।
व्रतिनं स्फटिकाक्षमालया वृतपाणिञ्च कमण्डलुश्रितम् ॥२८॥
विदितो यदि सोऽभवत् सखि कुसुमे सर्प इवातिभीषणः ।
गरलं विमले जलेऽथवा न हि तस्मै नमितं शिरो मया ॥२९॥
कितवः स यतिर्जगाद मां रघुलक्ष्मि त्वरितं प्रयच्छ मे ।
क्षुधया व्यथिताय तृप्तये फलमूलादि यदस्ति सञ्चितम् ॥३०॥
वदनं पिहितं विधाय मे वसनान्तेन तमब्रवं सखि ।
कृपयाऽजिनमासनं प्रभो समलङ्कृत्य विनोदय श्रमम् ॥३१॥
उपविश्य तरोर्मूले सुखं क्षपयाल्पं समयं मम प्रियः ।
अनुजेन समं समागतस्तव पूजां परमां विधास्यति ॥३२॥
अगदीत् कपटक्रुधाऽन्वितः पिशुनो मां रघुवंशनन्दिनि ।
अशनं त्वरितं प्रदेहि मे न्वथ वाऽन्यत्र मया चलिष्यते ॥३३॥
विमलं जननं रघोः किमु मलिनीकर्त्तुं मही त्वमिच्छसि ।
द्विजशापमुपेक्षसे कथं वितरान्नं न हि शापमाश्रय ॥३४॥
ज्येष्ठेन पत्युस्तव रावणेन सद्यो धृताऽहं महता बलेन ।
अज्ञातपाशेव खगी निबद्धा धूर्त्तेन पापेन किरातनेत्रा ॥३५

अह्नये कस्मिन् कमलवदने पर्यटन्त्या प्रियेण
रम्येऽरण्ये हरिणगृहिणी वीक्षितैका चरन्ती ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुत्वा पश्चाद् विकटनिनदं युक्तया साध्वसेन
विक्षिप्ताक्ष्या वृककवलिता सैव दृष्टा वराकी ॥३६॥
रक्षैनां भोः प्रियतम मृगीं दुष्टशार्दूलशीर्णा-
मित्युक्त्वाऽधां चरणकमले वल्लभस्यातिदीना ।
आर्त्तत्राणव्रतधृततनुर्मोचयामास नाथ-
स्ताश्चारण्यश्रियमहमतिप्रेमतोऽरक्षमालि ॥३७॥

इति श्रीमेघनादवधे महाकाव्ये सीतासरमासाक्षात्कारो नाम त्रयोदशः सर्गः ।

चतुर्दशः सर्गः

दधार रक्षईशो मां शार्दूल इव भीषणः ।
न कोऽप्यगाद् विपन्नां मां रक्षितुं हरिणीमिव ॥१॥
हाहाकारैरवैरासीद् वनं पूर्णं ममाऽऽर्त्तिजैः ।
शृण्वतीवाटवी देवी क्रोशन्तीं मामुपारुदत् ॥२॥
नाश्रुभिस्तस्य हृदयं द्रुतमासीदयोमयम् ।
द्रावयेल्लौहमनलो नाषां धाराः सहस्रशः ॥३॥
कमण्डलुं जटाजूटं विमुच्य दूरतः शठः ।
आरोपयन्नृपाकल्पः पापो मां कानकं रथम् ॥४॥
अचालयद्रथी रथमहश्चारुदमाकुलम् ।
कृष्णसर्पकवलिता भेकीव सुभगे वृथा ॥५॥
रथचक्रविनिर्घोषो ममाऽऽर्त्तध्वनिमभ्यभूत् ।
वायुर्मर्मरितो वृक्षः कपोतीक्रोशनं यथा ॥६॥
हतबुद्धिस्तदाऽमुञ्चं सर्वाण्याभरणानि मे ।
व्यक्षिपञ्च ततो दग्धदेहे तानि न पश्यसि ॥७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्युक्त्वा जोषमास्तां तां शशाङ्कवदनां सखी ।
सरमाह पुनर्दासी शुश्रूषते सुधावचः ॥८॥
पुनर्वदितुमारब्ध सीतेन्दुप्रतिमानना ।
शुश्रूषसे पुनस्त्वञ्चेच्छ्रूयतां मद्वचथातुरे ॥९॥
विहगीं वागुराबद्धां नीत्वा प्रीतो यथा गृहम् ।
प्रयाति मृगयुस्तादृगचालयद्रथं रथी ॥१०॥
आक्षिप्ताङ्गी खगी यद्वद् वागुरां भङ्क्तुमीहते ।
तद्वद् रोरुद्यमानाऽहमाह्वयं शब्दवाहनम् ॥११॥
लोकैस्त्वं कथ्यसे शब्दवाह इति दयस्व मे ।
नय सन्देशमेतं मे यत्र रामः सलक्ष्मणः ॥१२॥
गन्धं वहसि वायो त्वमतो दौत्यं विधेहि मे ।
याहि क्षिप्रं यत्र नाथो भ्रमत्याकुलमानसः ॥१३॥
आकारय प्रभुं मेघ भीमनादैर्मम प्रियम् ।
पुष्पं हित्वा चञ्चरीक गुञ्ज यत्र रघूत्तमः ॥१४॥
पिकराज मधोर्मित्र गाय पञ्चमतानतः ।
नाथः श्रोष्यति ते गीतं नूनं लोकमनोहरम् ॥१५॥
सर्वमेवं विलापं मे वयस्ये कोऽपि नाशृणोत् ।
दीनानां दैन्यवचनमरण्यरुदितोपमम् ॥१६॥
पुष्पक्रमतिचक्राम देशान्नदीर्नदान् बहून् ।
नगश्रेणीररण्यानीस्तद्गतिस्तव गोचरी ॥१७॥
कालेनाशृणवं भीमं नादं पुरो भयार्दिताः ।
हयाः स्वर्णरथश्चैव चचालास्थैर्यबन्धुरम् ॥१८॥
अदर्शं चक्षुरुन्मील्य वीरं भैरवविग्रहम् ।
गिरौ प्रलयसञ्जातमेघमण्डलसन्निभम् ॥१९॥
वीरवर्योऽवदन्मन्द्रं जानामि त्वां दशाननम् ।
चौरं दुर्मेधसं त्वद्य हरसि कां कुलाङ्गनाम् ॥२०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेमदीपस्य निर्वाणात् कस्य गेहं तमोवृतम् ।
अकार्षीस्त्वं दुराचार वेद्मयं तन्निनयकर्म ते ॥२१॥
धिक् त्वां मूढमतिं लज्जाहीनं राक्षसलाञ्छनम् ।
दुर्वृत्तं प्रेषयाम्यद्य कृतान्तसदनं शरैः ॥२२॥
उक्त्वैतावत् केशरीव जगर्ज स महाबलः ।
तेनाहं मूर्च्छिताऽपत्नं शताङ्गे स्वर्णनिर्मिते ॥२३॥
संज्ञां लब्ध्वा स्थितं भूम्यामात्मानमैक्षिषि प्रिये ।
गगने युयुधे रक्षोराजो वीरेण हुङ्कृतैः ॥२४॥
अबला रसना कचिद् वर्णितुं तद्रणं क्षमा ।
मया निमील्य नयने देवताभ्यो निवेदितम् ॥२५॥
साहाय्यार्थाय वीरस्य हन्तुकामस्य राक्षसम् ।
माञ्चोद्धर्त्तुं तथा यत्नं कुरुध्वं करुणाधनाः ॥२६॥ (युग्मम्)
दूरं वनं गन्तुकामा प्रोत्थिताऽहं स्खलत्पदम् ।
भूमिपृष्ठेऽपतं भूमिकम्पनेनेव घूर्णिता ॥२७॥
याचे स्म वसुधे मातर्मां ते वक्षःस्थलं नय ।
सहसे वेदनां साध्वि दुहितुस्त इमां कथम् ॥२८॥
तूर्णमेह्यन्यथा दुष्टः प्रत्येष्यति यथा निशि ।
आयाति तस्करो यत्र रत्नमन्यस्य रक्षितम् ॥२९॥
तुमुलं रणवादित्रं ननाद गगने सखि ।
चकम्पे वसुधा कृत्स्ना पूर्णो देशः समारवैः ॥३०॥
मूर्च्छिताऽहं पुनः स्निग्धे शृणु चावहिता कथाम् ।
प्राक्तनीं वसुधा माता स्वप्ने मधुवचोऽब्रवीत् ॥३१॥
विधिना प्रेरितः क्रव्याद्राजस्त्वामहरत् खलः ।
नङ्क्ष्यतीति सवंशः स भार एष सुदुर्वहः ॥३२॥
लङ्कां नाशयितुं गर्भे त्वामधां कुक्षणे तव ।
अस्पृशद् वर्ष्म पापः स मर्त्तुं दैवविडम्बितः ॥३३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधिर्मयि प्रसन्नोऽद्य मातृदुःखं हृतं त्वया ।
द्वारं मुञ्चामि पश्य त्वं भवितव्यस्य मैथिलि ॥३४॥
अपश्यं पर्वतं व्योमभेदिनं पुरतः सखि ।
निमग्ना इव दुःखाब्धौ पञ्च वीरास्ततोऽभवन् ॥३५॥
तदा तत्राऽऽययौ नाथो विषण्णवदनः प्रिये ।
लक्ष्मणेन समं वीक्ष्य तं भृशं रोदनं व्यधाम् ॥३६॥
अपूजयन् रघुश्रेष्ठं वीराः पञ्च सलक्ष्मणम् ।
ततस्ते नगरे रम्ये सर्व आसत सङ्गताः ॥३७॥
घोरे मृधे नृपं हत्वा तद्देशस्य रघूत्तमः ।
पञ्चानां वरमेतेषां भूपं विहितवान् मुदा ॥३८॥
वीरसिंहा अगणिता आयाता घोरनादिनः ।
अधावन् दूतवृन्दानि परितः कम्पिता धरा ॥३९॥
भयमुद्रितनेत्रां मां जननी प्राह सस्मितम् ।
कस्मात्रस्यसि वैदेहि सुग्रीवस्त्वां मुमुक्षति ॥४०॥
किष्किन्ध्याधिपतिर्वाली यस्ते पत्या विनाशितः ।
सज्जन्ते वीरमातङ्गास्त्वामुद्धर्त्तुं बलोन्मदाः ॥४१॥
सहुङ्कारं चलन्त्येते स्रोतःसु पाथसामिव ।
वर्षासु सरितः शुष्का वृक्षा भग्ना इतस्ततः ॥४२॥
वन्यसत्त्वानि भीतानि पलायन्ते स्म दूरतः ।
मन्द्रघोषैर्जगत् पूर्णं सैन्याः सिन्धुतटं गताः ॥४३॥
प्लवमाना मया दृष्टा प्रावाणः सलिलोपरि ।
शैलाः क्षिप्तास्तथा वीरैः समुत्पाटितघूर्णिताः ॥४४॥
सेतुर्बद्धो महाश्चर्यः शिल्पिभिः शिल्पकोविदैः ।
वारीश्वरः स्वयमधाच्छृङ्खलामङ्गि सारसे ॥४५॥
लङ्घयित्वाऽलङ्घ्यसिन्धुं वीराः कटकमत्यगुः ।
कम्पिता स्वर्णलङ्केषा वैरिपादभरार्दिता ॥४६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयोल्लासध्वनिं सर्वे चक्रुः सैन्याः समन्ततः ।
दुःखेनारुदमत्यर्थमपश्यं रावणं पुनः ॥४७॥
स्वर्णासनसमासीनं सौवर्णे सुनिकेतने ।
साक्षाद्धर्मसमो धर्म्यो वीर एकस्तमब्रवीत् ॥४८॥
सीतां दत्त्वाऽर्च्चयाऽऽशु त्वं रघुशार्दूलमव्रज ।
अन्यथा सङ्कुलं नाशं गमिष्यस्यचिराद्ध्रुवम् ॥४९॥
अर्थोष्मणाऽभितप्तेन रावणेन पदाहतः ।
भर्त्सितश्चाभिमानेन सोऽगच्छन्मे प्रियास्पदम् ॥५०॥
सरमोवाच वैदेहि रक्षोराजानुजः स हि ।
कीदृग् दुःखी कथं वक्ष्येऽरुदिम त्वत्कृते भृशम् ॥५१॥
जानक्युवाच जानेऽहं त्वया सह विभीषणः ।
सन्ततोपकृतौ लग्नो जीवामि युवयोर्गुणैः ॥५२॥
आकर्णय दयाशीले कथयामि पुनः कथाम् ।
अपूर्वां स्वप्नसम्पृक्तां कौतूहलशिखोज्ज्वलाम् ॥५३॥
सन्नद्धा राक्षसाः सर्वे युद्धाय क्रोधमूर्च्छिताः ।
ध्वनितं रक्षसां तूर्यं प्रतिध्वनितमम्बरम् ॥५४॥
बभूव तुमुलं जन्यं नद्य ऊहुरसृग्जलाः ।
शैलाकाराः शवा भीमा दृश्यन्ते स्म समन्ततः ॥५५॥
कबन्धा ननृतुः प्रेताः पिशाचाश्चैव दानवाः ।
गृध्राः शकुनयस्ते ते विहगा मांसलोलुभाः ॥५६॥
शृगालयूथमागच्छद् भषन्तः श्वान आययुः ।
पूरिता ध्वनिभिर्लङ्का भैरवैरसकृत्तथा ॥५७॥
भूयोऽपश्यं सभायां तं कर्बुर-कुलनायकम् ।
साश्रुनेत्रं शुचाक्रान्तं चिन्तान्धकारिताननम् ॥५८॥
विषण्णो रावणः प्राह हतमानस्त्वहो विधे ।
इदमासीत्तव स्वान्ते मय्येकान्तपराङ्मुख ॥५९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षिप्रं विबोध्यतां भ्राता कुम्भकर्णः शिवोपमः ।
तं विना समरे को वा त्रायेत रक्षसां कुलम् ॥६०॥
पुनर्युद्धं समारब्धं नार्यश्चक्रुर्हुलुध्वनिम् ।
भीममूर्त्तीं रथिश्रेष्ठः क्षिप्रं कटकमाविशत् ॥६१॥
प्रभुर्मे तीक्ष्णबाणेन चकर्त्तास्य शिरः क्षणात् ।
अकाले भग्ननिद्रोऽसौ जगाम शमनालयम् ॥६२॥
रक्षसां रोदनं श्रुत्वा दुःखिताऽम्बामवादिषम् ।
दीर्यते हृदयं मेऽम्ब परदुःखेन मृष्यताम् ॥६३॥
विहस्य वसुधा चाह सत्यं दृष्टं रघुप्रिये ।
धर्षयित्वा पुरीं रामो रावणं निहनिष्यति ॥६४॥
पश्येत्युक्ता तयाऽपश्यं दृश्यं स्वजनि चाद्भुतम् ।
माल्याभरणहस्ता मां परिवव्रुः सुराङ्गनाः ॥६५॥
काचित्तासामवोचन्मां साध्व्युत्तिष्ठ हतो रिपुः ।
दिनैरेभी रणे चान्या शुभोदन्तैरहर्षयत् ॥६६॥
सुगन्धसलिले स्नात्वा परिधेहि विभूषणम् ।
सीताभर्त्रे स्वयं सीतां दास्यत्यद्य शचीसखः ॥६७॥
प्रावोचं सरमे भूत्वा कृताञ्जलिः सुराङ्गनाम् ।
अलं वेशैरलङ्कारैर्दीना द्रक्ष्यामि वल्लभम् ॥६८॥
दीनां सीतां नरव्याघ्रो दीनवेशां स पश्यतु ।
सुरबालाश्च प्रत्यूचुः श्रुत्वेदं वचनं मम ॥६९॥
शृणु मैथिलि तिष्ठन्ति रत्नानि रेणुभिः खनौ ।
कीर्णानि तानि संस्कृत्य राज्ञे दाता प्रयच्छति ॥७०॥
रुदित्वाऽहं हसित्वा च सज्जिताऽपश्यमन्तिके ।
नाथं हैमोदयाद्रिस्थं देवमर्यमणं यथा ॥७१॥
उन्मत्तेव गता धर्त्तुं पादपद्मं प्रियस्य मे ।
तदैवाजागरमहं सुधांशुवदने सखि ॥७२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहसा दीपनिर्वाणे ध्वान्तच्छन्नं गृहं यथा ।
तद्विधा मे दशा जाताऽदर्शं विश्वं तमोमयम् ॥७३॥
दुःखितां क्रोषमासीनां वितन्त्रीमिव वल्लकीम् ।
तां प्राह सरमा खिन्ना रुदती राजलक्ष्मीवत् ॥७४॥
जानक्याप्स्यसि नाथं ते स्वप्नस्ते सफलीभवेत् ।
कुम्भकर्णमुखा वीरा रक्षःपक्षा मृता मृधे ॥७५॥
मरिष्यति दशस्कन्धः पुत्रैः पौत्रैश्च बन्धुभिः ।
भूयः कथय किं वृत्तं श्रोतुं चित्तं सलालसम् ॥७६॥
पुनर्वक्तुं समारेभे सती जितपिकस्वरा ।
उन्मील्य नयनेऽपश्यं पुरतो रावणं स्थितम् ॥७७॥
चूर्णं वज्रनिपातेन शैलशृङ्गमिवोच्छ्रितम् ।
भूतले पतितं हन्त रावणं वीरवारणम् ॥७८॥ (युग्मम्)
स त्वाह मां पश्य भद्रे रावणस्य पराक्रमम् ।
जटायुर्निहतो वीरो मयाजौ बाहुवीर्यतः ॥७९॥
स्वदोषेण मृतो मूढो गारुतिः को मया सह ।
योद्धुं तमुक्तवान् योऽभूत् सर्वथा बर्बराधमः ॥८०॥
शनैरुवाच शूरः स म्रियेऽहं साधुकर्मणे ।
स्वर्गं यामि हतो युद्धे दुर्दृशां भुङ्क्ष्व राक्षस ॥८१॥
जम्बूको लिप्ससे सिंहीं कस्त्वां त्रायेत पामर ।
स्त्रीरत्नं चोरयित्वा त्वं विपत्सिन्धौ निमज्जसि ॥८२॥
एतदुक्त्वा खगाधीशे विरते राक्षसाधिपः ।
आरोपयद्रथं भूयो रुदतीं मां भयातुराम् ।८३॥
द्विजं कृताञ्जलिर्भूत्वाऽवदं वैदेहकन्यका ।
नाम्ना सीता रघुश्रेष्ठभार्याऽहं रक्षसा हृता ॥८४॥
वक्ष्यसि कृपया नाथं रामं दृष्टिपथागतम् ।
वार्त्तामिमां खगाधीश मत्त्राणोत्सृष्टजीवित ॥८५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शताङ्ग उदगाद् व्योम निर्घोषपूर्णदिङ्मुखम् ।
भीमो नादः श्रुतः स्निग्धे दृष्टश्चोदधिरग्रतः ॥८६॥
ऊर्म्ममालिमहासिन्धौ पतित्वा मर्त्तुमिच्छतीम् ।
मां निवारितवान् क्रूरो दुष्टाभिसन्धिपीडितः ॥८७॥
मनसाह्वमपामीशं देववृन्दञ्च कातरम् ।
न कोऽप्याकर्णयामास मम तां करुणां गिरम् ॥८८॥
अनम्बरपथेनासौ रथो मनोरथाशुगः ।
क्षिप्रं चचाल पुरतः शुशुभे कानकी पुरी ॥८९॥
रक्तचन्दनरेखाया धारिणी सा महापुरी ।
न बभौ मे स्वर्णबन्दीशालेव बन्दिनेत्रयोः ॥९०॥
किं प्रीतिं याति विहगी कुञ्जकाननचारिणी ।
सुवर्णपिञ्जरे बद्धाऽस्वतन्त्रा दुःखभागिनी ॥९१॥
राजकन्या वधू राज्ञां कारायां यन्त्रिता सखि ।
श्रुतपूर्वं त्वया कचिद् वृत्तमीदृशमद्भुतम् ॥९२॥
इत्युक्त्वा कण्ठमालिङ्ग्य सरमाया रुरोद सा ।
रुदती सरमा चाह नेत्रे संमृज्य मैथिलीम् ॥९३॥
नावश्यम्भाविता देवि रोद्धुं शक्या सुरैरपि ।
हृता त्वं विधिवश्येन रावणेन मुमूर्षुणा ॥९४॥
हता वीरा महीयस्या लङ्कायाः पश्य दुर्दशाम् ।
तव दुःखनिशा नूनं प्रभाताशु भविष्यति ॥९५॥
फलिष्यत्यचिरात् स्वप्नपादपस्ते वपुर्वरम् ।
अलङ्करिष्यते विद्याधरीभिर्दिव्यभूषणैः ॥९६॥
सङ्गंस्यसे वल्लभेन मधुनेव क्षितिर्मधौ ।
स्मरिष्यसि सदा साध्वि दासीमेनां पदाश्रिताम् ॥९७॥
मनोमन्दिरदेवीं त्वां पूजयिष्यामि नित्यशः ।
कौमुदीं परया प्रीत्या सरसीव निशागमे ॥९८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भुक्ताः सुबहुलाः क्लेशा देशेऽस्मिन् वरवर्णिनि ।
कारणं नास्मि दोषाणां तेषां ते परिचारिका ॥९९॥
सीतोवाच शनैरालि त्वादृशी मे हितैषिणी ।
काऽस्ति भूमितले त्वं मे मरौ स्वच्छप्रवाहिणी ॥१००॥
अकार्षीस्तापदग्धां मां स्निग्धां त्वं छायया स्वया ।
देशेऽस्मिन करुणामूर्त्तिस्त्वं क्रूरै राक्षसैर्वृते ॥१०१॥
पङ्किले सलिले पद्मं रत्नं शीर्षेऽहियोषितः ।
लङ्कायाः किं ब्रवीम्यन्यत्त्वं सीतादुर्लभं धनम् ॥१०२॥
लब्ध्वा निष्किञ्चनो भाग्यान्निधिं यत्नाद् यथाऽवति ।
हृदि सम्पुटकेऽहं त्वां रक्षिष्यामि तथाऽनिशम् ॥१०३॥
प्रणत्य सरमा प्राह दासीं विसृज साम्प्रतम् ।
प्राणा नेच्छन्ति हातुं ते दुर्लभं पदपङ्कजम् ॥१०४॥
रामदासस्तु मे भर्त्ता सम्भाषेऽहं त्वया सह ।
शृणुयाच्चेदिदं लङ्कानाथोऽहं विपदं भजे ॥१०५॥
प्रत्याह मैथिली स्निग्धे क्षिप्रं गच्छ निजालयम ।
पदध्वनिं शृणोम्याराद् मन्ये चेटीः समागताः ॥१०६॥
भयतो हरिणी यथाऽटवौ सरमेयाय तथाऽतिसत्वरम् ।
विजने विपिने स्थिता सती कुसुमं वकलमुग्रकानने ॥१०७॥

इति श्रीमेघनादवधे महाकाव्ये सीतासरमासंवादो नाम
चतुर्दशः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वररुचिविरचिता

लिङ्गवृत्तिः

(पूर्वतोऽनुवृत्ता)

पातालजालमलखलकपालशैवालशीलनालानि ।
चीरचीवरवियन्ति च विद्धि तृतीयप्रकृतिकानि* ॥२८॥

एतेषां तृतीया प्रकृतिः । तृतीयस्थाने नपुंसकस्य दृष्टत्वात् पातालादीनि तृतीयप्रकृतीनि* विद्धि जानीहि । यथा—इदं पातालं रसातलम् । जालं मत्स्यबन्धनम्, गवाक्षश्च । मलं पापम् । खलं मर्दनस्थानम् व्रीहीणाम् । कपालं मस्तकास्थि खण्डश्च । शैवालं जलसम्भवम् । शीलं विनयः । नालं पद्मादीनाम् । चीरं जीर्णवस्त्रम् । चीवरं भिक्षुप्रावरणम् । वियद् आकाशम् ।

मुण्डनितम्बक्षुपगुल्मसान्वङ्कवंशपूगशङ्खरथाश्च† ।
पुंसि स्युर्जघनाम्बरफलमूलाङ्गानि तु‡ विमुच्य ॥२९॥

एते शब्दाः पुंसि स्युः । अयं मुण्डो मुण्डितशिराः । नितम्बः पश्चाद्भागः स्त्रीकट्याः । ह्रस्वशाखामूलको वृक्षः क्षुपः । गुल्मः शाखापत्रप्रवरणः । सानुः पर्वतैकदेशः । अङ्कः चिह्नम् । वंशः वेणुः सन्ततिश्च । पूगः क्रमुकः । शङ्खः कम्बुः । वंशोऽन्वयः । रथः स्यन्दनः । नपुंसकाधिकारात् जघनादयो नपुंसके स्युः । इदं जघनं कटिप्रदेशः । अम्बरमाकाशं वस्त्रञ्च । फलं वृक्षादीनाम् । मूलं शिफा । अङ्गम् अवयवः ।

---

* तृतीयाप्र० इत्यादर्शे । तत्र संज्ञावचनत्वात् पुंवद्भावाभावो बोध्यः ।
† रथाः—मु० पु०
‡ च—मु० पा०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षीरोदश्चिन्नवनीतवर्षकुण्डाण्डघृतभगगगनानि ।
विद्यान्नपुंसकान्योदनश्च पुंसि स्त्रियां ज्या च ॥३०॥

एतानि नपुंसकानि स्युर्भवेयुरित्यर्थः(?)। यथा—इदं क्षीरं दुग्धम्। उदश्वित् तक्रविशेषः। नवनीतं दधिविकारः। वर्ष वत्सरः। कुण्डं पेयादिपात्रम्। अण्डं बीजादिप्रादुर्भावः। इदं घृतमाज्यम्। भगं योनिः। गगनमाकाशम्। ओदनस्तु पुंसि भवति। अयमोदनो भक्तम्। स्त्रियां ज्या च। इयं ज्या धनुषो गुणः।

विषसंज्ञाः पुंसि विषं तु नपुंसकं स्यात्* स्त्रियां तिथिर्वोक्ता ।

विषसंज्ञाः पुंसि भवन्ति। अयं हालाहलः। कालकूटः। ब्रह्मपुत्रः। विषं नपुंसकम्। इदं विषं सर्षशरीरजम्। तिथिशब्दो विभाषया स्त्रीलिङ्गे भवति पुंलिङ्गश्च। इयं तिथिः। अयं तिथिः।

अतिथिस्तु† पुंसि शकृन्नीतशोणितानीतरप्रकृतौ ॥३१॥

अतिथिशब्दः पुंसि भवति। अयमतिथिरभ्यागतः। शकृदित्यादीनीतरप्रकृतौ नपुंसके भवन्ति। इदं शकृत्। नीतं घृतम्। शोणितं रुधिरम्।

मुक्त्वा दिनाहनी दिवसनामानि‡ पुंसि स्त्रियां त्विडुडुताराः ।

दिनाहनी मुक्त्वा अन्ये दिवसपर्यायाः पुंसि भवन्ति। अयं दिवसो वासरः। घस्रः। सूर्याङ्कः§ इत्यादिः। दिनाहनी नपुंसके भवतः। इदं दिन-

---

* विषं नपुंसके—सु० पा०
† अतिथिः पुंसि—सु० पा०
‡ दिवसनाम—सु० पा०
§ सूंकर—सु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महः। स्त्रियां त्विड्डुतारा:। त्विडादयः स्त्रियां भवन्ति। इयं त्विट् कान्तिः। इयमुड्डुर्नक्षत्रम्। इमास्तारा नक्षत्राणि।

यानयुगः* पुंस्युक्तः स्त्रियां समाश्चैव वर्षाश्च ॥३२॥

यानयुगः* पुंसि भवति। अयं यानयुगः*। *यानयुगग्रहणमन्ययुग-निवृत्त्यर्थम्। तेनेदं कृतयुगम्। कलियुगम्। स्त्रियां भवन्ति समाश्च वर्षाश्च। बहुवचनान्तयोः प्रयोगः। इमाः समाः। इमा वर्षाः। एवकारोऽवधारणे।

भवति नपुंसकयोगः संख्यापूर्वस्य रात्रिशब्दस्य।

संख्यापूर्वो यदि रात्रिशब्दस्तदा नपुंसके बोद्धव्यः। यथा—इदमेकरात्रम्। द्विरात्रम्। त्रिरात्रम् इत्येवमादयः।

ससमासस्य तु तस्यैव पुंसि योगं विजानीयात् ॥३३॥

सह समासेन वर्त्तत इति ससमासः। ससमासस्य तु रात्रशब्दस्य पुंसि योगं विजानीयात्। †सर्वरात्रः। अर्द्धरात्रः। वर्षारात्रः।

पुरमधुजगन्ति विद्यान्नपुंसके वा स्त्रियां भवेदर्चिः।

पुरादीनि नपुंसके जानीयात्। इदं पुरं नगरम्। मधु क्षौद्रम्। जगद् विश्वम्। अर्चिःशब्दः स्त्रियां भवति वा। इयमर्चिः, इदमर्चिः, दीप्तिः।

त्वतलौ नपुंसके स्त्रीविधावहः [पुंसि] संख्यादिः ॥३४॥

त्वतलौ प्रत्ययौ यथासंख्यं नपुंसकस्त्रीविधौ द्रष्टव्यौ। ब्राह्मणस्य भावः ब्राह्मणत्वं ब्राह्मणता। एवमिदं शूद्रत्वं शूद्रता। अहःशब्दो यदा संख्यादिस्तदा पुंलिङ्गो भवति। अयमेकाहः। द्व्यहः। त्र्यहः। संख्यादेरिति किम्? पुण्याहम्। प्रत्यहम्।

---

* पाणियुगः—आ. † पू. ९०—आ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुत्वन्ताः पुंसि कसेरुदारुजतुवस्तुमस्तुभिस्त्यक्ताः । स्युः सग्रन्थिप्रस्थाः

रुशब्दान्तास्तुशब्दान्ताः कसेरु-दारु-जतु-वस्तु-मस्तुभिस्त्यक्ता रहिताः सग्रन्थिप्रस्थाः पुंसि भवेयुरित्यर्थः(?)। यथा—अयं तूसरुः खड्गप्रहरणं खड्गमुष्टिः। भरुः भर्त्ता। मरुर्निर्जलो देशः। चरुः समन्त्रस्तप्तपाकः। शत्रुः रिपुः। तरुर्वृक्षः। रुरुर्मृगः। मेरुः पर्वतः। इत्यादयः। अयं केतुरुत्पातः। सेतुर्बन्धः। हेतुः कारणम्। तन्तुः पटप्रकृतिः। धातुः श्लेष्मादिः। कशेरुप्रभृतयो नपुंसके भवन्ति। इदं कशेरु भूसम्भवम्। ग्रन्थिप्रस्थौ च पुंसि भवतः। अयं ग्रन्थिः गेण्ठिरिति प्रसिद्धः। प्रस्थः परिमाणम्।

इसुसुष्यञां स्यान्नपुंसकता* ॥३५॥

इसन्तानामुसन्तानां ष्यञन्तानाञ्च नपुंसकता स्यात्। इदं सर्पिः। हविः देवान्नम्। बर्हिः पवित्रमित्यादिः। इदं वपुः शरीरम्। आयुर्जीवित-परिमाणम्। धनुः शस्त्रमित्यादि। ष्यञ्ग्रहणेन वर्णदृढादिभ्यः ष्यञ् [पा० ५।१।१२३] इति गृह्यते। न ब्राह्मणादिभ्यः [पा० ५।१।१२४]। इदं सौकुमार्यम्। शौक्ल्यम्। काष्ण्यम्। दार्ढ्यम्। कार्श्यम्। इत्यादि।

पुंसि स्त्रियाञ्च पाटलिगो†मुष्ट्यशनिबाहु-सिन्धुमणयः।

एते शब्दाः पुंसि स्त्रियां भवन्ति। इयं पाटलिः। अयं पाटलिः। इयं गौः। अयं गौः। इयं मुष्टिः। अयं मुष्टिः। इयमशनिः। अयमशनिः। इयं बाहुः। अयं बाहुः। इयं सिन्धुः। अयं सिन्धुः। इयं मणिः। अयं मणिः।

---

* इसुसुष्यञन्तानां नपुंसकता—सु० पा० † पुष्टि—आ०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आशीर्द्धूःपूः क्षुत्*तृड्गिरः स्त्रियां मुदुरुषावपि† ॥३६॥

एते शब्दाः स्त्रियां भवन्ति। इयमाशीः इष्टाशंसा। इयं धूः भारः, कीलश्च। इयं पूः पुरी। इयं क्षुद् बुभुक्षा। तृट् पिपासा। इयं गीर्वाणी। मुद् हर्षः। रुट् रोषः।

शीकरतुषारतुषा बुद्बुदफेनौसतण्डुलापूपाः।
स्युः पुंसि‡

एते शब्दाः पुंसि स्युर्भवेयुरित्यर्थः(?)। शीकरोऽम्बुकणः। तुषारो हिमसंहतिः। तुषो धान्यतुषः, कडङ्गरश्च। ओसः अवश्यायः। तण्डुलो धान्यस्य। अपूपः पिष्टकस्य।

आलिमुक्ताजिदर्विसिकताः स्त्रियामुदिताः ।३७॥

एते शब्दाः स्त्रियामुदिताः कथिताः। इयमालिः पंक्तिः। मुक्ता रत्नम्। आजिर्युद्धम्। दर्विर्भक्तसाधनम्। सिकता वालुका।

अजिनाजिरशैवालनलमृणालतुहिनोडुपाज्यशस्यानि।
द्वारास्पदकाष्ठानि च नपुंसकान्येव पटलश्च ॥३८॥

एते शब्दा नपुंसके भवन्ति। इदमजिनं मृगत्वक्। इदमजिरमङ्गनम्। शैवालं जलसम्भवम्। नलं सुवर्णभाजनम्। मृणालं पद्ममूलम्। तुहिनं तुषारः। उडुपं प्लवः। आज्यं घृतम्। शस्यं व्रीहिः। द्वारं गृहस्य। आस्पदं राज्ञाम्। काष्ठमिन्धनम्। पटलं गृहस्य तिमिरं वा। एवकारोऽवधारणे।

त्रिष्वप्यक्षेष्विन्द्रियसंज्ञका ये तान् नपुंसकान् विद्धि§।
शेषाः पुंसि प्रोक्ताः श्रीपिष्टाद्याश्च निर्यासः ॥३९॥

---

* क्षुट्—आ † रुटावपि—आ० ‡ पुंसि स्युः—मु० §संज्ञा या तां नपुंसके विद्धि—मु० पा०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिष्वप्यक्षेषु मध्ये इन्द्रियसंज्ञकमक्षं नपुंसके विद्धि । इदमक्षमिन्द्रियम् । शेषास्त्वक्षाः पुंसि प्रोक्ताः । अयं देवानामक्षः । शकटाः श्रीपिष्टाद्याश्च निर्यासाश्च पुंसि भवन्ति । अयं श्रीपिष्टः सर्जरसः । गुग्गुलुरित्येवमादयः ।

विंशतिरा नवतेः स्त्री नपुंसके तालुहृदयकुड्यानि ।

विंशतिप्रभृतयो नवतिपर्यन्ताः स्त्रियां भवन्ति । इयं विंशतिः । त्रिंशत् । चत्वारिंशत् । पञ्चाशत् । षष्टिः । सप्ततिः । अशीतिः । नवतिः । एतानि शब्दानि (?) नपुंसके भवन्ति । इदं तालु वदनैकदेशः । हृदयं जीवितस्थानम् । कुड्यं भित्तिः ।

पार्श्वकुकुन्दरविण्यतलधनलवणराष्ट्राणि चावेहि*॥४०॥

एतानि नपुंसकानि अवेहि अवगच्छेत्यर्थः । इदं पार्श्वं शरीरस्य । कुकुन्दरं नितम्बकूपद्वयम् । विण्यं द्रव्यम् । तलमधः । धनं द्रविणम् । लवणं रसविशेषः । राष्ट्रं जनपदस्थानम् ।

क्रोडाघाटाजिह्वाशिरोधराशष्कुलीस्पृहामाया विद्धि स्त्रियाम् ।

एताः स्त्रियां विद्धि । इयं क्रोडा अङ्कः । घाटा ग्रीवा । जिह्वा रसना । शिरोधरा ग्रीवा । शष्कुली खण्डस्य भक्ष्यद्रव्यम् । स्पृहा वाञ्छा । माया जनबन्धनेच्छा ।

शाखाशिखाकलामेखलारेखाराजिपंक्तीश्च† ॥४१॥
‡स्नायुश्रद्धोल्काश्च स्त्रियां सखट्वत्रेताश्च ॥

---

* अवैहि—मु० पा०. † षङ्क्ती च—मु० पा०
‡ स्नायुश्रद्धोल्काश्च स्त्रियां खट्वा भवत् वेता—मु० पा०.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्नायुश्रद्धोल्काश्च स्त्रियां खट्वा भवेत् त्रेता ।
ताणा वाणा प्राणा विश्वाणा संक्रुणा च ॥४२॥

एते शब्दाः स्त्रियां भवन्ति । इयं शाखा वृक्षस्य । शिखा चूडा । कला विज्ञानम् । मेखला काञ्ची । रेखा राजिर्वनस्य । पंक्तिर्दन्तानाम् । स्नायुः शरीरस्य नाडी । श्रद्धा आदरः । उल्का आकाशोत्पातः, ज्वाला च । खट्वा शयनीयम् । त्रेता युगम् । [ताणा सूत्ररचना । वाणा वाणी । प्राणा श्रद्धा । विश्वाणा लीला । संक्रुणा नासिका । विकोणा नेत्रविशुद्धिः ।]

भयबीजसिध्मपदबर्हशुक्रतक्रसुखदुःखशिखराणाम् ।
विद्यान्नपुंसकत्वमसृगित्यस्य सदैव ॥४३॥

एते शब्दा नपुंसके भवन्ति । इदं भयं त्रासः । बीजमङ्कुरोत्पत्तिकारणम् । सिध्मं कुष्ठविशेषः । पदं स्थानम् । बर्हं मयूरपिच्छः । शुक्रं रेतः । तक्रं मथितम् । सुखं भोगम्(?) । दुःखं पीडा । शिखरं शृङ्गम् । असृक् रक्तम् । सदैवेतिवचनाद् भयादीनां व्यभिचारः । अयं भयः ।

पाषाणोपलशृङ्गारप्रस्थभृङ्गारमस्तकस्तबकाः ।
रूपं मुक्त्वा शब्दगन्धाद्यश्चोक्ताः* पुंसि ॥४४॥

एते शब्दाः पुंसि भवन्ति । यथा—अयं पाषाणः प्रस्तरः । उपलः शिलापाषाण एव । शृङ्गारो विदग्धता । प्रस्थः परिमाणम् । भृङ्गारः सुवर्णमयः कलशः । मस्तकः शिरः । स्तबकः पुष्पोत्करः, पुष्पनिचयम् । ध्वनिः शब्दः । रसो माधुर्यादिः । स्पर्शो मृदुकर्कशादिः । गन्धो नासिकाग्राह्यः, कुसुमादेः । रूपं नपुंसके भवति । इदं रूपं चक्षुर्ग्राह्यम् ।

(क्रमशः)

* ०श्चोक्ता० सदा पुंसि—मु० पा०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সংস্কৃত-সাহিত্য-পরিষদের

উদ্দেশ্য

সংস্কৃত ভাষার এবং সংস্কৃতশাস্ত্রের প্রসারসাধনই সংস্কৃত-সাহিত্য-পরিষদের মূল উদ্দেশ্য। এই উদ্দেশ্যসাধনার্থ নিম্নলিখিত উপায়সমূহ অবলম্বিত হইয়াছে :—

(১) সাধারণ সভার অধিবেশনদ্বারা সংস্কৃতভাষায় লিখিত মৌলিক প্রবন্ধসমূহের পাঠ, সমালোচনা ও বিচার।

(২) চতুষ্পাঠীস্থাপনদ্বারা শাস্ত্রাধ্যাপন।

(৩) গ্রন্থাগারে মুদ্রিত সংস্কৃত গ্রন্থের এবং হস্তলিখিত পুঁথির সংগ্রহ।

(৪) অপ্রকাশিত সংস্কৃত গ্রন্থের প্রকাশ।

(৫) সংস্কৃত ভাষায় মাসিক পত্রিকার প্রচার।

(৬) শাস্ত্রব্যাখ্যা ও উপদেশপ্রদান।

(৭) সংস্কৃত-রূপকাভিনয়।

সংস্কৃত-সাহিত্য-পরিষৎ-পত্রিকায় বিজ্ঞাপনের হার

কভার ২য়, ৩য় বা ৪র্থ পৃষ্ঠা (সম্পূর্ণ) মাসিক	...	...	৫৲
" (অর্দ্ধেক) "	...	...	৩৲
" (এক-চতুর্থাংশ) "	...	...	২৲

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সংস্কৃত-সাহিত্য-পরিষদ্-গ্রন্থমালার

কয়েকখানি পুস্তক

১। **কালীভক্তিম্**—অতি প্রামাণিক অপ্রকাশিত তন্ত্রগ্রন্থ। সংস্কৃত টীকা ও বাংলা বিবৃতি সহিত। ৺সতীশচন্দ্র সিদ্ধান্তভূষণ কর্ত্তৃক সম্পাদিত, ১৩২৯, ডিমাই ৮ পেজী, ৮২ পৃষ্ঠা। মূল্য ॥৵০ আনা, সদস্যপক্ষে ॥০ আনা।

২। **শঙ্করী-সঙ্গীতম্**—কবি জয়নারায়ণ-প্রণীত। শ্রীযুক্ত দক্ষিণাচরণ ভট্টাচার্য্য কর্ত্তৃক সম্পাদিত, ১৩৩০, ডিমাই ৮ পেজী, ৩২ পৃষ্ঠা। মূল্য ১৲ এক টাকা।

৩। **মুক্তিবাদঃ**—গদাধর ভট্টাচার্য্য-বিরচিত প্রসিদ্ধ ন্যায়-গ্রন্থ। প্রাচীন শিবরাম-টীকা, 'মুক্তিদীপিকা' নাম্নী নূতন টীকা, বাংলা 'তাৎপর্য্য-বিবরণ' এবং সুবিস্তৃত সংস্কৃত ভূমিকা ও প্রাচীন মুক্তিবাদ সহিত। গবর্ণমেণ্ট সংস্কৃত কলেজের ন্যায়ের অধ্যাপক শ্রীযুক্ত কালীপদ তর্কাচার্য্য কর্ত্তৃক সম্পাদিত, ১৩৩১, ডবল ক্রাউন ১৬ পেজী, ২৪২ পৃষ্ঠা। মূল্য ৫৲ পাঁচ টাকা।

৪। **দুর্গাপূজাভক্তিম্**—(বঙ্গাক্ষরে) রঘুনন্দন ভট্টাচার্য্য-প্রণীত (অষ্টাবিংশতি তত্ত্বাতিরিক্ত) সপ্রমাণ শারদীয়-পূজাপ্রয়োগ। ৺সতীশচন্দ্র সিদ্ধান্তভূষণ কর্ত্তৃক সম্পাদিত, ১৩৩১, ডিমাই ১৩৪ পৃষ্ঠা। মূল্য ১৷০ পাঁচ সিকা, সদস্যপক্ষে ১৲ টাকা।

৫। **পিতৃদয়িতা**—বল্লালগুরু অনিরুদ্ধভট্টকৃত, স্মার্ত্তভট্টাচার্য্যধৃত অপ্রকাশিতপূর্ব্ব প্রামাণিক কর্ম্মকাণ্ডীয় গ্রন্থ। শ্রীযুক্ত দক্ষিণাচরণ ভট্টাচার্য্য কর্ত্তৃক সম্পাদিত, ১৩৩১, ডিমাই ১০২ পৃষ্ঠা। মূল্য ১৷০ ও ১৲ টাকা।

৬। **দুর্গোৎসব-বিবেকঃ** } (বঙ্গাক্ষরে) মহামহোপাধ্যায়
বাসন্তীবিবেকশ্চ } শূলপাণিবিরচিত। ৺সতীশচন্দ্র সিদ্ধান্তভূষণ কর্ত্তৃক সম্পাদিত, ১৩৩১, ডিমাই ৬৬ পৃষ্ঠা। মূল্য ॥০ ও ৷৵০।

৭। **কারকোল্লাসঃ**—ভরতমল্লিক-বিরচিত ব্যাকরণ-গ্রন্থ। ইহা দ্বারা ব্যাকরণপাঠিগণের একটী বিশেষ অভাব দূরীভূত হইবে। শ্রীযুক্ত জানকীনাথ সাহিত্যশাস্ত্রী কর্ত্তৃক সম্পাদিত, ১৩৩১, ডিমাই ২০ পৃষ্ঠা। মূল্য ৵০ আনা মাত্র।

৮। **ঋগ্বেদ-ভাষ্যোপক্রমণিকা**—সায়ণাচার্য্য-কৃত, ইংরেজী ভূমিকা সহিত। কলিকাতা বিশ্ববিদ্যালয়ের অধ্যাপক ৺পশুপতিনাথ শাস্ত্রী, এম. এ., বি. এল., পি-এইচ্. ডি. কর্ত্তৃক সম্পাদিত, ১৩৩১, ডিমাই ১০০ পৃষ্ঠা। মূল্য ৸০ ও ॥৵০ আনা।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073

Vol. XVIII, No. 4] [August, 1935.

१८५७ शकीये श्रावणे १८य-वर्षस्य ४र्थ-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३। रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, Shyambazar, Calcutta.

Printed at
CALCUTTA ORIENTAL PRESS
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সংস্কৃত-সাহিত্য-পরিষদের

উদ্দেশ্য

সংস্কৃত ভাষার এবং সংস্কৃতশাস্ত্রের প্রসারসাধনই সংস্কৃত-সাহিত্য-পরিষদের মূল উদ্দেশ্য। এই উদ্দেশ্যসাধনার্থ নিম্নলিখিত উপায়সমূহ অবলম্বিত হইয়াছে :—

(১) সাধারণ সভার অধিবেশনদ্বারা সংস্কৃতভাষায় লিখিত মৌলিক প্রবন্ধসমূহের পাঠ, সমালোচনা ও বিচার।

(২) চতুষ্পাঠীস্থাপনদ্বারা শাস্ত্রাধ্যাপন।

(৩) গ্রন্থাগারে মুদ্রিত সংস্কৃত গ্রন্থের এবং হস্তলিখিত পুঁথির সংগ্রহ।

(৪) অপ্রকাশিত সংস্কৃত গ্রন্থের প্রকাশ।

(৫) সংস্কৃত ভাষায় মাসিক পত্রিকার প্রচার।

(৬) শাস্ত্রব্যাখ্যা ও উপদেশপ্রদান।

(৭) সংস্কৃত-রূপকাভিনয়।

সংস্কৃত-সাহিত্য-পরিষৎ-পত্রিকায় বিজ্ঞাপনের হার

কভার ২য়, ৩য় বা ৪র্থ পৃষ্ঠা (সম্পূর্ণ) মাসিক	...	...	৫৲
” (অর্দ্ধেক) ”	...	...	৩৲
” (এক-চতুর্থাংশ) ”	...	...	২৲

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

August, 1935.	१८५७ शकीये श्रावणे १८श-वर्षस्य ४र्थ-संख्या	Vol. XVIII No. 4

भूप्रार्थना

[निबन्धकः—कृष्णमूर्तिः]

अशेषभुवनावनश्रमविलोपनाय स्वपन्
यथा त्रिजगतीपतिः फणिपतेः शिरोभूषया।
अनन्यमनसा मुहुः समवलोक्यते भाग्यत-
स्तनोत्वनवधिश्रियो वसुमती दयाशेवधिः॥१॥

धराधरशतं नदीरनलसाऽम्ब! धत्से चिरं
जनांश्च वहसे बहून् यदखिलैः क्षमेतीड्यसे।
निजाङ्कशयिताः सुताः किमु भवन्ति मातुर्भरा-
स्त्वदङ्कशयितान् परं किमिति निर्घृणोपेक्षसे॥२॥

न ते जडविपश्चितोर्धनिकनिःस्वयोर्वा भिदा
समं सुकृतिभिर्जनानवसि चापि पापीयसः।
अतोऽम्ब भवतीं जगद् वदति साधु सर्वंसहां
खलानपि सुतान् प्रसूः करुणया दृशैवेक्षते॥३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अगैः किल समुन्नतैर्लससि पावनो पावनो-
दिशि त्वमुपलालिता बहुभिरम्ब कोष्ठापुरे ।
अतर्कितमथापि ते चलनवेगलुप्तासवो
जना बत ! नृशंसया किमिति ते निगीर्णास्त्वया ॥४॥
असत्य परवञ्चनादि बहुपापदुष्टात्मनां
न निग्रहविधौ मनागपि मतिं करोषि क्षिते ।
विदूरतरवासिनः स्वजठरावनायाऽऽगतान्
क्षणेन शमनातिथीन् कृतवती कथं सज्जनान् ॥५॥
असंख्यखलवर्धनोदितभराद् यदि क्लिश्यसे
पुराणविदिता विरिञ्चिसविधे हि ते प्रार्थना ।
किमम्ब ! वचनं न ते श्रुतिपुटेऽग्रहीदब्जभूः
स्वयं दहसि यज्जनानकरुणा स्म कोष्ठापुरे ॥६॥
विदूरविषयेषु वाष्पशकटाटनायाञ्जसा
महीध्रशिखराणि निर्दयमिमे विभिन्दन्त्यहो ।
नदीषु बहुसेतुबन्धनमिमेऽश्मभिः कुर्वत
इतीव कुपिताऽसि चेत् किमधुना वयं कुर्महे ॥७॥
यथा हि तरुणी व्यथेत रमणी खलै रूषिणी
तथा शरसमार्दिताऽस्ति जनता श्रिता भारतीम् ।
अनागसि जने विधेहि करुणां च विश्वम्भरे
कदापि न पुनर्जगन्नय वृथा कथाशेषताम् ॥८॥

——

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेतत्त्वम्

[निबन्धकः—स्वर्गत इन्द्रनाथवन्द्योपाध्यायः]

प्रेरितं पत्रम् ।

मान्यवर-श्रीयुक्तपञ्चानन्दमहोदयसमीपेषु

प्रिय महोदय,

अहं तावत् पश्यामि वङ्गदेशस्य वङ्गभाषायाश्च श्रीवृद्धिसम्पादनविधौ सविशेषमेव प्रयतन्ते भवन्तः । एतदर्थमवश्यमेवार्हन्ति भवन्तः साधुवादान् । परं कस्मिन् कस्मिन् विषयविशेषे विशेषेणावधातव्यम् , तस्य निर्णये भवतां प्रमादं पश्यन् नितरां विषीदामि ।

न खलु राजनीतौ दृष्टिर्निक्षेपणीया भवता, तदर्थं बहवः संस्थाः संस्थापिताः, यावदपेक्षितं ततोऽपि प्रभूततरं कार्यं सम्पद्यते इत्यकामेनाप्यभ्युपगन्तव्यम् । राजनीतेरान्दोलनमिदानीं विलासवस्तु इत्युक्तिरपि न वैतथ्यमावहेत् ।

धर्मार्थमपि चिन्ता नैवापेक्ष्यते । यथा तावद् धर्मस्य संख्या प्रतिदिनमेव विवर्धते तथा प्रतीयते नचिरादेव भारतवासिनः प्रत्येकमेव पृथग् धर्ममनुसर्तुं प्रभवेयुः, न खल्वेकेनापरस्य धर्मस्य संविभागोऽपेक्ष्येत ।

समाजस्य पुनश्चैवं मम मतेन भद्रजनेन नैव कर्तव्या । समाजे तावदेतावन्तो भिन्नप्रकृतिका जना अन्तर्भूताः, तेषु चैतावत्यो विभिन्ना पथिः प्रचलितास्तदर्थं चैतावन्ति जघन्यानि कर्माण्याचर्यन्ते यत तत्र लिप्तानां भद्राणां भद्रत्वसंरक्षणं दुःसाधमेव । तथाप्याहारनिद्रादि नैसर्गिककर्मणां समुन्नतिविधानार्थमवश्यमेव क्वचित् किञ्चिद् वदेयुर्भवन्तः ।

भाषायास्तावदेक एवाभावः परिलक्ष्यते, तद्वर्जमन्यत् किमपि न्यूनत्वं परीक्ष्यापि न वीक्ष्यते । तञ्चाभावमधिकृत्याग्रे सविस्तरं वक्ष्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमतस्तावद् दृश्यताम् इतिहासपुस्तकान्यत्र सुप्रचुराण्येव वर्तन्ते। केवलस्य मार्शमानप्रणीतस्य भारतेतिहासस्यानुवादतात्पर्यप्रश्नोत्तरादयो न्यूनकल्पेन दशैकादशा ग्रन्थाः सन्दृश्यन्ते। स्वल्पेनैव विमर्शेन प्रतिपद्येरन् भवन्तो यदाङ्गलभाषायां यावन्तीतिहासपुस्तकानि विद्यन्ते वङ्गभाषायां ततो द्वादशगुणानि सन्तीति।

काव्यस्य तु कथैव नास्ति। काव्यं साम्प्रतं मुद्रायोगेण निष्पाद्यते यन्त्रसाहाय्येन वा विनिर्मीयते। आदिरसे तावत् प्रेम प्रणयिनो विरहिणी नवपल्लवानि निशातुषाराणि; करुणे भारतं जननी निद्रा सन्तानः; वीभत्से —भस्म, रौद्ररसे—आटोपः, गर्जनम्, महाभैरवी स्तनितम्, श्मशानम्; वीरे उत्तिष्ठत जाग्रत इत्यादीनि कतिचिद्वचनानि मानसानलेनापाद्य द्रवीभावं मुद्रायां निःक्षिप्यते चेन्निष्पद्यते काव्यम्। अत एव नात्र लेशतोऽप्यभावः।

आख्याननिर्माणार्थमपि विद्यते यन्त्रम्। आङ्गलभाषातो यत् किमपि यन्त्रान्तः सन्निवेश्यते चेत् सरससरसान्याख्यानानि विनिर्गच्छेयुः।

नाटकानि तु ततोऽपि प्रभूततराणि। यत्रैव द्रक्ष्यन्ति भवन्तः द्वौ वा ततोऽधिका वा पुरुषा एकेनैवोद्देश्येन समवेता हसन्ति वा क्रन्दन्ति वा दीर्घं वा विनिश्वसन्ति, यथासम्भवं च परस्परवक्षःसु छुरिकां निवेश्य म्रियन्ते तत्रैव नाटकमित्यवगन्तव्यम्। आपणेषु यथा भृष्टतण्डुला वङ्गेषु तथा नाटकानि।

विज्ञानार्थनीतिनीतिशास्त्रप्रभृति किमपि न परिहीयते। यस्य कस्यापि पल्लीविद्यालयस्य नवदशवर्षीयस्यापि तरुणतरस्य बालस्य सर्वमेतत् कण्ठस्थमेव।

अतो भाषाविषयेऽपि तादृशः प्रयत्नो नापेक्ष्यते। एकैव त्रुटिर्वर्तते इत्युक्तम्, सा च प्रज्ञतत्त्वविषयिणी। यानि तावत् प्राचीनानि वृत्तानि विलुप्तप्रायतामुपगतानि तेषां समुद्धरणमेव सुतरामावश्यकम्, तदर्थं प्रयतनमेव मनुष्यत्वस्य परिचायकम्, तत्र च निरन्तरं निमज्जनं माहात्म्यस्य संसूचकम्। अहं तावत् प्रज्ञतत्त्वव्यसनी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयमिममधिकृत्य विरचिता मया बहुतराः प्रबन्धाः सन्नद्धा वर्तन्ते। अन्तरान्तरा तेषां संप्रेषणेन भवन्तमुपकर्तुं न मे कुण्ठा। इदानीं तावदेकः प्रेष्यते, पत्रे मुद्रणेनानुग्राह्योऽयं जनः।

श्री र० रा०

पाँची रजकी

अशोकस्तम्भविनिर्माणात् पूर्वं वा तत उत्तरं वा प्रादुर्भूता पाँची रजकी-त्यत्र गरीयसी विप्रतिपत्तिर्विषश्चिताम्[1]। सुप्रसिद्धात् चैनिकपर्यटकाद् हुयेन्थसाङ्तोऽपि पूर्वं कामश्चत्टकानिवासिनः जिनिकृषिहामहोदयस्य[2] भारतभ्रमणावसरे न खलु पाँची रजकी जीवितासीदिति शक्यते एवानुमातुम्। जिनिकृषिहामहोदयस्य तस्याः समुल्लेखो नास्तीति विस्पष्टमेवोक्तं दायोदरस् सेकुलस्[3] महोदयेन। एतस्माच्चानुमीयते यीशुख्रीस्तस्य जन्मतोऽष्टादश-शतकतः पूर्वं व्यतीतेषु वाऽष्टादशशतकेषु[5] जीवितासीत् पाँची रजकीति। पण्डितप्रकाण्डस्य बाबरस्येदमेवाभिमतम्[6]।

---

1 Vide Keith Johnston's Atlas; also Ramayana Vol. V. pp. 49-72, by J. Talboys Wheeler.

2 Vide Gulliver's Travels, A Voyage to Houyhnhums, Chap. VI. p. 199.

3 Diod. Sec. fasc. IX fol. 320 महाभाष्यम्, शङ्कराचार्यप्रणीतम्, दशमः अध्यायः, त्रयोविंशश्लोकः।

4 Chiomikron charasso datur Jinkriska phaino mannon non etc. leaf. 2 passim.

5 वाराणसीस्थं पुस्तकम्, द्रविडदेशस्थमूर्तये स्वामिनो हस्तलिखितो ग्रन्थः। Schlegel-मुद्रितं *Greek Recension, Ryehouse Plot* by Titus Oates—एतेषां पुस्तकानां पर्यालोचनयाऽपि न प्राभावि मया पाठान्तराणां संवादेन यथार्थं तत्त्वं प्रादुष्कर्तुम्। कस्मिंश्चित् पुस्तके 'पूर्वक' इति, अन्यत्र, 'पूर' इति अपरत्र 'पर' इति पाठ उपलभ्यते।

6 Barber's *Aini-i-Akberi, Asiatic Recherche* vol. IX no. 1 passim.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमार्थत एव पाँचीरजकी नाम कोऽप्यासीन्न वेत्यत्रैव संशेरते बहवः। नामेदं पौराणिककल्पनाप्रसूतमित्याशेरते फन्हुमवोल्ट्महाभागाः[7]। यद्यपि मांसपुराणे[8] पाँचीरजक्या नामोपलभ्यते तथापि तत्र पाँची रजकी स्त्रीत्युपवर्णिता, परं भारतवर्षस्य प्रधाननगरीषु पाँचीरजकीनाम्ना स्थानस्य निर्देशो दृश्यते[9]। भारतवर्षस्य प्रथानां पर्यालोचनेनावश्यमेवाभ्युपगन्तव्यं न खलु स्त्रिया नाम्न ईदृशं प्रकाशनं सम्भवतीति। किञ्च भारतीयासु स्त्रीसु कापि कदाप्यनूढा नासीत्। पाँचीधोपान्या विगतभर्त्तृकत्वमपि नानुमातुं शक्यते, तथात्वे तस्याः पाँची धोपान्या इति नामप्रसङ्गात्। अद्यापि वङ्गेषु विधवानाममुकदेव्या अमुकदास्या इत्यादिषु नामसु प्रमाणमुपलभ्यते।

अत्र च प्रत्यवतिष्ठते [10]फ्रेडेरिके पेलिति महोदयः। तथाहि तन्मतेन महाभारतात् पूर्ववर्तिनि काले स्त्रीणां सर्वथा स्वातन्त्र्यमेवासीदित्येतस्य प्रत्यायकानि सुबहूनि कारणानि विद्यन्ते। अन्यथा स्वैरिणीस्वाधीनभर्तृकादिपदानामानर्थक्यं प्रसज्येत। वस्तुतस्तु पाँचीधोपानी माहम्मदीया एव, अत एव तस्या उपाधेः परिवर्तनं न सञ्जातम्। विशेषतश्च धोपानीशब्दस्य

---

7 Hlafden ver gottzginjen moller grahferlunzig trmnstopkter. An Liandder vrost matod utan sulfra och die j phos phos—*Tandtickor Hohenzollern*, p. 99.

८ पाँची पञ्चाननी दशमर्धी विंशतेश्चतुरांशैकांशी"—मांसपुराणम् १०म-पटलम् १३-सूक्तम्। अपि च—

पञ्चिका पञ्जिका चेतामधो वामार्धभञ्जिका।

गारदा क्रौञ्चमालीने नर्मदा पिण्डवासिने॥ ऋग्वेद। पञ्चाशत्तमम् ब्राह्मणम्।

९ यथा कलिकातानगर्य्यां पाँचीधोपानीरथ्या।

10 Sezoine Italien in diciy Frederico Pelity "Ecosa standy vel pruchere chi mon fan forado e mulatto par suza in etc. pp. 33-7.

(a) Cum cogiture nos interprationis Selucoe adhue sunt smilibaris tam tandro mutando non alientibur parlos ; si dicunt inter rationes suum. Don Giovanni Ecloga novum. (b) Ass. Res. Bom. 99 MS. (c) M. Bardelot : Une marionette per fenetre jailignolles. Oenbres o.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोगो न खलु तस्या आर्यविधवावैपरीत्यं गमयितुमलम्। प्रतिपादितं हि प्रमाणबलेनाध्यापकमोक्षमूलरभट्टेन मित्रेत्युपनाम ब्राह्मणानामपि सम्भवतीति।

यथा तथा वा भवतु पाँचीरजक्यासीदिति निःसंशयम्[11]। परं सोऽयं पुरुषो[12] वासीद् योषिद्वेति दुःशकमेव निर्णेतुम्, भूयान् हि कालो व्यतिगतस्तस्य मृतस्येति। दृश्यन्ते हि बहवः पुरुषा ये स्त्रिय इति प्रतीयन्ते, दृश्यन्ते च बहवो योषितो[13] या मुण्डितश्मश्रुज्येष्ठपितृवत् आभासन्ते। पाँचीरजकीभारवहनसमर्था योग्यतरा एव मनीषिणोऽत्र प्रमाणम्।

पाँचीरजकीगतानि विषयान्तराणि कालान्तर आलोचयिष्यन्ते।

श्रीर. रा.

---

११ शिशुबोधकम्। श्रीअरुणोदयविश्राम एण्ड को० मुद्रितम् प्रकाशितञ्च। ३२७ संख्यकभवनम्, वटतला। अत्र चेदन्विष्यते सर्वं विज्ञायेतेति। मूल्यं सार्द्धं रूप्यकमात्रम्।

१२ न स्त्री स्वातन्त्र्यमर्हति—मनु० १०।१३, अपि च

स्त्रियाश्चरित्रं पुरुषस्य भाग्यं दैवा न जानन्ति कुतो मनुष्याः॥ विवादताण्डव ५।१७

१३ सखेर यात्रा Amateur Theatrical Company, dassim.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाकविर्माघः

[निबन्धकः—श्रीकालीपदभट्टाचार्यः काव्यतीर्थः]

यत्कारुण्यसुधारसस्य कणिकां तापत्रयोच्छेदिनीं
स्वादं स्वादमशेषदुःखजलधिं लोकास्तरन्ति क्षणात् ।
नित्यं कल्पलतेव या सुतगणायेष्टं महद् यच्छति
तां वाणीं करुणामृताब्धिनिलयं वन्दे जगन्मातरम् ॥

जयन्ति ते भारतवर्षीया महाकवयः, येषां रसवत्कवितारसनिषेवणेन सर्वदेशीयाः साहित्यरसनिष्णाता विबुधाग्रगण्या मानवाः प्रतिदिनमेव विस्मयरसे निमज्जन्ति, मुक्तकण्ठं प्रशंसन्ति च। येषामसीमधीशक्तिशालिनां कल्पनाचातुर्येण विद्वज्जनमानसमुल्लासयतां महाकवीनां निबन्धाः पदे पदे पाठकानां मनसि नवीनं कमपि भावमाविष्कुर्वन्ति, हृदयभूमिञ्च कवितापीयूषधारया समभिषिञ्चन्ति, येषां व्यासवाल्मीकि-कालिदासप्रमुखाणां महाकवीनां ग्रन्थानधिकृत्य अद्याप्यनेके विपश्चितो बहूनि अतीन्द्रियाण्यपि वस्तूनि मानसनेत्रेणावलोकयन्तः परोक्षमपरोक्षमिव वर्णयन्तो महान्तं विस्मयमुत्पादयन्ति।

येषां निबन्धसमालोचनेनाद्यापि बहवो विद्वांसो नानाविधानि तथ्यानि समुद्भावयन्तोऽपि न तेषां पारमधिगच्छन्ति। येषां काव्यरसस्रोतस्वती अधुनापि जननीव स्तन्यधारया भारतभुवं सञ्जीवयति, ते च कीदृशाः प्रतिभावन्त आसंस्तद् वयं कल्पयितुमप्यनीशाः। यस्मिंश्च देशे एतादृशा महाकवयः प्रादुरभवन्, तत्र महाकविर्माघो जात इत्यत्र न किमप्यस्ति विस्मयकारणम्।

(कविसमयनिरूपणम्)

महाकविरयं जन्मना कं देशमलमकार्षीत्, कस्मिन् समये च प्रादुर्बभूवेति दुरनुमेयम् एव नियतमनुसन्धानपरैरप्याधुनिकैः पण्डितवर्यैः। प्रायश एव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतद्देशीया महाकवयः स्ववंशगौरवप्रख्यापने आत्मनः स्थिति-काल-निरूपणे च उदासीना एवासन्। अस्मिन् विषये महाकविः कालिदास एव प्रकृष्टतममुदाहरणम्। प्रथमतो माघप्रणीते शिशुपालवधनाम्नि अस्मत्-समालोचनीये ग्रन्थे यादृशस्तस्य परिचयो लभ्यते तं विवृणोमि।

श्रीवर्मलाभिधेयस्य नरपतेर्निखिलकर्मस्थानाधिकृतो बहुगुणालङ्कृतः सुप्रभदेव-नामा कश्चन पण्डित आसीत्। महीपतिर्वर्मलस्तस्य सुप्रभ-देवस्याऽऽदेशेन सर्वाणि कार्याणि अन्वतिष्ठत्।

तस्य सुप्रभदेवस्य तनयो दत्तको युधिष्ठिर इव धर्मनिरत आसीत्। स सर्वेषामाश्रयभूत आसीदतः स सर्वाश्रय इति नाम्नाऽपि प्रसिद्धिमलभत। सर्वाश्रयापरनाम्नो दत्तकस्य पुत्रो माघः काव्यमिदं शिशुपालवधं नाम प्राणैषीत्। काव्यावसाने स्वपरिचयदानमुद्दिश्य वर्णितानां श्लोकानामन्ते कश्चन श्लोको विद्यते। यथा—

श्रीशब्दरम्यकृतसर्गसमाप्तिलक्ष्म
लक्ष्मीपतेश्चरितकीर्त्तनमात्रचारु।
तस्याऽऽत्मजः सुकविकीर्त्तिदुराशयाऽदः
काव्यं व्यधत्त शिशुपालवधाभिधानम्॥

अत्र श्लोके सुकविकीर्त्तिदुराशया इत्यस्य व्याख्यायां टीकाकृता वल्लभ-देवेनैवं व्याख्यातम्। यथा—

"सुकवीनां श्रेष्ठविदुषां वररुचि-सुबन्धु-सोमनाथ-भवभूति-क्रीडाचन्द्र-कालिदास-विल्हण-भारवि-बाण-मयूरादीनां या कीर्त्तिः ख्यातिर्यशस्तत्र या दुराशा दुरभिलाषस्तया महाकविकीर्तिलिप्सया इत्यर्थः" इति। एतेन व्याख्या-नेन एतेभ्यः कविभ्यो विशेषतो भारवेः परवर्त्तित्वञ्चास्य स्थिरीकृतं भवति। "उदिते नैषधे काव्ये क्व माघः क्व च भारविः" एतेन चास्य श्रीहर्षादपि पर-वर्तित्वं(?) सूचितं भवति। महाकविना शार्ङ्गधरेण विरचितायां शार्ङ्गधर-पद्धतौ सुकविप्रशंसनाध्याये—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतत्नप्रबोधक्रुद्वाणी भारवेरिव भारवेः ।
माघेनेव च माघेन कम्पः कस्य न जायते ॥

अन्यच्च—भासो रामिलसौमिलौ वररुचिः श्रीसाहसाङ्कः कवि-
र्माघो भारविकालिदासतरलाः स्कन्धः सुबन्धुश्च यः ।
दण्डी बाणदिवाकरौ गणपतिः कान्तश्च रत्नाकरः
सिद्धा यस्य सरस्वती भगवती के तस्य सर्वेऽप्यमी ॥

अपरञ्च—माघेन विप्रितोत्साहा नोत्सहन्ते पदक्रमे ।
स्मरन्तो भारवेरेव कवयः कपयो यथा ॥

(धनपालस्य)

शार्ङ्गधरपद्धतावेते श्लोकाः

अन्येऽपि श्लोका माघप्रशंसासूचकाः समुपलभ्यन्ते । "मुरारिकवेः कृतेरतिदुरूहार्थतया तदर्थावबोधाय यथोचितशब्दार्थज्ञानजननं माघकाव्यं परिशीलनीयम्, अथ च मुरारेः श्रीकृष्णस्य चरणारविन्दप्राप्तिचिन्तायां कर्त्तव्यायां मानसी प्रवृत्तिः पापेभ्यः परावर्तनीया" इत्येवमर्थं सकौशल-मर्थावृत्तियमकालङ्कारविशेषेण बोधयन्ती—

मुरारिपदचिन्ता चेत्तदा माघे मतिं कुरु ।
मुरारिपदचिन्ता चेत्तदा माऽघे मतिं कुरु ॥

इत्येवंविधा कस्यापि सुश्लिष्टा सूक्तिः समुज्जृम्भते ।

श्रूयते किल कस्यापि वृद्धस्य विदुषः समीपमागत्य केनापि जिज्ञासुना किं तावदधीतं भवद्भिरेवंविधपाण्डित्यप्राप्तये इति सादरं पृष्टे सति मेघदूतं माघकाव्यञ्च बहुशः परिशीलयता तेन विदुषा "मेघे माघे गतं वयः" इत्येव-मुत्तरितम् ।

अन्यापि माघकविसम्बन्धिनी घोषणा—

"उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥ इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजशेखरविरचितायां सूक्तिमुक्तावल्याम् —

अपरञ्च—तावद्भा भारवेर्भाति यावन्माघस्य नोदयः ।

उदिते नैषधे काव्ये क्व माघः क्व च भारविः ॥

अन्यच्च—"नवसर्गगते माघे नवशब्दो न विद्यते" इति ।

"काव्येषु माघः कविकालिदासः" इति च कस्यापि प्रथतेतरां सूक्तिः ।

महाकविरयं गुर्जरप्रदेशमलङ्कृतवान् इति प्रज्ञतत्त्वविदः समामनन्ति । अनेन विरचिते शिशुपालवधाख्ये काव्ये रैवतकपर्वतवर्णनं विद्यते । स च रैवतको गुर्जरदेशसमीपवर्त्ती । अधीते रैवतकवर्णने एवं प्रतीयते यत् कवे रैवतकपर्वतेन सह बहुशः संयोग आसीदिति ।

चतुर्थसर्गे—"उदयति विततोर्ध्वरश्मिरज्जा-

वहिमरुचौ हिमधाम्नि याति चास्तम् ।

वहति गिरिरयं विलम्बिघण्टा-

द्वयपरिवारितवारणेन्द्रलीलाम् ॥"

इति श्लोकमिमं विरचयन् कविः "घण्टामाघ" इति ख्यातिं लेभे इति श्लोकस्यास्य व्याख्यायां वल्लभदेवेनोक्तम् ।

केचन माघस्थितिसमयनिरूपणे व्यापृता भोजप्रबन्धे वल्लालकविकृतेन माघस्य भोजराजाश्रयप्राप्तिवर्णनेन माघम् एकादशशताब्दीसमुद्भूतस्य भोजस्य समकालीनमुदाहरन्ति । परं वल्लालेन कालिदासप्रभृतीनां सर्वेषां भोजराजाश्रयप्राप्तजीविकत्वं वर्णयता वर्णनमात्रकौतुकितया सर्वे विद्वांसः समकालीनतां प्रापिताः, अतस्तत्तत्कविसमयनिर्णयविषये भोजप्रबन्धो न प्रामाण्यमधिगच्छति ।—एवं प्रबन्धचिन्तामणौ, प्रभावकचरिते च माघस्य भोजराजाश्रितत्वं वर्णितमस्ति ।

अन्ये च विद्वांसः—अनुत्तसूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना ।

शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥

इत्यादिश्लोके न्यासग्रन्थस्य नामोल्लेखात् न्यासप्रणेतुर्जिनेन्द्रबुद्धेराधु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निकोऽयं कविरिति निर्णयन्ति। तदपि न समीचीनतया प्रतिभाति, यतो जिनेन्द्रबुद्धेरन्योऽपि तत्पूर्वं न्यासकर्त्तासीदिति।

अन्यत्र च एवमस्ति—

"इदन्तु निर्विवादं शक्यते वक्तुं काश्मीरेषु पञ्चषञ्चाशदधिकाष्टशततमात् त्र्यशीत्यधिकाष्टशततमं यावद् राज्यं शासतः अवन्तिवर्णभूपतेः समये विद्यमानेन खीष्टीयनवमशताब्द्यां जातेन श्रीमदानन्दवर्द्धनाचार्येण निर्मिते ध्वन्यालोकग्रन्थे माघश्लोकोपलब्धेर्माघः नवमशताब्दीतः पूर्ववर्त्तीति प्रतीयते। (१) अपरञ्च, माघस्य पितामहः सुप्रभदेवो वर्मलनामधेयस्य महीपतेः सभायां पण्डित आसीत्। तस्य वर्मलनरपतेः शिलालेखः कश्चन द्व्यशीत्यधिकषट्शततमपरिमितविक्रमाब्दीयः साम्प्रतमाधुनिकैरन्वेषकैरधिगतः। स च शिलालेखो वसन्तगडनगरे तैः प्राप्तः। एतेन शिलालेखेन द्व्यशीत्यधिकसप्तशततममिते विक्रमेऽब्दे पञ्चविंशत्यधिकषट्शततमे च खीष्टाब्दे वर्तमानस्य समयस्तावत् सप्तमं शतकमित्यत्र न कोऽपि सन्देह एव। एवञ्च पितामहस्य सुप्रभदेवस्य समये स्थिरीकृते पितामहस्थितिकालात् पौत्रस्थितिकालेन हितेन स्वल्पसमयव्यवधानमिति सप्तमशतकस्यान्ते अष्टमशतकस्यारम्भे वा माघकविरासीदिति निःसन्देहमेव वक्तुं शक्यते।

अन्यत्र भुवनचन्द्रवसाक-महोदयेन मुद्रापिते माघे कविवंशवर्णनश्लोके "सुप्रभदेवः" श्रीधर्मनाभस्य नरपतेर्मन्त्री आसीदिति ज्ञायते। एतेन महान् संशयः समुत्पद्यते, यतः श्रीधर्मनाभः कस्मिन् काले कस्य देशस्याधिपतिरासीदिति दुरनुमेयम् एव। काव्यप्रकाशकारो मम्मटभट्टः

(१) आनन्दवर्धनकृतस्य ध्वन्यालोकस्य द्वितीयोदयते—

वासाकुलं परिपतन् परितो निकेतान्
पुञ्जिर्न कैश्चिदपि धन्विभिरन्वबन्धि।
तस्यौ तथापि न मृगः क्वचिदङ्गनानाम
आकर्णपूर्णनयनेषु हृतेक्षणश्रीः॥ ५।२६

रम्या इति प्रान्तवतीः पताका रागं विविक्ता इति वर्धयन्तीः।
यस्मात्सेवन्त नमद्बलीकाः समं वधूभिर्बलभोग्युवानः॥ ३।५३

एतत् पद्यद्वयं शिशुपालवधादुद्दाहृतवान्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकादशशताब्द्यां स्थित इति कैश्चिन्निर्णीतम्। ततप्रणीते काव्यप्रकाशे च माघस्य श्लोको विद्यते। अतो माघो मम्मटभट्टात् पूर्ववर्ती।

अन्यत्र कस्मिंश्चित् पुस्तके एवमस्ति—

"अलङ्कारशास्त्रविद् वामनस्तस्य "काव्यालङ्कारसूत्रवृत्तौ" "कुथेन नागेन्द्र-मिवेन्द्रवाहनम्" "गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः"।

"सितं सितिम्ना सुतरांमुनेर्वपु-
र्विसारिभिः सौधमिवाथ लम्भयन्।
द्विजावलिव्याजनिशाकरांशुभिः
शुचिस्मितां वाचमवोचदच्युतः॥"

"मुखेन त्रिलोचनः" इत्यादीनि पद्यानि शिशुपालवधादुदाहृतवान्। वामनः अष्टमशताब्द्यां प्रादुर्भूतः माघश्च सप्तमशतकस्यान्ते तस्य काव्यं विरचितवान्। अत एवमनुमीयते माघो भवभूतेः समकालीन आसीदिति।"

एतेषु प्रमाणेषु किं दृढतमं प्रमाणमिति विद्वांस एव विचारयिष्यन्ति। मया तु केवलं विदुषां समीपे समुपस्थापितम्। शिशुपालवधस्य टीकोपक्रमणिकायां टीकाकारो मल्लिनाथ एवमाह प्रशंसावचनम्—

नेताऽस्मिन् यदुनन्दनः स भगवान् वीरः प्रधानो रसः
शृङ्गारादिभिरङ्गवान् विजयते पूर्णा पुनर्वर्णना।
इन्द्रप्रस्थगमाद्य पायविषयश्चैद्यावसादः फलं
धन्यो माघकविर्वयन्तु कृतिनस्तत्सूक्तिसंसेवनात्॥

निखिलशास्त्रतत्त्वज्ञो महाकविरयं माघः शिशुपालवधं नाम किमप्यपूर्वं काव्यं विरचितवान्। यद्यपि कविनाऽनेनान्यत् किमपि काव्यं न प्रणीतं तथापि एकेनैव काव्येन महाकविरयं भूयसीं कीर्त्तिं लेभे। परन्तु शिशुपालवधं विना कवेरस्य श्लोकास्त्रयः समुपलभ्यन्ते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"बुभुक्षितैर्व्याकरणं न भुज्यते
पिपासितैः काव्यरसो न पीयते ।
न विद्यया केनचिदुद्धृतं कुलं
हिरण्यमेवार्जय निष्फलाः कलाः ॥"

पद्यमिदं क्षेमेन्द्रेण औचित्यविचारचर्चायां समुद्धृतं माघनाम्ना ।
सुभाषितावलौ वल्लभदेवश्च—

"शीलं शैलतटात् पतत्वभिजनः सन्दह्यतां वह्निना
माश्रौषं जगति श्रुतस्य विफलक्लेशस्य नामाप्यहम् ।
शौर्यं वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु मे सर्वदा
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता अमी ॥
नारीनितम्बफलके परिबध्यमाना
हंसीव हेमरशना मधुरं ररास ।
तन्मोचनार्थमिव नूपुरराजहंसा-
श्चक्रन्दुरार्त्तमुखरं चरणावलग्नाः ॥"

इति पद्यद्वय माघनाम्ना समुद्धृतवान् । अतश्च कश्चिदन्योऽपि ग्रन्थो माघेन निर्मित आसीदित्यनुमीयते ।

बहुषु समालोचनाग्रन्थेषु माघस्य नामदर्शनाद् एकस्मिन् काले काव्यजगति तस्य महती प्रतिपत्तिरासीदिति ज्ञायते । तथाहि प्रबन्धकोषे, प्रबन्धचिन्तामणौ, प्रभावकचरिते, भोजप्रबन्धे, शार्ङ्गधरपद्धतौ सूक्तिमुक्तावल्याश्च माघस्य नाम विद्यते । सोऽयं शिशुपालवधप्रणेता माघः यस्य काव्यसुधां निपीय सर्व एव सुधियः कवितारसनिष्णाता भवन्ति यस्मिंश्च काव्ये सर्व एव रसाः परं प्रावीण्यमुपगता विदुषां मानसे मानससरोवरे हंसा इव क्रीडामागता महान्तं हर्षतरङ्गं समुत्पादयन्ति । यस्य च काव्यं सदुपदेशमिच्छते जनायोपदेशम्, काव्यरसपिपासवे सर्वान् रसान्, राजनीतिजिज्ञासवे नीतिज्ञानञ्च प्रयच्छति । यस्मिंश्च काव्ये भगवतः श्रीकृष्णस्य अनन्तं महिमानमुपवर्णयन् कविरयं महान्ति यशांसि समुपार्जितवान् । बहूनि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यानि विरचयन्तोऽपि कवयो यशो न लेभिरे, महाकविरयं पुनरेकमेव काव्यं प्रणयन् अपरेषां महाकवीनां यशांसि निराकृतवान। एवं सकल-सौन्दर्यवर्णनासमुपचितमिदं काव्यं कविकुलचूडामणेराधिपत्यं काव्यजगति प्रकाशयत्यनन्यसाधारणम्।

(भारवेः पूर्ववर्त्तित्वम्)

महाकविरयं माघात् पूर्वं प्रादुर्भूत इति मतं समीचीनतया प्रतिभाति। "तावद्भा भारवेर्भाति यावन्माघस्य नोदय" इत्यादिश्लोक एव तस्य प्रमाणम्। भारविकृतेन किरातार्जुनीयकाव्येन सह शिशुपालवधस्य महत् सौसादृश्यं वर्त्तते। महाकविरयं किरातार्जुनीयम् अनुकृत्यैव काव्यमिदं प्रणिनाय इति सम्भाव्यते। भारविर्ग्रन्थोपक्रमे श्रिय इति पदं प्रयुज्य यथा मङ्गलाचरणं कृतवान तथा माघोऽपि। किरातार्जुनीयस्य सर्गावसानश्लोको लक्ष्मीशब्दाङ्कितः, अस्य चान्तिमः श्लोकः श्रीशब्दाङ्कितः। एवं बहुषु स्थलेषु सादृश्यमनुभूयते।

कविरयं स्वेनैव नाम्ना काव्यस्य नाम प्रणीतवान्। "कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा" इत्यादिविधानात्। काव्येऽस्मिन साहित्यदर्पणकृता विहितानि महाकाव्यस्य "सर्गबन्धो महाकाव्य"-मित्यादीनि सर्वाण्येव लक्षणानि घटन्ते। अत्र शिशुपालवधाख्ये काव्ये नायकः पवित्रयदुवंशोद्भवः श्रीकृष्णो धीरोदात्तः। तस्य लक्षणमाह विश्वनाथः—

अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥

जगदीश्वरे श्रीकृष्णे सर्व एवैतेगुणा विशेषेण वर्त्तन्ते। श्रीकृष्णः कदाचिदपि आत्मनोऽहङ्कारं न प्रकटितवान। भृशमुत्पीडितः सन्नपि दुर्विनीतेन शिशुपालेन स्वकीयमसाधारणं धैर्यं रक्षितवान। गाम्भीर्येण समुद्रादपि महत्तरः श्रीकृष्णः शतापराधक्षमारूपामात्मनः प्रतिज्ञां न विवसस्मार। मात्सर्योपहतचित्तः शिशुपालो यथा कठोरया गिरा सर्वेषां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समीपे तं निनिन्द, धैर्यसमुत्सारितहिंसारसस्तदानीमविचलितेन चेतसा तत् सर्वं सहमानः श्रीकृष्णः स्वं महिमानमुदभावयत्। परमेश्वरमपि श्रीकृष्णं मनुष्यरूपेणावर्णयत् कविः। नारदभीष्मादयस्तं भगवन्तमेव मेनिरे। किन्तु श्रीकृष्णो मनुष्यरूपेणावतीर्य मानुषाणां किं तावत् कर्त्तव्यं तदेव प्रदर्शितवान्। नो चेत् सङ्कल्पमात्रेणैव स शिशुपालं हन्तुं समर्थः। श्रीकृष्णः शिशुपालस्य पितृस्वसुः समीपे "सहिष्ये शतमागांसि सूनोस्ते" इति प्रतिश्रुतवान्। भगवतः प्रतिच्छन्दकोऽसावलौकिकगुणाधार एवासीत्। सत्सु येषु गुणेषु लोकेषु जनानामादरो जायते ते सर्वे गुणा विशेषेण श्रीकृष्णे विद्यमाना आसन्। "निगूढमानः"—विनयप्रच्छन्नगर्वः। यद्यपि स्वशक्तिबलेन सर्वं कर्त्तुं प्रभवति तथापि लौकिकरीत्या गुरुजनसन्निधौ सर्वं कृत्यजातं विज्ञायानुतिष्ठेदिति शिष्टाचारपरिशुद्धमतीनां विदुषामाशयं मनसि विचार्य उद्धवबलरामयोः समीपमागत्य विनयेन पप्रच्छ। यदा च महर्षिर्नारदः श्रीकृष्णस्य समीपमजगाम जगत्प्रभुरपि भगवांस्तदा तस्य मुनेर्यादृशीमतिथियोग्यामभिवन्दनामाचचार, तेनाऽऽचरणेनास्माकं महान् विस्मयो जायते। केन प्रकारेणातिथयः पूजनीया तत् तस्य व्यवहारेणैव प्रकटितम्। यदा च युधिष्ठिरः श्रीकृष्णायार्घ्यं ददौ तदाऽवमानकलुषितचेताः शिशुपालः श्रीकृष्णं बहुधा भर्त्सयामास। तैरपि दुर्वचोभिस्तस्य मनसि कोऽपि विकारो न सञ्जातः। एवं समुत्तीर्णप्रतिज्ञश्च श्रीकृष्णः शिशुपालं युधि निजघान। काव्येऽस्मिन् महाकविर्यादृशं नायकमुपस्थापितवान् अन्यत्र काव्ये एतादृग्गुणमण्डितो नायको नैव लक्ष्यते। नायकस्यास्य चरितं सर्वैरनुकरणीयम्। तथाच उद्धवबलरामौ नायकस्य सहायौ, उद्धवः श्रीकृष्णस्य पितृव्यः, बलरामश्च ज्येष्ठभ्राता; उभावेव तस्य गुरुवत पूजनीयौ इति विचिन्त्य तयोर्वाक्येनैव स सर्वमनुष्ठितवान्। युवजनोचितशौर्यादिगुणमण्डितस्य बलरामस्य युद्धे मतिरासीत्। विचक्षणो धीशक्तिसम्पन्नो राजनीतिज्ञ उद्धवस्तु तस्यैतावन्मनसश्चाञ्चल्यमवलोकयन विहस्याब्रवीत्। भद्र सततमस्थिरमनसां जनानां मतिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्मिन्नपि कर्मणि सिद्धिं न लभते, तस्मान्ममापि वाक्यमाकर्ण्य तद् यदि युक्तिभिरुपेतं स्यात् तर्हि तदुचितं पन्थानमनुसर। राजसूययज्ञसमये निमन्त्रितान् युष्मान् तत्रोपस्थितान् विलोक्य श्रीकृष्णश्चार्घ्यभाजं दृष्ट्वा शिशुपालो युष्मभ्यं कोपिष्यति। तेन सह कलह एव तस्य वधोपायः। कविर्द्वितीयसर्गे उद्धवबलरामयोः परिचयं विशेषेण ददौ। राजनीतिविषयमवलम्ब्यास्मिन् सर्गे गूढानि रहस्यानि प्रकटितानि। यद्यपि सर्गोऽयं दुःश्रवत्वादिदोषेण दुष्टो दुर्बोधश्च तथापि विषयगौरवेण मनोरम एव।

प्रतिनायकश्चात्र शिशुपालः। प्रतिनायकस्य लक्षणञ्च साहित्यदर्पणे "धीरोद्धतः पापकारी व्यसनी प्रतिनायक" इति। दुराचारस्य शिशुपालस्य पूर्वजन्मवृत्तान्तं कविः प्रथमसर्ग एव वर्णितवान्। अयञ्च दुर्वृत्तः शिशुपालः सर्वस्मिन्नेव जन्मनि भगवद्विद्वेषी बभूव। ईदृशः प्रतिनायकोऽन्यत्र काव्ये न लक्ष्यते। भारवौ यः प्रतिनायको विहितः स तु किरातरूपी महादेवः। न तु तस्य ईदृशप्रतिनायकत्वं सम्भवति।

(शिशुपालचरितम्)

पुरा हिरण्यकशिपुनामा कश्चन देवद्रुग् दैत्याधिपतिरासीत्। तस्य तनयः प्रह्लादो भगवदर्पितहृदयो नियतं कृष्णनामानुकीर्त्तने रत आसीत्। पुत्रस्य परमेश्वरे परामनुरक्तिं पश्यन् क्षुभितचित्तो हिरण्यकशिपुः सततमुत्पीडयामास प्रह्लादम्। तदा करुणापरवशो हृषीकेशो भक्तस्य रक्षणाय नरसिंहरूपेणावतीर्य दानववरिष्ठं हिरण्यकशिपुं जघान। स एव हिरण्यकशिपुः परस्मिन् जन्मनि रावणनाम्ना जन्म परिजग्राह। स च तपोबलेन नरवानरवर्जमन्येषामजेयो भूत्वा देवानत्यर्थमुद्वेजयामास। तदापि भगवान् रामरूपेण नरपतेर्दशरथस्य गेहेऽवतीर्य रावणमवधीत्। पुनरपि स एव रावणः शिशुपालसंज्ञया समाख्यातो दर्पोद्धतमानसः श्रीकृष्णेन सह वैरमाचचार। अयञ्च दमघोषस्य पुत्रस्त्र्यक्षश्चतुर्भुजश्च। अयं जन्मकाले रासभसदृशमारावं कृतवान्।

चेदिराजकुले जातस्त्र्यक्ष एष चतुर्भुजः।
रासभारावसदृशं रराव च न नाद च॥ महा० सभा०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघनादवधम्

पञ्चदशः सर्गः

[निबन्धकः—श्रीनित्यगोपालविद्याविनोदः]

नाकः सहास उरुभिर्निशि देवधामा
शक्रस्तु कातर ऋभुप्रभुरात्मसौधे ।
पौष्पं विहाय शयनं कनकासनञ्च
तूष्णीं स्थितः सुरगणश्च जगाम निद्राम् ॥१॥
देवी सुरेशगृहिणी समुवाच मानाद्
दास्यास्तवाङ्घ्रिकमले घटितो नु दोषः ।
नायासि केन शयनालयमद्य देव
पश्य प्रियाप्सरस ईक्षणमुक्तनिद्राः ॥२॥
भीता विराम-जनिका नहि याति निद्रा
नाथान्तिकं तव भयं न कुतोऽस्ति तस्याः ।
जागर्त्ति कः कथय कुत्र निशीथकाले
दैत्या निरुन्धत इहाथ दिवः प्रवेशम् ॥३॥
हर्यश्व आह दयिते परिचिन्तयामि
शूरं दशाननसुतं नहि जय्यमन्यैः ।
सौमित्रिराजिशिरसि प्रहणिष्यतीमं
केनाथ वा विधिविधानमवश्यभाव्यम् ॥४॥
इन्द्राण्युवाच दयित त्वमवाप उग्रं
शस्त्रं यदीयबलतो न्यवधीद् विशाखः ।
दुर्दान्ततारकमसंख्यसुरारिसंघं
भाग्येन ते पशुपतिश्च सहाय आस्ते ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्गा स्वयं समवदन्मयि सुप्रसन्ना
सम्पूजिता तव भवेत् सफला समीहा ।
माया वदिष्यति विधिं सुकरं वधस्य
तत् केन वल्लभ वृथा समुपैषि चिन्ताम् ॥६॥
इन्द्रोऽवदत् सुनयने वचनं त्वयोक्तं
सत्यं तदस्त्रमखिलं रिपुराजधान्याम् ।
संप्रेषितं वद कथं तुमुले तु युद्धे
माया च लक्ष्मणमिमं परिरक्षिता वा ॥७॥
सौमित्रिशौर्यमतुलं विदितं ममैव
किन्त्वत्र सिंहविजयी द्विरदः श्रुतः किम् ।
वज्रध्वनिं घननिनादमिरम्मदञ्च
संशृण्वतोऽपि हृदयं मम वेपतेऽद्य ॥८॥
देवीन्द्रजिद् युधि रुषाऽनलकल्पबाणां-
श्चापे निधाय कुरुते यदि सिंहनादम् ।
ऐरावतोऽपि मम याति भयं बलीयो
वीरः क एव समरे पुरतोऽस्य तिष्ठेत् ॥९॥
खिन्नः समास्त मघवा गुरुदुःखमौनी
देवेश्वरी च निकषाऽमुदिताऽलमास्त ।
रम्भादयोऽपि परितोऽसुखिताः समासन्-
ज्योत्स्नेव मुद्रितदलं नलिनञ्च रात्र्याम् ॥१०॥
किं वाऽस्विकासनतले शरदुत्सवाहे
दीपावलीव मुदिता मनुजा भवन्ति ।
वङ्गेषु दुर्लभशुभागमनां भवेशीं
लब्ध्वा तदा समगमच्च वरेण्यमाया ॥११॥
देवालये मणिविभा द्विगुणा बभूव
मन्दारहेमसुषमा रविभानुदीप्ता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्नोति वृद्धिमतुलामिव हृष्टचित्ता-
विन्द्रः शची च नमतः स्म पदेऽतिभक्त्या ॥१२॥
कृत्वाशिषः सुकनकासन आस्त माया
पप्रच्छ देव-मघवा प्रकृताञ्जलिस्ताम् ।
किं वाञ्छसीह कृपया वद किङ्कराय
प्रत्याह सा च दशशीर्षपुरं व्रजन्ती ॥१३॥
पूर्णं भविष्यति तवेप्सितमल्पकालाद्
दुर्वृत्तरावणमहं यमसद्म नेष्ये ।
पश्याङ्ग दुःखरजनी भवति प्रभाता
स्मेराननना परिपतत्युदयाद्रिमूषा ॥१४॥
लङ्कारविन्दमिहिरोऽस्तगिरिं प्रयाता
सौमित्रिमिष्टिभवनं गमयामि नूनम् ।
मायाभिरस्तपनृपं निहतं विधास्ये
निःशस्त्रदुर्बलरिपुर्निधनं हि यायात् ॥१५॥
जालान्तरे हरिरिवाशु निपातमेता
युद्धेऽभ्रवाहनजयी न विधिर्निवार्यः ।
वार्त्ता यदाशरनृपश्रुतिमेष्यतीयं
संत्रास्यसे रघुवरं वद शक्र केन ॥१६॥
रामानुजं रघुसखाऽथ विभीषणेन
सार्द्धं शुगर्त्तिविकलाद् दशकन्धराद् वा ।
वीरोत्तमाद् यमनिभादतिभीमबाहो
रक्षिष्यसीन्द्र समरे तुमुले कथं वा ॥१७॥
प्रत्यब्रवीच्छतवितानशचीविनोदो
देवीन्द्रजिच्छरहतो यदि लक्ष्मणः स्यात् ।
संग्रामभूमिमनुविश्य सुपर्वसैन्यैः
संत्रास्यते स हि मया त्वदनुग्रहाच्छ्रुः ॥१८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भीतिं न यामि नृपते रजनीचराणां
मातस्त्वदङ्घ्रिकमलाश्रितकिङ्करोऽस्मि ।
जालं वितत्य तव काष्टमाशु हिन्धि
दुर्द्धान्तरावणिममुं त्वरितं महेशि ॥१९॥
रामः परप्रिय ऋभुप्रवरस्य मातः
प्राणान् विहातुमपि देवगणास्तदर्थम् ।
युक्ता युधि स्वयमहञ्च भुवं प्रगम्य
धक्ष्यामि कर्बुरमिरम्मदवर्षणेन ॥२०॥
वज्रिंस्तवेदमुचितं सकलं हि कर्म
मायाऽब्रवीत्तव गिरि प्रमुदं लभेऽहम् ।
आज्ञां विधेहि बलभित् समुपैमि लङ्का-
मुक्त्वेत्यगात् कृतशुभोक्तिरसौ महेशी ॥२१॥
निद्रास्तुतः सुरपतिर्धृतपाणिपद्मः
शच्याः स्वसुन्निभवनं प्रविवेश रम्यम् ।
रम्भादिदेवललनास्त्वरितं विमुच्य
काञ्च्यादिमण्डनमगुः कुसुमाढ्यशय्याम् ॥२२॥
वायुर्ववौ सुरभितो विधुवक्त्रबिम्बे
किं वाऽलकेषु कुचयोर्विलसन मनोज्ञम् ।
फुल्लप्रसूननिचये विपिने यथाऽलिः
क्रीडन्ननीव रुचिरं मधुपानमत्तः ॥२३॥
मायेश्वरी गतवती कनकप्रवेशं
मुक्तश्च स प्रनिनदं त्वरया तदैव ।
निर्गत्य सा सुमधुरं समुवाच निद्रां
सौमित्रिमन्दिरमरं रुचिरं प्रयाहि ॥२४॥
लङ्कापुरेऽस्ति शिबिरे स हि वीरवर्यो
वेशं तदीयजननी-क्षममादधाना ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूर्ध्नः समीप उपविश्य वदिष्यसि त्व-
मुत्तिष्ठ वत्स रजनी विरतिं समाप्ता ॥२५॥
द्वारेऽस्ति फुल्लनलिनं सर उत्तरस्मि-
ल्लँङ्कापुरस्तटभुवि प्रचकास्ति दिव्यम् ।
चण्डीगृहं कनकशीर्षसुचारुदृश्यं
स्नात्वाऽत्र चित्रकुसुमैर्यज दैत्यहन्त्रीम् ॥२६॥
आढ्यम्भविष्णुरतुलैरमलैर्यशोभि-
र्देवीप्रसादबलतो निहनिष्यसि त्वम् ।
शत्रून् रणे बलवतोऽपि सहायहीनः
क्लेशं विनेव कदलीं मदमत्तदन्ती ॥२७॥
एकः प्रयाहि प्रियनन्दन काननं त-
दुक्त्वैतदाशु चलिताः स्वपनस्य देवी ।
पश्य क्षपा विरतिमत्र समेति भद्रे
कालं वृथा क्षपितमीश्वरि मा विधेहि ॥२८॥
निद्रा ययौ गगनमुज्ज्वलवर्त्म कृत्वा
तारेव भूमिपतिता निजकक्षमुक्ता ।
सौमित्रिधाम चपलं धृतमातृवेशा
गत्वा स्थिताह्वयदिमं मधुरोक्तिवृष्ट्या ॥२९॥
श्रुत्वैव चोत्थित इतस्तत ईक्षणार्थी
वक्षः समार्द्रमकरोन्नयनाम्बुवर्षैः ।
मातः कथं नु कृपया रहिताऽसि दासे
साक्षाद् भवार्चनमहं विदधे पदोस्ते ॥३०॥
मातस्तवाङ्घ्रिरजसो ग्रहणेन पूर्णं
कुर्वे मनोरथमहं सफलं चिराय ।
स्मृत्वा तवार्त्तिरुदितं वनयानकाले
चित्तं सुदुःखमुपयाति विदीर्णतां मे ॥३१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मृष्ट्वाऽश्रु वीरतिलको गजलोलगामी
वव्राज तत्र रघुनाथ उवास यत्र ।
नत्वाऽनुजः पदयुगे प्रियपूर्वजस्य
बद्धाञ्जलिः समवदच्चकितं सुषुप्तिम् ॥३२॥
स्वप्नोऽद्भुतो रघुकुलेश मयेक्षितोऽङ्ग
मातोषविश्य शिरसः सविधे सुमित्रा ।
प्रोवाच तात जहि सुप्तिमगात्तमिस्रा
लङ्कोत्तरालयगतां गिरिजां यजस्व ॥३३॥
तस्याः प्रसादमहिमाचितशक्तिरुग्रान्
रक्षोगणान् युधि भवांस्त्ववलीलयाशु ।
संनेष्यते यमगृहं भविता यशस्वी
यात्वेक एव जननी चलितेयदुक्त्वा ॥३४॥
क्रन्दन् समाह्वयमहं जननीं कृपार्द्रां
नापं तदुत्तरमतः करवाणि कार्यम् ।
किं वाऽधुना रघुमणे न्वनुशाधि भृत्यं
दासो भवेत् प्रभुनिदेशपथानुवर्त्ती ॥३५॥
मित्रं विभीषणमुवाच विदेहराज-
कन्यापतिर्वेद सखे रघुवंशरक्षिन् ।
रक्षःपुरे त्वमिह मे शरणं वरिष्ठं
सूर्यं विना क इह वा शमयेत्तमिस्रम् ॥३६॥
प्रत्याह ऋक्ष-ऋषभो विपिनेऽस्ति सत्यं
तत्रैव मन्दिरमुमापदपद्मपूतम् ।
तीरे सरोवरवरस्य निशाचरेन्द्रो
यत्र स्वयं गिरिसुतां यजतेऽतिभक्त्या ॥३७॥
कश्चिन्न तत्र विपिने भयसङ्कुले तु
यातुं समर्थ इति चापि मया श्रुतं यत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवः स्वयं पशुपतिर्भ्रमति त्रिशूलं
धृत्वा जयी स हि भवेद् यजते य ईशम् ॥३८॥
सौमित्रिरेति यदि तद्विपिनं सुघोरं
निर्भीकचित्त इत आशु समृद्धसत्त्वः ।
तत्ते महारथिवरेप्सितमादधानं
सिद्धिं परां सफलतामणिमण्डितं स्यात् ॥३९॥
सौमित्रिराह नितरामहमस्मि दासो
रामस्य निर्जितशशाङ्कमुखस्य जिष्णोः ।
तस्याज्ञया वनमहं सुखतो विशेयं
कः शक्नुयान्मम गतिं जगतीह रोद्धुम् ॥४०॥
प्रत्याह राघव इह प्रचुरो मदर्थः
क्लेशस्त्वया प्रियतमाङ्ग महान् विसोढः ।
नाहं नियोजयितुमिच्छुरतः पुनस्त्वां
कृच्छ्रेषु यानि नितरां स्मृतितस्तुदन्ति ॥४१॥
कुर्यान्त्वहं किमिह दैववलेन वृत्ते
भ्रातः प्रयाह्यवहितः सुकृतैर्बलिष्ठः ।
देवप्रसाद इव लोहमयं भवन्तं
वर्मावतु प्रतिपदं शुभकर्मयत्तम् ॥४२॥
सौमित्रिरङ्घ्रिकमले रघुकुञ्जरस्य
नत्वा विभीषणपदे च तथाऽतिभक्त्या ।
सासिर्जगाम बलवांस्त्वरितं विशङ्को
निर्भीकचित्त उदधिप्रतिमोऽतिभीमः ॥४३॥
सुग्रीव उत्तरदिशि प्रतिबुद्ध आस्ते
द्वारे यतोऽगमदसौ श्रुतपादनादः ।
गर्जन्नुवाच स हि वीर इतो निशाया-
मायासि कः कुत इदं वद मृत्युदास ॥४४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चूर्णं शिलाभिरहमद्य शिरः करोमि
नोचेद्ददासि कुलनामनिदर्शनं ते ।
प्रोवाच सस्मितमयं रघुनाथदासो
रक्षोऽन्ववायनिधनोदितधूमकेतुः ॥४५॥
तूर्णं व्रजन् स हि पुरः पदवन्दनार्थी
सुग्रीव आह च सखे रघुशूरभृत्यः ।
यादृग् भवान् अहमपि प्रथितस्त्रिलोक्यां
तादृक् क्षमस्व मम दोषमबोधजातम् ॥४६॥
सम्भाष्य तं मधुमुखं रघुनाथमित्रं
सौमित्रिरुत्तरमुखं चलितश्च भूयः ।
दण्डैः कियद्भिरुपगम्य वनप्रवेशं
द्वारं ददर्श चकितः स्वतिभीममूर्त्तिम् ॥४७॥
बालेन्दुभालसुभगं फणिरत्नदीप्रं
शीर्षे जटावलिधरं सुरनिम्नगायाः ।
फेनोक्षितं शरदि नैशघनाग्रभागे
ज्योत्स्नां यथा धवलिताङ्गवरं विभूत्या ॥४८॥
शूलं करे स्थविरशालविशालदीर्घं
निर्वर्ण्य स प्रबुबुधे तमुमाऽसुबन्धुम् ।
निष्कृष्य भीषणमसिं समुवाच वीरो
वन्दे तवाङ्घ्रियुगलं रघुनाथदासः ॥४९॥
मुञ्चायनं वनमितो गिरिजां प्रयक्ष्ये
दुष्कर्मरावणकृते यदि योत्स्यसे त्वम् ।
शम्भो मया सह विधेहि रणं यथेच्छ-
मिष्टार्थयत्तहृदयो न सहेत कालम् ॥५०॥
धर्मस्य मे विदितमस्तु समग्रकृत्य-
माकारयामि युधि बालशशाङ्कभालम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीतिर्भवेद् यदि दृढा सुकृतस्य लोके
नूनं भवन्तमतिघोरमृधे विजेष्ये ॥५१॥
प्रत्याह्वयेन शिखरीव पवेर्निनादं
प्रत्याह भूतनिचयेश उदात्तकण्ठम् ।
शंशामि साहसमहं तव शूरसिंह
सौमित्र आत्थ भवता मम युत् कथं स्यात् ॥५२॥
त्वयि तोषमिता गिरिराजसुता
सुभगेति सृतिं विदधे सुगमाम् ।
इति वाचमुदीर्य शिवोऽन्तरधात्
प्रविवेश वनं स च रामसखः ॥५३॥

इति श्रीमेघनादवधे महाकाव्ये लक्ष्मणस्य वनप्रवेशो नाम
पञ्चदशः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वररुचिविरचिता

लिङ्गवृत्तिः

(पूर्वतोऽनुवृत्ता)

शेखरयूपपुरोडाशकूपसूपलवशष्पाः ।

धर्ममखमयवासोदशा दाराः पुंसि बहुत्वं चैषाम् ॥४५॥

एते शब्दाः पुंसि भवन्ति । अयं शेखरः पुष्पसंहातः, उत्तुङ्गो वा । यूपो यज्ञभाण्डम् । पुरोडाशो यज्ञपिण्डकः । कूपोऽवटः । सूपो व्यञ्जनम् । लवो लेशः । शष्पो बालतृणम् । धर्म उपवासादिः । मयो वेश्म । वासांसि वस्त्राणि । तेषां दशाः । दाराः पुंसि भवन्ति । बहुत्वं चैषां सदा भवति । इमे वासोदशाः वस्त्रान्तसूत्रम् । इमे दाराः स्त्रियः । वास इति किम् ? दशाऽवस्था ।

मांसविवराभिधानं नपुंसके विद्धि तीर्थतुण्डे च ।

मांसाभिधानं विवराभिधानं च तीर्थतुण्डे च नपुंसके विद्धि जानीहि । यथा - मांसं पललं क्रव्यमित्यादि । इदं विवरं बिलं छिद्रम् । रन्ध्रं कुहरं सुषिरम् इत्यादि । इदं तीर्थं पुण्यस्थानम् । तुण्डं वक्त्रम् ।

यवमाषाद्या व्रीहयः पुंसि प्रियङ्गवश्च स्त्रियामेव ॥४६॥

यवमाषाद्या व्रीहयः पुंसि भवन्ति । यथा—इमे माषाः मुद्गाः । कुलत्थकाः । गोधूमाः । तिलाः । कलायाः । मसूराः । सर्षपाः । प्रियङ्गवश्च स्त्रियामेव । इमाः प्रियङ्गवः ।

पल्लव उक्तः पुंसि तु नपुंसके किशलयं स्त्रियां लाक्षा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पल्लवशब्दः पुंसि भवति। अयं पल्लवः। इदं किशलयम्, प्रवालम्। लाक्षा स्त्रियां स्यात्। इयं लाक्षा जतु।

ऋग्रोचना *पिण्डिकाकण्डूक्षपाश्चैव ॥

ऋगादयः शब्दाः स्त्रियां भवन्ति। इयम् ऋग् वेदः। रोचना गोपित्तम्। पिण्डका प्राण्यङ्गम्। कण्डूः खर्जूः। क्षपा रात्रिः।

कललकफपूयकुल्माषकल्ककल्पगेहमखलौहित्याः। *झर्झरपुंखचषालाश्च पुंसि कटाहमत्स्यौ च ॥४८॥

एते शब्दाः पुंसि भवन्ति। कललो गर्भाशयः। कफः श्लेष्मा। पूयः शोणितविकारः। कुल्माषः शस्यजातिः। कल्कः सर्षपादीनां चूर्णम्। कल्पः कालपरिमाणम्। गेहो गृहम्। मखो यज्ञः। लौहित्यो नदविशेषः। झर्झरो वादित्रविशेषः। पुङ्खः शरस्य। चषालो यूपाग्रम्। कटाहो लोहभाजनम्। मत्स्यो मीनः।

शवपलल†तल्पसद्मबलिशामिषाणि निमित्त-पित्तचित्तानि। किल्बिषवृजिनानि च तथा नपुंसके पीठपापे च ॥४९॥

एते शब्दा नपुंसके भवन्ति। यथा—इदं शवं मृतशरीरम्। पलं मांसम्। तल्पं शयनीयम्। सद्म निवासः। बलिशं मत्स्यवेधनम्। आमिषं मत्स्यमांसम्। निमित्तं कारणम्। पित्तं धातुविकारः। चित्तं मनः। किल्बिषं पापम्। वृजिनं कुटिलम्। पीठमासनम्। पापं पातकम्।

---

* जर्जर—मु० पा०

† पलक—मु० पा०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वल्बजलाजासूनां पुंयोगः स्याद् बहुत्वं च ॥

वल्बजादयः शब्दाः पुंसि भवन्ति बहुत्वं चैतेषां सदैव। इमे वल्बजाः तृणजातिः। इमे लाजा भृष्टधान्यानि। असवः प्राणाः।

स्थलशाद्वलशिबिराणां नपुंसकत्वम्

एते शब्दा नपुंसके भवन्ति। इदं स्थलमरण्यप्रदेशः। शाद्वलं हरितस्थानम्। शिबिरं शकटस्थानम्।

स्त्रियां पृतना च ॥५०॥

पृतनाशब्दः स्त्रियां भवति। इयं पृतना सेना।

ईर्ष्यारुचिस्फुलिङ्गाः शय्या निःश्रेणीकुटिकोटिवाणी पेशी वरूथिनी स्त्रियां कुथा नाडिका कन्था च ॥५१॥

इयमीर्ष्या अक्षमा। रुचिः दीप्तिः, अभिलाषो वा। स्फुलिङ्गोऽग्निकणः। शय्या शयनीयम्। निःश्रेणी अधिरोहणी। कोटिः संख्या। कुटिर्गृहम्। वाणी वाक्। पेशी मांसस्य। वरूथिनी सेना। कुथा ऊर्णकृता। नाडिका कालपरिमाणम्। कन्था जीर्णवासः, कुड्यश्च।

नाड्युपपदं व्रणं पुंसि वृक्षजनपांशुकन्दुकलशाश्च।

नाडीपूर्वं व्रणं पुंसि भवति। अयं नाडीव्रणः। नाड्युपपद इति किम्? दुष्टव्रणम्। अयं वृक्षः। अयं जनो लोकः। पांशुश्चूर्णम्। कन्दुः कान्दविकपाकस्थानम्। कलशो घटः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जरपलितद्वन्द्वाक्षराणि विद्यादितरजातौ ॥५२॥

पञ्जरादीनि इतरजातौ नपुंसके जानीयात्। इदं पञ्जरं शकुनिबन्धनम्। पलितं जरा।...अक्षरं वर्णः।

मेधारसनानिद्रातन्द्रातन्त्र्यः स्त्रियां समञ्जिष्ठाः।
मदिरा मन्दुराकृशरे स्यातां *वाक्षदुन्दुभिश्च ॥५३॥

एते स्त्रियां भवन्ति। इयं मेधा धारणशक्तिः। रसना रसज्ञानशक्तिः(?), मेखला च। निद्रा सुषुप्तिः। तन्द्रा आलस्यम्। तन्त्रीः वाद्यविशेषः। मञ्जिष्ठा रागद्रव्यम्। स्यातां भवेतामित्यर्थः। इयं मदिरा सुरा। मन्दुरा वाजिशाला। कृशरा तिलयवागूः। अक्षैर्दीव्यते(?)। अक्षग्रहणं वादित्रसम्बन्धिनिवृत्त्यर्थम्। वाद्यदुन्दुभिरित्यर्थः।

धान्यविदलांशुकवितानवलयरत्नमिथुनश्मशानानि।
बिसतिमिराणि विद्यान्नपुंसकमग्रनखे चैव ॥५४॥

एते शब्दा नपुंसके भवन्ति। इदं धान्यं शस्यम् विदलं मुद्गादीनाम्। अंशुकम्, वस्त्रम्। वितानं वस्त्रमयमावरणम्। वलयं स्वर्णादीनाम्। रत्नं मणिः। मिथुनं स्त्रीपुंसद्वन्द्वम्। श्मशानं मृतस्थानम्। बिसं पद्ममूलम्। तिमिरं तमः। अग्रं श्रेष्ठम्। खमाकाशम्।

पुञ्जाद्रिकोणकरीषकषायतरलपिण्याकगर्भदर्भार्भाः। पुंसि स्युः

अयं पुञ्जः सङ्घातः। अद्रिः पर्वतः। कोणो गृहादीनाम्। करीषो गोमयविकारः कषायो रसविशेषः तरलो हारमध्यगः। पिण्याकस्तिलविकारः। गर्भ उदरः। दर्भः कुशः। अर्भो बालकः।

---

* चाच—सु० पा०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्तनसुल्वचापनाम्नां नपुंसकता ॥५५॥

पत्तनादीनां ये पर्यायाः शब्दास्तेषां नपुंसकता। इदं पत्तनं नगरम्। पुरमित्यादि। सुल्वं म्लेच्छमुखम्। ताम्रम्। उदुम्बरमित्यादि। चापं धनुः कार्मुकमित्यादि।

विडवर्णा स्त्री ज्ञेया सान्नावीथ्यौ च नीवीभेर्यौ च।
मञ्जूषागण्डूषामूषापरिषद्गुहाश्चैव ॥५६॥

विट्शब्दो यदा अवणस्तदा स्त्रियां भवति। इयं विट् विष्ठा। अवर्ण इति किम्? अयं विट् वैश्यः तृतीयो वर्ण इत्यर्थः। सान्नादयः स्त्रियां भवन्ति। इयं सान्ना गलकम्बलः। वीथी गृहावयवः। नीवी मूलबन्धनम्। भेरी वाद्यविशेषः। इयं मञ्जूषा काष्ठमयी। गण्डूषा हस्तजलम्। मूषा सुवर्णधमनिका। परिषत् सभा। गुहा पर्वतस्य कन्दरा।

तृष्णाकृपापताकारथ्याकृषयश्च काकिन्यः।
एते स्त्रियां स्युः प्रतिशीरा धारा च नेमिश्च ॥५७॥

एते तृष्णादयः शब्दाः स्त्रियां भवन्ति। इयं तृष्णा पिपासा। कृपा दया। पताका चिह्नम्। रथ्या मार्गः। कृषिर्वैश्यवृत्तिः। काकिनी पणचतुर्भागः। प्रतिशीरा तिरस्करणी। धारा प्रपतनम्। ऊर्णामयी पर्वतस्य रेखा। नेमिश्चक्रपिण्डिका।

***चतुष्पथयुगलच्छलचेलखोलधिष्ण्यार्गलशफानाम्।**
विद्धि नपुंसकभावं पण्यस्य च पिच्छपलयोः ॥५८॥

---

* वर्तुलयुग—सु० पा०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुष्पथादीनां नपुंसकभावं विद्धि जानीहि। इदं चतुष्पथम्। युगलं युग्मम्। छलं व्याजः। चेलं वस्त्रजातिः। खोलं भग्नभाण्डम्। धिष्ण्यं गृहम्। अर्गलं द्वारपिधानम्। शफं खुरः। पण्यं विक्रेतव्यम्। पिच्छं मयूरस्य। पलं चतुष्कर्षपरिमाणम्।

रयमण्डपनरककपालगुडमणिमेढ्रदर्दुरकुशूलाः।
युग्माकाशव्रतशृङ्गवर्जिताः पुंसि मञ्चश्च ॥ ५६॥

एते शब्दाः पुंसि भवन्ति। अयं रयो वेगः। मण्डपो जनाश्रयः। नरकः अवीचीत्यादिः असुरश्च। कपालः शिरोऽवयवः, भिक्षाभाजनञ्च। गुडः इक्षुविकारः। मणिः रत्नम्। मेढ्रः स्त्रियाम्। दर्दुरो भेकः। कुशूलो धान्यादिस्थित्याधारः। युग्माकाशव्रतशृङ्गवर्जिता इति युग्मादयश्च नपुंसके भवन्ति। इदं युग्मं युगलम्। आकाशं नभः। व्रतं नियमः। शृङ्गं विषाणम्, पर्वतस्य च। मञ्चः काष्ठकृतः।

क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সংস্কৃত-সাহিত্য-পরিষৎ-পুস্তকালয়ের

মুদ্রিত-পুস্তকসংখ্যা (১৮।৩।৪২ তারিখে)

মুদ্রিত গ্রন্থ

বেদ—	৪৪৩	তন্ত্র	২৯৩
ব্যাকরণ	৩০৬	পুরাণ	২০২
কোষ	১০৬	নাটক	২৫৪
ইতিহাস	১০০	সঙ্গীত-শাস্ত্র	৩০
লেখগ্রন্থ	১৫	কামশাস্ত্র	১৬
Catalogue of		রাজনীতি	৩৪
Manuscripts	১১৪	বৈষ্ণবগ্রন্থ	৫৯
কাব্য	৬৬৪	স্তোত্রগ্রন্থ	৬৫
অলঙ্কার	১২২	স্মৃতি	৩৮৪
ছন্দঃ	২০	জ্যোতিষ	২০০
ন্যায়	১৪৭	শিল্প	২৭
বৈশেষিক	৩০	বৈদ্যক	১৪৫
মীমাংসা	৮৬	বৌদ্ধ	৭৮
যোগ	৫৪	জৈন	১৬২
সাংখ্য	৩৫	History & Criticism	৪৩
বেদান্ত	৫০১	বিবিধ	৫৯

মুদ্রিত পুস্তকের মোট সংখ্যা :—৪৭৯৪

হস্তলিখিত পুস্তকের মোট সংখ্যা :—১৮১৯+১৩০০=৩১১৯

দ্রষ্টব্য—পুস্তকালয়ে যাহাতে সংস্কৃতভাষায় লিখিত বা সংস্কৃতভাষা-সম্বন্ধীয় নব-প্রকাশিত পুস্তকগুলি সংগৃহীত হয় তৎপ্রতি বিশেষ দৃষ্টি রাখা হইতেছে। সংস্কৃতভাষার অনুশীলনে যাঁহাদের আগ্রহ আছে, তাঁহারা সকলেই আসিয়া পরিষদ্‌গৃহে বসিয়া পুস্তক পাঠ করিতে পারেন, এবং সভ্য হইলে সামান্য অর্থ ন্যস্ত রাখিয়া দুষ্প্রাপ্য ও দুর্ম্মূল্য পুস্তক ভিন্ন অন্য সকল পুস্তকই প্রয়োজনমত স্বস্বগৃহে লইয়া অধ্যয়ন করিতে পারেন। সাধারণতঃ বৈকাল ৩।০ টা হইতে রাত্রি ৯।০টা পর্য্যন্ত পুস্তকালয় ও সাধারণ পাঠাগার খোলা থাকে।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

THE

MANJUSHA

The Editor of the Sanskrit Sāhitya Parişad wishes to draw the attention of the reader to the new Sanskrit monthly the Mañjūşā also under his control. It is a bright little magazine of 16 closely printed pages, full of interest. It contains short stories, poems, beautiful English poems and prose passages for translation into English for which prizes are offered, proverbs and proverbial sayings from the different European and Indian languages. It is now publishing a brilliant Sanskrit rendering of Bankim Chandra's immortal novel "Krishnakanter Will" and a series of articles on the Sanskrit language from the pen of Pandit Vidhushekhar Sastri. The Mañjūşā may be regarded as a supplement to the Sanskrit Sāhitya Parişat and the subscribers to the Parişat are invited to subscribe to the Mañjūşā also. It is the cheapest, brightest and at the same time, the most regular of all Sanskrit journals and magazines. The annual subscription is Rupee One only. Communications are to be addressed to the Manager.

61/A Ramkanta Bose Street,
Baghbazar, Calcutta.

Specimen numbers are sent free on application.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073

Vol. XVIII, No. 5] [September, 1935.

१८५७ शकीये भाद्रे 26.9.35 १८श-वर्षस्य ५म-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, Shyambazar, Calcutta.

Printed at
CALCUTTA ORIENTAL PRESS
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সংস্কৃত-সাহিত্য-পরিষদ্‌গ্রন্থমালায়াম্

—কলকত্তাস্থ-রাজকীয়-সংস্কৃত-মহাবিদ্যালয়াধ্যাপক—

শ্রীযুক্ত-কালীপদ-তর্কাচার্য্য-

সম্পাদিতা গ্রন্থাঃ

১। **মুক্তিবাদঃ**—গদাধর-ভট্টাচার্য্যবিরচিতঃ, শিবরামকৃতয়া প্রাচীনয়া টীকয়া তর্কাচার্য্যকৃতয়া মুক্তিদীপিকাখ্যয়া টীকয়া বঙ্গভাষাময়েণ তাৎপর্য্য-বিবরণেন সুবিস্তৃতয়া সংস্কৃতভাষাময়-ভূমিকয়া চ সমলঙ্কৃতঃ। ক্রাউন আকৃতিঃ, ২৪২ পৃষ্ঠানি, ১৯২৪, মূল্যম্ ৫৲।

২। **প্রশস্তপাদভাষ্যম্**—জগদীশস্মৃক্তিসহিতম্, তর্কাচার্য্যকৃত-স্মৃক্তিদীপিকা-টীকয়া বঙ্গভাষাময়-ভাষ্যতাৎপর্য্যেণ সুবিস্তৃতয়া সংস্কৃতভাষাময়-ভূমিকয়া বিস্তৃত-বিষয়সূচ্যা চ সমলঙ্কৃতম্। ডিমাই আকৃতিঃ, ২৫০ পৃষ্ঠানি, ১৯২৬, মূল্যম্ ২৲, (সদস্যপক্ষে) ১৷৷০।

৩। **নলদময়ন্তীয়ম্** (সপ্তাঙ্কনাটকম্)—শ্রীযুক্ত-কালীপদ-তর্কাচার্য্য-বিরচিতম্। ডিমাই আকৃতিঃ, ১৫০ পৃষ্ঠানি, ১৯২৬, মূল্যম্—১৷০, (সদস্যপক্ষে) ১৲।

বিদুষামভিমতানি

১। **মং মং শ্রীযুক্তকামাখ্যানাথ-তর্কবাগীশস্য**—গদাধরভট্টাচার্য্যকৃত-নবমুক্তিবাদঃ শিবরাম-কৃত-টীকয়া নব্যনৈয়ায়িকাগ্রণী-শ্রীযুক্ত-কালীপদ-তর্কাচার্য্যকৃতদীপিকয়া চ সহিতঃ সংস্কৃত-পরিষৎ-সংগৃহীতার্থব্যয়েন নিরুক্তপরিষদধ্যক্ষাণামান্তরিকপ্রযত্নেন চ মুদ্রিতো ভূত্বা প্রকাশিতঃ। মুদ্রিত-পুস্তকানেকাংশপর্য্যালোচনেনাপি কশ্চিদ্ ভ্রমপ্রমাদাদিদোষো ন পরিলক্ষিতঃ। অতঃ পরিষৎ-সংগৃহীতার্থব্যয়স্য পরিষদধ্যক্ষাণামান্তরিকপ্রযত্নস্য চ সার্থক্যং বয়মুপলভামহে। দীপিকা-প্রণেতৃ-তর্কাচার্য্যেণ বহূনি তন্ত্রাণি পর্য্যালোচ্য তেভ্যঃ প্রমাণানি সংগৃহ্য চ নবমুক্তিবাদস্য পরিপোষণার্থং তত্র সন্নিবেশিতানি। তস্মাচ্চ শ্রীমান্ তর্কাচার্য্যো ধন্যবাদস্যাশীর্ব্বাদস্য চ সুযোগ্যতমং পাত্রমিতি বয়ং মন্যামহে।

২। **লক্ষ্মণশাস্ত্রিণোদ্রাবিড়স্য**—শ্রীমতা পণ্ডিতপ্রবর-কালীপদ তর্কাচার্য্য-মহাশয়েন গদাধর-ভট্টাচার্য্য-প্রণীতো মুক্তিবাদঃ প্রাচীনয়া শিবরাম-টীকয়া সহ সংস্কৃত-সাহিত্য-পরিষদ্ব্যয়েন মুদ্রাপিতঃ। তত্র চ তর্কাচার্য্য-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

September, 1935.	१८५७-शकीये भाद्रे १८श-वर्षस्य ५म-संख्या	Vol. XVIII No. 5

मतिमञ्जरी

कस्य वा न विदितः पण्डितप्रकाण्डः श्रीमान् पञ्चाननतर्करत्नमहोदयः। यो ह्यनतिक्रान्तबालभाव एव देवभाषया विरचय्य पद्यानि विस्मयस्तिमितमिव विदधे जनकस्यान्तःकरणम्, यमेवोपन्नमवलम्बमानाऽद्यापि समुच्छ्वसिति वङ्गेषु सनातनो धर्मः, येन खलु निर्मायमेव तूलोत्क्षेपं समुत्क्षिप्तमखिलजनस्पृहणीयं महामहोपाध्यायविरुदम्, यस्मै च स्वप्ने प्रादुर्भूय स्वयं भगवती कालिकादेवी शास्त्रार्थमन्वशात्, यस्माच्च समुद्विजन्ते सनातनधर्मसमुन्मूलनव्यसनिनः संस्कारकम्मन्याः स्वैरिणः, यस्य चामरमङ्गलादिभिरनुपमैः काव्यरत्नैर्विमण्डिता देवी सरस्वती, यस्मिंश्च पाण्डित्यधार्मिकत्वयोरपूर्व सामानाधिकरण्यमुपलभ्यते, स्वजन्मानुग्रहपवित्रितवसुन्धरस्याऽऽर्यवंशपुण्यपुञ्जायमानस्यास्य महात्मनो नाम कस्य वा नानुप्राप्तं श्रवणसरणिं भारतीयस्य। अमुना किल महात्मना वङ्गवासिसमाख्ये समीचीनतमे वङ्गभाषामये वृत्तान्तपत्रे 'वेदश्च वेरिवेरि च'-शीर्षकः कोऽपि प्रबन्धः प्रकाशितः। तस्य च सुमनोहरस्य समयोचितस्य प्रबन्धस्य सारोऽत्र सन्निवेश्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"व्यतीतसंवत्सरत आरभ्य वाराणस्यां 'वेरिवेरि'रोगस्य प्रादुर्भावो विशेषेणानुभूयते। अस्य च प्रभावो वङ्गीयेष्वेव सविशेषमुपलक्ष्यते। यन्त्रसंस्कृततण्डुला एव निदानमामयस्यास्य समुत्पत्तावितिं चिराच्छ्रुतमस्माभिः। इदानीं जनवादस्यास्य सत्यतायामेव प्रवणीभवति मानसम्।

धार्मिकाणां यन्नित्यभोजनं तदपि प्राणाग्निहोत्रमेव। न खलूदरपूरणलक्षणलौकिककर्मणे वा रसनातर्पणरूपभोगनिष्पत्त्यै वा विहितं भोजनम्। तदपि धर्मार्थमेव सम्पादनीयम्, अयमपि यज्ञविशेष एव। ये तावत् पञ्च महायज्ञाननुतिष्ठन्ति तेषामपि यदन्नदानादिकम्, तस्य यज्ञत्वे भूयांसि प्रमाणान्युपलभ्यन्ते। यथा तथा वा भवतु, शिष्टजनानां तण्डुलस्य यज्ञसाधनरूपेणैव सदा व्यवहार्यत्वे नास्ति लेशतोऽपि संशयावकाशः।

यज्ञीयतण्डुलनिष्पादनविधौ च वेदेष्वाम्नातौ—"व्रीहीन् प्रोक्षति" इति, "व्रीहीन् अवहन्ति" इति। प्रथमतस्तावत् प्रोक्षणीया व्रीहयः—उत्तानितेन पाणिना व्रीहिषु जलबिन्दुप्रक्षेपः कार्यः। ततश्च प्रोक्षणसंस्कृतास्ते व्रीहयोऽवहन्तव्याः। अवपूर्वाद्धन्तेरवघातशब्दो निष्पन्नः। अवशब्दस्तावन्निम्नार्थे वर्तते। ऊर्ध्वदेशतोऽधोनिपातितेन मुसलादिना य आघातः स एवावघातशब्दवाच्यः। उदूखलमुसलयोर्मुसलेन वङ्गेषु प्रचलितया कण्डन्या वा धान्येषु य आघातः स ऊर्ध्वदेशतोऽधोनिपातितद्रव्येण निम्नस्थव्रीह्यवघात इति कृत्वा अवघात एव। धान्येषु प्रोक्षणमवघातश्च नियमविधौ एव।

यदा तावदन्यथाविधानमपि स्वेच्छया सम्भवति, तदा नियमविशेषबलेन अन्यथा विधानाद् यद् व्यावर्तनं स एव नियमविधिरित्युच्यते। कुसुमाञ्जल्यध्ययनावसर एव नियमविधिना साकमस्माकं प्राथमिकः परिचयः समजनि। न खलु तदानीं व्याख्यातृव्याख्यानेन मनसस्तोषः समजायत। तत् खलु व्याख्यानमतिमात्रं क्लिष्टमसम्भवप्रायमित्येवासीन्मतिरस्माकम्। तथाहि, प्राञ्चः खलु "तण्डुलनिष्पादनं तावदवघातेनापि सम्भवति, नखविदलनेनापि सम्भवति, अत एव समबलयोरनयोर्विकल्पयोः प्राप्तयोरेकतरस्य नियमः क्रियते—अवघातेनैव निष्पादनीया यज्ञीयास्तण्डुलाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेनैव तत्र संस्कार आधीयते, नखविदलननिष्पादितैस्तण्डुलैर्विहितो यागो नालमस्त्यपूर्वं सञ्जनयितुम्, विहितसंस्कारविरहितत्वात्। अत एव तादृशास्तण्डुला नोपयुज्यन्ते यागादिषु।" इति व्याचख्युः।

अत्रेदमवधेयम्। न खल्ववघात-नखविदलनयोर्विकल्पः कथमपि सम्भवति। को वाऽनुन्मत्तः सुदीर्घसमयसाध्येन नखविदलननिष्पन्नेन तण्डुलेन प्रवर्तेत स्वत एव यागाद्यनुष्ठाने। स्मर्यतां तावल्लौकिकानामाभाणकः 'अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्" इति। अत एवेदृशस्येच्छाविशेषस्यैवानुत्थानोपहतत्वात् तन्निवारणाय अजागलस्तनायमाननियमविधिकल्पनं सर्वथा न समीचीनम्।

ईदृशश्चेन्नियमविधिः प्रामाणिकस्तर्हि पद्भ्यां व्रजेदित्यत्रापि नियमः कल्प्यः, हस्ताभ्यामपि गमनस्य कथञ्चित् सम्भवात्। अत एव हस्ताभ्यां गमनस्य निवारणार्थमवश्यमत्र नियमपक्षः कक्षीकर्तव्यः। वस्तुतस्तु नैव युज्यते नियम एवंविधस्थले, पाणिभ्यां प्रचलने मनुजानां सहजप्रवृत्त्यनुपलम्भात्। एवमेव व्रीहीनवहन्तीत्यत्रापि समानन्यायेन नखविदलनस्याप्राप्तिरेव। प्रथमतस्तावन्नखेन प्रयत्नातिरेकत एकैकस्य धान्यस्य वितुषीकरणम्, ततश्च तण्डुलानां निष्पत्तिः, ततश्च तथाविधेन तण्डुलेन यज्ञार्थमन्नस्य पाकः। को वा प्रकृतिस्थ ईदृशे प्रयासलहस्रसाध्ये कर्मणि स्वत एव प्रवर्तेत। कृतं मम छात्रावस्थायामीदृशसंशयेन मनसि पदम्।

व्यतिगतो भूयान् कालः। श्रुतं मया तण्डुलनिष्पादनयन्त्राणि विनिर्मीयन्त इति। ततश्च प्रत्यक्षीक्रियन्त इदानीं सर्वत्रैव तादृशयन्त्राणि। उदूखलमपि बहोः कालात् पूर्वमन्तर्हितं वङ्गीयधान्यकण्डनव्यापारात्, काण्डन्यपि जिगमिषुरेव वर्तते। तदानीमेव विस्पष्टमेवानुभूतं न खलु वैदिको नियमविधिर्निरर्थकः, न वा पद्भ्यां व्रजेदित्यनेन तुल्ययोगक्षेमः।

अन्तरेणाप्यवघातं शक्यन्ते निष्पादयितुं तण्डुलाः—न केवलं निष्पादयितुं शक्यन्ते, समधिकं विनिष्पाद्यन्ते। ईदृशे स्थले वैदिकोऽवघातनियमो जीवानां कल्याणायैवाभिप्रवृत्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपदमेव वेदस्य सर्वज्ञत्वे यानि प्रमाणान्युपलभ्यन्ते—तेष्वेवायमन्यतमोऽवघातनियमविधिः। कामं व्याख्यातारो विशेषज्ञा आसन्, तथापि तेषां सर्वज्ञत्वाभावादुत्तरकाले तण्डुलयन्त्रसद्भावमनाकलयद्भिरेव तैर्नखविदलनेनैव वितुषीकरणेन तण्डुलनिष्पत्तिरुपवर्णिता। वेदस्तावत् सर्वज्ञवचनम्. अत एव तण्डुलयन्त्रस्येङ्गितमपि तत्र वर्तत एव। तस्य तण्डुलस्य सर्वथाऽनुपादेयत्वमपि नियमविधिना प्रतिपाद्यते।

परं को वा वैदिकं वचनमिदानीं प्रमाणीकुर्यात्! तथापि, अपि नाम 'वेरिवरि'व्याधिः पुनरपि व्रीहीनवहन्तीति नियमविधिं प्रभवेत् प्रबोधयितुम्!"*

———

रसमयो

सप्तमः परिच्छेदः।

खल्लतातमहोदयः कुत्रचिद्भ्रमणाय विनिर्गतो व्यत्तीतायां सन्ध्यायां गृहं प्रत्यावृत्तो विदितद्वितीयपत्रवृत्तान्तोऽवदत्, दृश्यतां वत्स क्षेत्र, व्यतिकरोऽयं क्रमेणैव गरीयस्त्वं भजते, काममिदानीं प्रतिरुध्यतां तावदुद्वाहः। मम मतेन पूर्णे परिवत्सरे गयां गत्वा प्रदीयतां पिण्डः—तस्या उद्वारः स्यात्। न खलु तावद् भूयान् कालोऽवशिष्यते वत्सरस्य पूर्त्यै—प्रायेण मासेनैव सर्वं सम्पन्नं स्यात्, ततश्च निष्प्रत्यूहं शुभकर्म निर्वर्तयिष्यते।

क्षेत्रमहोदयेनोक्तम् "भवतु, तदेव सम्यक्।" कन्यायाः पिता अनुनीतः,

---

* एतद्विधिविषये बाहुल्येन विचार. *Indian Historical Quarterly* पत्रिकायाश्चतुर्थे भागे चतुर्थ्यां संख्यायां ८४३-पृष्ठे विहितः संस्कृत-साहित्यपरिषत्-पत्रिका-सम्पादकेन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवाहदिवसश्च पर्यावर्तितः, प्रत्याहृतानि निमन्त्रणपत्राणि, गयाश्राद्धं परिसमाप्य परिणेष्यति क्षेत्रमहोदय इति सर्वतः प्रसृता वार्ता।

क्षेत्रमहोदयस्योपरि कस्यचन कूटपत्रव्यवहारस्य महान् भारः समर्पित आसीत्। न खलु तस्मिन्ननिर्व्यूढे प्रभवत्यसौ गयां गन्तुम्। स्वपक्षसाक्षिणस्तावद् अनुदिवसं शिक्ष्यन्ते।

व्यवहारदिवसात् पूर्वस्मिन् दिने सायं धर्माधिकरणात् प्रत्यावर्तनावसरे समधिगतं क्षेत्रमोहनमहोदयेन रसमय्यास्तृतीयं पत्रम्। तत्र चेदमन्यच्च विलिखितमासीत्—

"श्रुतं मया, गयायां मे पिण्डप्रदानार्थं गन्तुमुद्युक्तोऽसि। मोन्यसे तावत् पिण्डप्रदानेन ममोद्धारः स्यात्, तदानीं स्वच्छन्दं विवाहं करिष्यसि। गयां गच्छसि चेत् चौरस्य वेशम् आस्थाय वाष्पोयशकटं प्रविस्य तव वक्षसि छुरिकां निवेशयिष्यामि।"

न खलु क्षेत्रमहोदयस्यातः परं सञ्जातं गृहगमनम्। अधिकरणोचित-वेशेनैव मनोहरमहोदयस्य गृहं गत्वा प्रदर्शितमनेन तस्मै पत्रम्।

अनुवाच्य पत्रं मनोहरमहोदयेनोक्तम्, अहो! महतीयं विपत्; विवाह-कल्पना परित्याज्यैव भवता इति।

क्षेत्रमहोदयेनोक्तम्, पृच्छामि तावद् भद्र, अपि प्रभवत्यशरीरी आत्मा जनस्य वक्षसि छुरिकां निखनितुम्। किमत्राभिमतं भवदीयस्य थियजफी-शास्त्रस्य।

मनोहरमहोदयेन स्थूलमेकं पुस्तकं पुस्तकपेटिकातो निष्कृष्योद्घाट्योक्तम्—अत्र तावदेवमेव मतं थियजफीशास्त्रस्य। मुक्तात्मानो हि सामान्यतः शरीररहिताः। अन्तरान्तरा पुनस्त आत्मानं (Materialised) जड-देहसम्पन्नं विदधति। तेषां हि तथाविधं सामर्थ्यं येन ते पवनात् पादपात् भूमितः सन्निहितनरदेहतोऽपि समपेक्षितं पदार्थजातं समाकृष्य देहान् विनिर्माय शरीरिणः सम्पद्यन्ते। एवञ्च, तदवस्थैस्तैर्वक्षसि छुरिकाया विनि-वेशो न खलु लेशतोऽपि विस्मयाय कल्पेत। एतदपि विमृश्यताम्—यो नाम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हस्तो लेखनीं विधृत्यालं पत्रविलेखनाय, कथं वा न प्रभवेदसौ छुरिकां विधर्तुमिति।

क्षेत्रमोहनमहोदयेन कियन्तंचन कालं विचिन्त्यान्तत उक्तम्—दृश्यताम्। पत्राणीमानि कूटानि वा न वेति सम्यग् निर्णेतव्यमिदानीम्, अहं तावद् ब्रवीमि यो हि हस्तलिपिविशारदः कलिकातातः साक्ष्यप्रदानाय समागच्छति, तेनैव पत्राणीमानि परीक्ष्यन्ते चेत् सम्यक् स्यात्।

थियजफिष्टमहोदयः क्षेत्रमोहनस्य संशयेनानेन अन्तर्विरक्तः प्रकाशमवदत्—भवतु, इच्छति चेद् भवान् परीक्षयतु।

परेद्यवि प्रारब्धस्तावत् प्रादेशिकाधिकरणे कूटपत्रव्यवहारः। हस्तलिपिविशारदेन सफ्टेमारमहोदयेन साक्ष्यं दत्तम्। ततश्च दिवसावसाने अधिकरणनिरोधानन्तरम् क्षेत्रमोहनमहोदयो राजपुरुषनिवासभवनमुपसृत्य सफ्टेमारमहोदयाय भौतिकं पत्रत्रितयं प्रदत्तवान्। संवादार्थं रसमय्याः कानिचित् पुरातनानि पारमार्थिकानि पत्राण्यपि समर्पितवान्। युरोपीयेणोक्तम्, श्वः प्रातर्निर्णयफलं विज्ञापयिष्यामीति।

परेद्यवि प्रातराजकीयव्यवहाराजीवः मनोहरमहोदयेन साकं समुपस्थितो राजपुरुषभवनम्। तत्र च युरोपीयेणोक्तम्, परीक्षाधीनानि त्रीण्येव पत्राणि एकेनैव पाणिना विलिखितानि।

एतच्छ्रवणेन म्लानिमानमुपगतं क्षेत्रमहोदयस्य वदनमण्डलम्। मनोहरमहोदयेनोक्तम्, आर्य, कृपया भवदभिमतं पत्रे निवेश्य समर्पयितुमर्हति भवान्। आङ्लेन चिन्तितम्, नूनमेतद्गतो व्यवहारो भविष्यति। पुनरपि साक्ष्यदानाय समागतेन मया शुल्कं लप्स्यते। अत एव सानन्दं तेन विलिखितमपेक्षितं पत्रम्।

स्वावासप्रतिगमनसमये मनोहरमहोदयः क्षेत्रमहोदयमवदत्, पत्राणामेषां प्रतिलिपीः सफ्टेमारमहोदयस्य चाभिमतमस्मदीये थियजफिक्याल् रिभिउसमाख्ये मासिके पत्रे मुद्रणार्थं प्रेषयितुमिच्छामि। अत्र वर्तते वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवतः काऽपि विप्रतिपत्तिः। यत् खल्वस्माभिः Spirit writing इत्युच्यते, तस्यातिसमीचीनमप्रकम्प्यं प्रमाणं स्यात्।

क्षेत्रमहोदयेनोक्तम् नात्र मे विप्रतिपत्तिः।

थियजफिक्याल्रिभिउपत्रस्यानन्तरसंख्यायां मुद्रितानि सप्रशस्तिपत्राणि पत्राणि। नानादिग्देशतः थियजफिष्टप्रकाण्डाः क्षेत्रमोहनमहोदयाय पत्राणि प्रेषयितुमुपचक्रमिरे। केचन हुगलीमागत्य स्वयमेव पत्राणि प्रत्यक्षीकृत्य विस्मयविमूढा अभवन्।

अष्टमः परिच्छेदः

थियजफिष्टानां मध्ये क्षेत्रमहोदयस्य निःसीमा प्रतिपत्तिरजृम्भत। परं न खलु व्यतिकरेणानेन तेन लेशतोऽप्यलम्भि सान्त्वनम्। पत्राणि चेत् कूटानीति प्रमाणितमभविष्यत् तर्हि निर्वर्त्य विवाहविधिं स निर्वृतोऽभविष्यत्। नाषि त्रासेन गयां गत्वा पिण्डदानमप्यनुष्ठातुं प्राभवत्। मन्ये तस्य भागधेयं विवाहपरिपन्थि।

समागतो मधुमासः। प्रवहति मलयानिलः। होलाकामहोत्सवेन निरुद्धं धर्माधिकरणम्। क्षेत्रमोहनः स्वभवने अवस्थायाऽऽत्मीयं दुरदृष्टं चिन्तयन्नास्ते। अवसरे चास्मिन् केनचिदागत्योक्तम्—हालिसहरे त्वदीये श्वशुरगृहे गरीयसी विपदुपनता। होलाकामहोत्सवेऽग्निक्रीडा-प्रदर्शनावसरे 'वोम'स्फुटनेन भवदीयः कनिष्ठ-श्यालकः सुबोधः विशेषत-आहत इति। स च हुगलीस्थारोग्यशालामानीत इति।

एतदाकर्ण्य न खलु क्षेत्रमहोदयः प्रबभूवागत्वा स्थातुम्। तदात्व एव भाटकित्वा शकटमारोग्यशालाभिमुखं धावितवान्। गत्वा चापश्यत् बाल-स्तावद्विषमावस्थायां वर्तते। शय्याया अधस्ताद् भूमावुपविष्टा विधवा विनोदिनी रोदिति। क्षेत्रमोहनं दृष्ट्वा समधिकमेव रोदितुमसौ प्रचक्रमे।

समग्रमेव दिवसं प्रयुक्तं भेषजम्, विहिता च शुश्रूषा। अनुसायमुक्तं भिषग्भिः, नेदानीं वर्तते जीवितशङ्केति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षेत्रमोहनः श्यालिकामवदत्, भर्तृदारिके, समागता सन्ध्या, गृहमिदानीं गन्तव्यम्।

विनोदिन्याऽभिहितम्—न खलु सुबोधं विहायालमस्मि गृहं गन्तुम्।

विदितवृत्तान्तैरारोग्यशालीयचिकित्सकैरुक्तम्, गन्तव्यमेव भवत्या गृहम्। न खल्वत्र रात्रावस्थातुं प्रभविष्यसि। श्वः प्रातः पुनरेवात्रागमिष्यति भवती। न खल्विदानीं लेशतोऽपि विद्यते भयम्। विपत् तावद् व्यतीतैव। सेवाशुश्रूषादिकमस्माभिरेव विधास्यते। तदर्थं न मनागपि चिन्ता कार्या भवत्या। गच्छतु भवती गृहम्।

बहुशो बोधिता विनोदिनी तदेव प्रतिपन्ना। अवदच्च क्षेत्रमोहनम्, त्वमेव तर्हि मां हालिसहरं प्रापय। रात्रौ तावत् तत्रावस्थास्ये। व्युष्टायामेव रजन्यां पुनरपि त्वयाऽहमत्राऽऽनेयेति।

क्षेत्रमोहनेन तथैव कृतम्। हालिसहर एव व्यतिक्रान्ता विभावरी।

प्रत्यूषसि समुत्थाय स्वेनैव हस्तेन तमाखुं प्रगुणीकृत्य यावद्धूमपानमुपक्रमते तावद् गृहाद् बहिर्महान् कलकलोऽश्रूयत। ससम्भ्रमं धूमपानयन्त्रं भूमावावस्थाप्य बहिर्निष्क्रम्यापश्यत् लोहितोष्णीषैः परिवेष्टितं भवनम्। आरक्षिकपुरुषाध्यक्षः स्वयमेव गृहद्वारि तुरगारूढस्तिष्ठति। सार्धं तेन केचनोपाध्यक्षाः प्रधानरक्षिपुरुषाश्च विलसन्ति।

परिचितचरोऽयमिति क्षेत्रमहोदयोऽवनतपूर्वकायस्तमभिवादितवान। धूमवर्तिकाविभूषितवदनेन चाध्यक्षमहोदयेनोक्तम्—हेल्लो मुखटियार, ट्वमट्ट किं खरोटि?

क्षेत्रमहोदयेनोक्तम्, आर्य, इदं तावन्मदीयं श्वशुरगृहम्।

"एटट् टव श्वशुरगृहं वर्टटे। उट्टम् हामि टोमार श्वशुरवाडी सार्च खडिवे।" (अहं ते श्वशुरगृहं निरीक्षिष्यसि)।

"किमिति स्वामिन्।"

"अट्ट स्फुटनास्त्राणि निर्मीटे वा न वा मया द्रक्ष्यटि। एटट् सार्च ओयारेन्ट् असूटि।" इत्युक्त्वा सार्च ओयारेन्ट क्षेत्रमहोदयस्य हस्ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रदत्तवान्। क्षेत्रमहोदयोऽपि तद् आवर्त्य पर्यावर्त्य निरीक्ष्य तस्मै प्रत्यर्पितवान्; उक्तवांश्च, आर्य एवाधिकारी। प्रभवत्यार्यः सर्वं विधातुम्।

अध्यक्षमहोदयेनोक्तम्, ष्ट्रियोऽन्यत्र निगूढा रक्ष्यन्ताम्।

प्रविष्टा भवनाभ्यन्तरं रक्षिणः। स्त्रीषु तावद्विनोदिन्येकैव। न खलु सा रक्षिभयेन कुत्रापि निलयनमावश्यकमाकलयत्। अक्षमालां पाणौ गृहीत्वा प्राङ्गने तुलसीषादपमूले समुपविष्टा।

प्रवृत्तमन्वेषणम्। नालिकास्त्राणि, आग्नेयचूर्णानि, डिनामाइट्, स्फुटनास्त्राणि, "वर्त्तमानरणनीतिः" "युगान्तरम्" भगवद्गीता, "देशेर कथा" "रिभिउ अव् रिभिउज्ज्' प्रभृति किमपि नाधिगतम्। अधिगतं तावत् हिन्दुसत्कर्ममाला, गुप्तप्रेसपञ्जिका, काशीदासविरचितं महाभारतम्, छिन्नं चाख्यायिकापुस्तकमेकम्। कस्यापि देशनायकस्य किमपि चित्रं न प्रादुष्कृतम्। प्रादुष्कृतानि तावत्—कतिचित् कालीघाटस्थकालीमूर्तिचित्राणि, एकं च आर्टस्टुडियोतः प्रकाशितं गणपतिचित्रम्; भूस्वामिनः कतिचित् शुल्कप्राप्तिस्वीकारपत्राणि धूलिमलिनश्च पत्राधार एकः विनिर्गतानि। विनोदिन्याः पेटिकातो विनिर्गतानि पत्रस्तूपमेकम् कतिचन च विलिखितबाह्यनामानि पत्रकोषाणि।

सर्वाणीमानि प्राङ्गने समानीय स्तूपीकृतानि। रक्षिप्रवेकः पत्रादीनां सूचिनिर्माणे व्यापृतः। क्षेत्रमोहनोऽपि तत्रैवोपविष्टः। सोऽपश्यत, सर्वेष्वपि पत्रकोषेषु तस्यैव नाम विलिखितमासीत, हस्ताक्षराणि च रसमय्या एव! अध्यक्षमहोदयमनुमान्य क्षेत्रमोहनमहाशयः पत्राणि पत्रकोषांश्च परीक्षितुं प्रवृत्तः। आसन्नविंशानि पत्राण्यासन, सर्वाण्येव सान्द्रनीलवर्णमस्या रसमय्या हस्ताक्षरेण विलिखितानि। कतिचिच्च पत्राण्युद्धाट्य वाचितान्यपि क्षेत्रमहोदयेन। तांस्तानवस्थाविशेषाननुमाय विलिखितान्येतानि पत्राणि। केषुचिच्च वटवृक्षे निवासस्य समुल्लेखोऽपि वर्तते; एकत्र च लिखितम् "गयायां दत्तः पिण्ड इति नालमस्मि तवानिष्टमाचरितुमिति मैवं मंस्थाः। इदानीमपि रसीब्राह्मणी प्रभवति मोट्टयितुं ते स्कन्धम्" इति। अपरस्मिन्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिखितम् "श्रुतं मया विवाहदिनमपि निर्धारितम्। इदानीमपि सावधानो भव।" अन्यस्मिन् लिखितम्, "श्वस्ते विवाहः। इयन्मया निषिद्धं तथापि कथमपि न श्रुतं त्वया। भवतु कौतुकगृहे प्रज्वाल्यानलं त्वां त्वदीयवधूं च धक्ष्यामि" इत्यादि।

तदानीमखिलं वृत्तान्तजातं दिवसालोक इव विस्पष्टं सञ्जातं क्षेत्रमोहनस्य।

विनोदिनी तुलसीमूले समुपविष्टा सर्वं निरीक्षते स्म। क्षेत्रमोहनेनोक्तम्, भर्तृदारिके! किमिदं सर्वम्?

भर्तृदारिका तावत् स्वमनसाऽक्षमालां जपितुं प्रवृत्ता।

——

मेघनादवधम्

षोडशः सर्गः

[निबन्धकः—श्रीनित्यगोपालविद्याविनोदशर्मा]

घोरं सिंहरवं श्रुत्वा शशङ्के वीरकेशरी।
चकम्पे च वनं सर्वं परितो मर्मरायितम् ॥१॥
हर्यक्ष आययौ क्षिप्रं दन्तान् दद्भिर्भृशं दशन।
रक्ताक्षोऽसकृदास्फाल्य पुच्छं कोपातिपीवरम् ॥२॥
रामजयोऽस्त्विति ध्वानैः खड्गमुन्मुक्तवान् रथी।
मायासिंहः पलायिष्ट वीक्ष्याग्निं तामसं यथा ॥३॥
मन्दं मन्दं ययौ धीमान् घनैश्चन्द्रः समावृतः।
वायुर्ववौ सहुङ्कारं स्वनाध्मातदिगन्तरम् ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षणप्रभाऽस्फुरद् व्योम्नि सुज्ज्वले निखिलां भुवम् ।
क्षणमुद्भास्य तेजोभिस्तदैव तमसाऽवृणोत् ॥५॥
अजस्रमपतद् वज्रं भूतले कड्कडायितम् ।
प्रभञ्जनो बभञ्जानोकहान् समूलपाटितान् ॥६॥
ददाह काननं दावो लङ्काऽकम्पत निर्भरम् ।
जगर्ज्ज जलधिर्दूरे लक्षं कम्बूनि दध्वनुः ॥७॥
सघर्घरमभूद् घोरचापटङ्कारडम्बरः ।
दृष्ट्वा श्रुत्वा च सर्वं स तस्थाविवाचलोऽचलः॥८॥
दावाग्निर्निरवात् सद्यो वात्या शान्ति समागमत् ।
भूयः समुदिते चन्द्रे व्योम्नि ताराः प्रकाशिताः ॥९॥
प्रसूनकुन्तला पृथ्वी जहास हर्षविह्वला ।
सौरभेण दिशः पूर्णा ववौ मन्दं समीरणः ॥१०॥
प्रतस्थे सुमतिस्तत्र शनैः शनैः सुविस्मितम् ।
पूरितश्चाभवत् सर्वं काननं मधुरैः स्वरैः ॥११॥
स्त्रीकण्ठसम्भवं गीतं वीणावेणुस्वराश्रितम् ।
चेतोविमोहनं जातं संपूरितदिगन्तरम् ॥१२॥
लक्ष्मणः पुरतोऽद्राक्षीत् पुष्पितायां वनावनौ ।
कान्तास्तारा यथा व्योम्नः पतिता भूतले स्थिताः ॥१३॥
काश्चित् सरोवरे स्वच्छेऽवगाहन्त कलेवरम् ।
निशीव कौमुदी तीरे स्थापितात्मवरांशुकम् ॥१४॥
वपुस्तासां सुललितं विरराजामले जले ।
मानसे सरसि स्वर्णसरसीरुहसन्निभम् ॥१५॥
आचिन्वन् कुसुमश्चान्याः काश्चिदलङ्कृतालकाः ।
दान्तकोलम्बकेऽराजत्तन्त्रीः सङ्गीतवल्लरी ॥१६॥
नृत्यन्ति सुखिताः काश्चिन्मध्ये पीनपयोधरौ ।
स्रग्विणौ चलतश्चालं नूपुरौ रणतः पदोः ॥१७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पीने नितम्बफलके हेमनिर्मितमेखला ।
रारस्यते सुललितं हंसीव द्वीपमूर्द्धनि ॥१८॥
म्रियन्ते जन्मिनो दंशात् फणिन्याः किन्तु दर्शनात् ।
आसां वेण्या मणीमय्याः कामज्वालास्तुदन्त्यमून् ॥१९॥
यमदूतमहिं दृष्ट्वा भीता यान्ति समन्ततः ।
को न वष्टि गले बन्धुमिमां शूलीव भोगिनीम् ॥२०॥
मधुमित्राणि गायन्ति रसालेषु सुपञ्चमम् ।
क्रीडन्ति जलयन्त्राणि मुक्तादभ्रजलानि च ॥२१॥
कौतुकीव जगत्प्राणः प्रसूनागारकोषतः ।
हरन् सौरभरत्नानि वात्युल्लासविचञ्चलः ॥२२॥
तूर्णं वामाः समावेष्ट्य परन्तपमगासिषुः ।
स्वागतं रघुवंशेन्दो देव्यो न राक्षसस्त्रियः ॥२३॥
वासो नो नन्दनारण्ये सुवर्णमयसद्मनि ।
सुधां पिबाम आमोदविह्वला मर्त्यदुर्लभाम् ॥२४॥
सर्वर्त्तुमधुरुद्भाति यौवनोद्यान उत्थिते ।
उरोजकमले फुल्लेऽधरः सरसकोमलः ॥२५॥
भवन्तं वृणुमो देव्यः पतित्वेन व्रजाऽऽलयम् ।
अस्माकं प्रियवीरेन्द्र पूरयाऽऽशु मनोरथम् ॥२६॥
तपस्यन्ति नरास्तीव्रं यत्सुखार्थं युगे युगे ।
तत् समग्रं प्रदास्यामस्तुभ्यं सर्वगुणाकर ॥२७॥
रोगशोकादयः कीटाः कृन्तन्ति यत्र नित्यशः ।
जीवपुष्पाणि भूलोके सन्ति ते नैव नो दिवि ॥२८॥
शूरः कृताञ्जलिः प्राह क्षमध्वं देवयोषितः ।
ममाग्रजो रथिश्रेष्ठो राघवो भुवि विश्रुतः ॥२९॥
नाम्ना सीता प्रिया तस्य हृतैका सा वनान्तरात् ।
रावणेनोद्धरिष्यामस्तां हत्वा तं रणे रिपुम् ॥३०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिज्ञाब्धिं तरीष्यामो वरं दत्त सुराङ्गनाः ।
लक्षणं हि महत्त्वस्य प्रतिज्ञासिन्धुलङ्घनम् ॥३१॥
समुत्तीर्णप्रतिज्ञाब्धिर्मानवः क्षितिभूषणः ।
रत्नगर्भा क्षितेर्नाम तेन याति यथार्थताम् ॥३२॥
जन्म मे मानवे वंशे यूयं मे जननीसमाः ।
इत्युक्त्वोत्क्षिप्तनयनः सोऽपश्यद् विजनं वनम् ॥३३॥
स्वप्नदृष्टा यथा रामा बुद्बुदा वा विनश्वराः ।
लीना निमेषमात्रेण मायानार्यस्तडिन्निभाः ॥३४॥
शरदम्बुधरच्छाया गत्वरेऽस्मिन् भुवस्तले ।
उन्मज्जन्ति निमज्जन्ति जीवाः सिन्धोरिवोर्मयः ॥३५॥
बीजाद् वृक्षस्तथा वृक्षाद् बीजमुत्पद्यते यथा ।
ज्ञेयस्तथा पितापुत्रक्रमो मायाविजृम्भितः ॥३६॥
शयानोऽज्ञानपर्यङ्के मोहनिद्राविचेतनः ।
पश्यन् स्वप्नान् कथं जीवो मायातत्त्वं बुभुत्सते ॥३७॥
जाग्रतामपि या निद्रा पश्यतामपि याऽन्धता ।
ज्ञानिनामपि या भ्रान्तिः सा माया केन बुध्यते ॥३८॥
यदि मूकः पठेद् वेदान् पङ्गुर्वा तरेदम्बुधिम् ।
मृतश्चेत् प्राप्नुयात् प्राणान् माया वेद्या न कस्यचित् ॥३९॥
हेमसोपानसम्पन्नसरस्तीरेऽथ राजितम् ।
क्षणैः कतिपयैर्वीरो ददर्श चण्डिकालयम् ॥४०॥
तत्रैक्षत बलेर्दीपान् दीप्यमानान् सहस्रशः ।
पीठाधः पुष्पवैचित्र्यं गुञ्जन्मधुव्रताकुलम् ॥४१॥
शङ्खघण्टाकांस्यवाद्यं श्रूयते सजलो घटः ।
शोभते धूपगन्धेन दिश आमोदिता दश ॥४२॥
वगाह्य सलिलं वीरः स्नात्वा चित्वोत्पलानि च ।
प्रविश्य चण्डिकासद्माऽऽनच्च देवीं यथाविधि ॥४३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टाङ्गी प्रणतः प्राह प्रसीद किङ्करे शिवे ।
हन्तास्मि कृपया रक्षःशूरं त्वां प्रार्थये वरम् ॥४४॥
अन्तर्यामिनि जानासि नृणां मानसवासनाः ।
दुर्बला रसना नैताः कदापि रसितुं क्षमा ॥४५॥
सर्वशक्तिमयि देवि शरणागतवत्सले ।
परया कृपया साध्वि पूरयास्मन्मनोरथम् ॥४६॥
जगर्ज्जाऽऽराद् वारिवाहः कृतत्रा लङ्काऽशनिध्वनेः ।
सद्योऽकम्पत भूकम्पाद् यथा स वनमन्दिरा ॥४७॥
पुरो ददर्श सौमित्रिः स्वर्णसिंहासनस्थिताम् ।
महामायां तेजोराशिलुप्तदृष्टिक्रियः क्षणम् ॥४८॥
जहास जननी हास्यप्रभाभिर्विद्रुतं तमः ।
चक्षुर्वीरोऽदधाद्दिव्यं सुधीर्व्योम्नि चमत्कृतः ॥४९॥
महादेव्यब्रवीद् वत्स सुप्रसन्नास्तवोपरि ।
देवा देव्यस्तथैवाहं शुद्धभक्तिवशीकृताः । ५०॥
प्रेरितं दवमस्त्रं त इन्द्रेणाहमुपस्थिता ।
साधयितुं स्वयं कार्यं व्योमकेशेन नोदिता ॥५१॥
गृहन् देवायुधमिदं सार्द्धं विभीषणेन च ।
नगरं गच्छ यत्राऽऽस्ते रावणिर्यज्ञदीक्षितः ॥५२॥
निकुम्भिलेष्टिभवने यजतेऽग्निमतर्कितम् ।
व्याघ्र इव तमाक्रम्य व्यापादय निशाचरम् ॥५३॥
अदृश्यौ मद्वरेण द्वौ करिष्यामि निरन्तरम् ।
पिधान इव निस्त्रिंशं मायाभिरावृणोम्यहम् ॥५४॥
मुहूर्त्तेऽतिशुभे गर्भे सुमित्राऽधाद् भवादृशम् ।
वीररत्नं सुतं वाणी व्योम्नोऽभूत् पूर्णभूतला ॥५५॥
नत्वा शूरमणिर्मायापादपद्मे द्रुतं ययौ ।
यत्र स्थितो रामचन्द्रोऽकूजन् विहङ्गमाः सुखम् ॥५६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तूर्यमघ्नन् यन्त्रिसंघा नगरं परितः शुभैः ।
निस्वनैरभवत् पुष्पवृष्टिर्लक्ष्मणमूर्धनि ॥५७॥
यशोगीतिभिराकीर्णं भवेत्तव त्रिविष्टपम् ।
वच्मि त्वां सुरदुःसाध्यं कृतं कर्म त्वयाऽधुना ॥८॥
अमरस्त्वमभूरद्यावनौ वीरेन्द्र लक्ष्मण ।
उत्त्वेयद् जोषमापन्ना भारती प्रीतिनिर्भरा ॥५९॥
पुष्पिते कुञ्जभवने गुञ्जद्भृङ्गालिमञ्जुले ।
सौरभाभृतदिग्भागे ललितं विहगा जगुः ॥६०॥
यत्रेन्द्रजिद् बली रेजे कौसुमे शयने गृहे ।
हैमे तत्र सुखाधारे कूजनध्वनिराविशत् ॥६१॥
वीरनागो जजागार गीतैः कुञ्जवनोत्थितैः ।
प्रमीलापाणिपद्मं स घृत्वोवाच मधुस्वरम् ॥६२॥
मूलेऽब्जिन्याः श्रुतेर्भृङ्गः प्रेमालापमिवाक्षिणी ।
उन्मील्याह स तां नेत्रे उन्मील्य प्रेयसि शृणु ।
उत्तिष्ठाऽऽनन्दचिन्मूर्त्ते खगैः सम्बोध्यसे शृणु ।
सूर्यकान्तमणिप्रायाः प्राणा मे त्वं रविच्छविः ॥६४॥
त्वयि मुद्रितनेत्रायामहं म्लानच्छविर्भृशम् ।
सौभाग्यपादपे त्वं मे पक्वं रत्नफलं वरम् ॥६५॥
तारका नेत्रयोस्त्वं मे हृदि मन्दिर इन्दिरा ।
उत्तिष्ठ पश्य पुष्पाणि कथं पुष्प्यन्ति कानने ॥६६॥
उत्तस्थौ चकिता वामा गोप्यो वेणुरवैर्यथा ।
त्रपयाऽङ्गान्यपिदधे सत्वरं चारुभाषिणी ॥६७॥
युवराजः पुनः प्राह तमिस्राऽऽपगताऽधुना ।
नान्यथा त्वं कमलिनि भवेर्विकशितेदृशी ॥६८॥
स्निग्धे मे नयने जाते गच्छ नन्तुं प्रसूपदे ।
ततो यक्ष्यामहे वैश्वानरं देवं वरप्रदम् ॥६९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततप्रसादोर्ज्जितो भूत्वा वज्रकल्पशरासनैः ।
रामस्य समराकाङ्क्षां शमयिष्याम्यसंशयम् ॥७०।
सन्नद्धौ रावणवधूसुतौ तुल्यपराक्रमौ ।
दृष्ट्वा तेजस्विनौ तारारुणौ यातावदृश्यताम् ॥७१।
लेढुं परिमलं भृङ्गा अधावन् सकला दिशः ।
कोकिला विटपेऽकूजल्ँलितं पञ्चमस्वरम् ॥७२॥
ध्वनितं रक्षसां वाद्यमासन् रक्षिण आनताः ।
मेघनाद जयेत्युच्चैर्नादो गगनमुदयायौ ॥७३॥
रत्नमय्यां शिविकायामासीनौ दम्पती सुखम् ।
निन्युर्यानं वाहनानि मन्दोदर्याः सुमन्दिरम् ॥७४।
वज्रमरकतैर्दन्तैर्दन्तिनाश्च विनिर्मितम् ।
मन्दिरं सीमलेखेव विश्वस्रष्टुर्बभौ कृतेः ॥७६॥
प्रहरणभुजा भ्रेमुर्द्वारे प्रहरिणीगणाः ।
तासां काश्चिद्वयारूढा अपरा भूतलस्थिताः ॥७६॥
दीपाली सर्वतस्ताराकारा जज्वाल मारुतः ।
वासन्तोऽयुतपुष्पाणां ववौ गन्धवहः शनैः ॥७७॥
वीणातन्त्रीसुझङ्कारो वायुवाहितसुस्वरः ।
मनोहर इव स्वप्ने प्रतिदध्वान मन्दिरम् ॥७८॥
इन्दुमुख्या समं वीरः प्रविवेश प्रमीलया ।
तत् स्वर्णभवनं रक्षोमहिष्यास्त्रिजटां ततः ॥७६॥
वक्ति स्म वीरहर्यक्षस्त्रिजटे शृणु मे वचः ।
यज्ञं निकुम्भिलागारे समाधास्ये यथाविधि ॥८०॥
याहि वार्त्तां प्रदेह्यस्यै द्वारे स्तो वन्दनार्थिनौ ।
पुत्रः पुत्रवधूश्चोभौ लङ्केश्वरि तव प्रियौ ॥८१॥
साष्टाङ्गं प्रणिपत्याऽऽह त्रिजटा वीरसुन्दरम् ।
कुमारस्मिन् क्षणेऽध्यास्ते राज्ञी शङ्करमन्दिरम् ॥८२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तव कल्याणकामा सा विनिद्राहारसंयता ।
आशुतोषं तोषयति पूजया वीरपुत्रिका ॥८३॥
त्वादृशो वीरपुत्रः कस्तादृशो का च वीरसूः ।
मातेत्युक्त्वा गता दूती सौदामनीत्वरान्विता ॥८४॥
गायिकाली जगौ यन्त्रस्वरसङ्गतिपूर्वकम् ।
पश्य हैमवति पुत्रं कार्त्तिकेयं सशक्तिकम् ॥८५॥
देवसेनान्वितं द्वारे त्विषा देदीप्यमानया ।
वध्वा साकं विराजन्तमकलङ्कविधूपमम् ॥८६॥
सौभाग्यशालिनी देवी त्रैलोक्यविजयी सुतः ।
जगद्विमोहिनी कान्ता त्रयी रत्नस्य सङ्गता ॥८७॥
शिवालयान्निर्गतां तां जननीं दम्पती पदोः ।
साष्टाङ्गं नेमतुर्माता चुम्बन्ती शिर आरुदत् ।८८॥
सौरभस्येव कुसुमं शुक्तिर्मुक्ताजनिर्यथा ।
रत्नानामाकर इव प्रेम्ण उत्सः प्रसूमनः ॥८९॥
शारदेन्दुर्यथा पुत्रो वधूः शारदकौमुदी ।
ताराकिरीटिनी रात्रिः स्वयं रक्षःकुलेश्वरी ॥९०॥
नयनाम्बुतुषाराणां धारा मुक्ताफलश्रियः ।
कपोलपर्णगलिता लेभिरे सुषमां पराम् ॥९१॥
वीरर्षभोऽवदद्वि देह्याशिषोऽमृतोक्षिताः ।
पूर्णयज्ञो हनिष्यामि राघवं समरे रिपुम् ॥९२॥
मातः पदरजो देहि भ्रातुर्मे घातकं शिशोः ।
नेष्ये यमालयं दुष्टमीक्षे को मां निषेधयेत् ॥९३॥
विधास्ये ते प्रसादेन लङ्कां कण्टकवर्जिताम् ।
शितैः शरशतैर्बद्ध्वानेष्यामि तं विभीषणम् ॥९४॥
राजद्रुहमसिष्यामि सुग्रीवमङ्गदं तथा ।
सागरस्यातलस्पर्शजले देव्यनुमन्यताम् ॥९५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्त्राञ्चलेन नेत्राम्बु विमृज्य प्राह गद्गदम् ।
राज्ञी वत्स कथं दास्येऽनुमतिन्ते युयुत्सवे ॥९६॥
हृदाकाशं तमश्छन्नं कृत्वा पूर्णशशी मम ।
कथं यास्यसि संग्रामं तुमुलं वीरसङ्कुलम ॥९७॥
यत्र वीरो रघुशूरः कालाहिकल्पलक्ष्मणः ।
विभीषणः कृपाहीनो घ्नन्ति वीरान् महाबलान् ॥९८॥
प्रमत्तो राज्यलोभेन बन्धून् हन्ति विभीषणः ।
क्षुत्क्षाम इव शार्दूलः स्वापत्यानि निरङ्कुशम् ॥९९॥
कुक्षावयं धृतः पापः श्वश्रा मे समयेऽशुभे ।
नष्टा स्वर्णपुरी लङ्का यस्य दुर्मन्त्रणादिभिः ॥१००॥
विहस्याह बली मातः कथं त्रस्यसि राघवात् ।
सविभीषणसौमित्रेरल्पस्माद् वा द्विषद्बलात् ॥१०१॥
पित्रादिष्टोऽजयं तौ द्वौ द्विरहं तुमुले रणे ।
आग्नेयबाणनिक्षेपैस्त्वदाशीर्वर्मरक्षितः ॥१०२॥
त्वदङ्घ्रि रेणुमाहात्म्याद् देवदैत्यनरैः समम् ।
सर्वत्र विजयी युद्धे पुत्रस्ते पादसेवकः ॥१०३॥
वेत्ति विभीषणो देवि तव पुत्रपराक्रमम् ।
देवैः सह सहस्राक्षो नागेशश्च रसातले ॥१०४॥
हेतुना केन भीतासि देवि जननि कथ्यताम् ।
रामं तृणाय मन्येऽहं त्वदाशीर्बलबृंहितः ॥१०५॥
चुम्बन्ती सादरं शीर्षं महिषी पुनराह तम् ।
मायावी मानवो वत्स वैदेहीहृदयेश्वरः ॥१०६॥
सहाया देवतास्तस्य नागपाशेन संयतौ ।
कथं त्वयाऽन्यथा मुक्तौ हतौ वा जीवितौ कथम् ॥१०७॥
रजन्यां भीषणे युद्धे सर्वमेतन्मया नहि ।
बोद्धुं शक्यं कदा केन दैवी माया विलङ्घिता ॥१०८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुतं मया तदादेशाच्छिला तरति वारिणि ।
निर्वाप्यग्निर्वृष्टिरेति न रामो मानवो भवेत् ॥१०६॥
साकं तेन कथं तात नियोक्ष्ये त्वां महाहवे ।
धातः सूर्पणखा मातुः कुतो नाम्रियतोदरे ॥११०॥
एतदाख्याय साऽरोदीत् तूष्णीमिन्द्रजिदब्रवीत् ।
पूर्ववृत्तं स्मरन्त्यम्ब विलापं कुरुषे वृथा ॥१११॥
तिष्ठत्यरिः पुरद्वारि कथं भुञ्जे सुखं प्रसु ।
कः शक्नुयाद् गृहे स्वप्तुं वह्निज्वालासमाकुले ॥११२॥
विश्रुतं राक्षसकुलं देवदैत्यादिभीषणम् ।
कलङ्कयिष्यति कुलं राम इन्द्रजितः कथम् ॥११३॥
मयो मातामह इदं श्रुत्वा किं वा वदिष्यति ।
मातुलश्च तथा विश्वं धिक् करिष्यति माऽधमम् ॥११४॥
आकर्णय वने हृष्टाः कूजन्ति विहगालयः ।
प्रभाता शर्वरी देहि निदेशं समराय मे ॥११५॥
इष्ट्वेष्टदेवं दुर्द्धर्षरक्षोबलसमन्वितः ।
समरं सम्प्रवेक्ष्यामि प्रविशाम्ब निजालयम् ॥११६॥
सत्वरं प्रतिसङ्गम्य पूजिष्यामि सभक्तिकम् ।
पदराजीवयुग्मं ते जयलक्ष्म्याऽभिनन्दितः ॥११७॥
प्राप्नवं जनकादेशं त्वमप्याज्ञां विधेहि मे ।
स्पर्द्धिष्यते क इह मां त्वदाशीर्वरवर्द्धितम् ॥११८॥
मृष्ट्वाऽञ्चलेन नेत्राम्बु प्रोवाच राक्षसेश्वरी ।
यास्यन्तं त्वां विरूपाक्षोऽवतु भीमे महारणे ॥११९॥
भिक्षामिमां पदे तस्य याचेऽहं वच्मि किं पुनः ।
हीनतारकनेत्राऽहं तिष्ठामि त्वां गृहे विना ॥१२०॥
प्रमीलां रुदती प्राह देवी तिष्ठ मया सह ।
उद्भास्य भवनं कृष्णपक्षे तारेव भूतलम् ॥१२१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्यर्च्य जननीपादौ महाबाहुर्ययौ गृहात् ।
रुदती स्नुषया सार्कं देवी वेश्म विवेश सा ॥१२२॥
विहाय शिबिकां पद्भ्यां युवराजः शनैः शनैः ।
अभ्ययात् कानने यज्ञशालां पुष्पास्तृताध्वना ॥१२३॥
नूपुरध्वनिमश्रौषीत् पश्चादतर्कितं रथी ।
श्रुतपूर्वं प्रियापादस्वनं यद्वद् प्रियश्रुतौ ॥१२४॥
हसित्वा वीरबृन्दिष्ठो बाहुपाशेन सुन्दरीम् ।
प्रमीलां वेष्टयामास विकचेन्दीवराननाम् ॥१२५॥
कान्तोवाच वल्लभाऽहं यज्ञं द्रष्टुं सह त्वया ।
यास्यामीति विजानत्या श्वश्वा रुद्धा गृहान्तरम् ॥१२६॥
स्थातुं तत्राप्यशक्ताऽहमदृष्ट्वा त्वत्पदाम्बुजम् ।
सौरकरोज्ज्वला चान्द्री कलेवाहं त्वयोज्ज्वला ॥१२७॥
भो रक्षोऽन्वयतिग्मांशो त्वां विना निखिलं जगत् ।
स्याद् गाढतमसाच्छन्नं सत्यमेतद् ब्रवीम्यहम् ॥१२८॥
मुक्तामण्डितवक्षोजोपरि वारि दृशोऽपतत् ।
मुक्ताशुभ्रतरं पद्मपर्णोद्भासितुषारवत् ॥१२९॥
प्रत्युवाच वीरसिंहः प्रत्यायास्यामि सत्वरम् ।
व्यापाद्य राघवं युद्धे लङ्काश्रीः प्रतिगम्यताम् ॥१३०॥
सुधांशोः पुरतः साध्वि रोहिणी दीप्यते भृशम् ।
नयने असृजत् किं ते मोक्तुमश्रु चिरं विधिः ॥१३१॥
दीप्तिमन्दिरमेतत् ते केनाच्छन्नं घनाघनैः ।
त्वां मत्वोषामिता रात्रिरनुमोदस्व यानि माम् ॥१३२॥
हित्वा रतिं भङ्क्तुकामो ध्यानं शम्भोर्यथात्मभूः ।
तथाऽगच्छद् बली मेघनादस्त्यक्त्वा सतीं प्रियाम् ॥१३३॥
कुलमकृतसंयात्रः पुष्पधन्वेव कुक्षणे ।
प्रतस्थे मेघनादोऽपि राक्षसाशालताङ्कुरः ॥१३४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वारं हि भवितव्यस्य रोद्धुं कः शक्नुयादिह ।
प्रमीला व्यलपत् साध्वी गते कामे रतिर्यथा ॥१३५॥
राक्षसान्वयहर्यक्षं दृष्ट्वा वीक्षेत कस्तव ।
कृशां कटिमतो दुःखात्त्वच्चाप्यटसि काननम् ॥१३६॥
क्षणेन क्रियताऽश्रूणि मृष्ट्वा रक्षोवधूः पतिम् ।
दूरे दृष्ट्वाह मधुरं समाहूयैकहस्तिनम् ॥१३७॥
बंभ्रम्यसे वने केन वेद्मि दन्तिन् विलज्जितः ।
गतिं वीक्ष्य कथं मानिन् वदनं दर्शयिष्यसि ॥१३८॥
हंसि त्वं वारणं किन्तु वीरसिंहोऽस्त्रपातनैः ।
इन्द्रमैरावतपतिं प्रत्यङ्मुखयति क्रुधा ॥१३९॥
उक्त्वेयदारुदत् साध्वी वीक्ष्याऽऽकाशं कृताञ्जलिः ।
दुर्गे लङ्कां रक्ष दासी प्रमीला ते कृपामयि ॥१४०॥
वीरवर्यं रक्ष युद्धे करुणावर्मसंवृतम् ।
त्वदाश्रितलताप्राणः प्राणित्यस्मिन्ननोकहे ॥१४१॥
पश्य स्पृशेन्न परशुरिमं किं वाधिकं ब्रुवे ।
अन्तर्यामिनि काऽन्या वा रक्षेदेनं त्वया विना ॥१४२॥
यथोह्यते समीरेण सौरभं राजमन्दिरम् ।
कैलाससदनं निन्ये व्योम्ना ततप्रार्थना तथा ॥१४३॥
इन्द्रो भीतश्चलिततनुको वीक्ष्य तं वायुराज-
स्तामानैषीद्ध्ततरजवो दूरमुत्पातयन् सः ।
मृष्ट्वा नेत्रे विजनभवनं साप तीव्राधिदूना
श्यामं हित्वा तपनतनयारोधसीव स्वजन्यः ॥१४४॥

इति श्रीमेघनादवधे महाकाव्य उद्योगो नाम
षोडशः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवभाषा-देवनागराक्षरयोरुत्पत्तिः

(पूर्वतोऽनुवृत्ता)

[निबन्धकः—श्रीद्विजेन्द्रनाथ-गुह्यचतुर्धुरीणः ।]

इह खलु सर्वासां भाषाणां संस्कृतभाषा प्राचीनतमा तथा शीर्षस्थानीया अभवत् इति भूयसां विदुषां मतम्। केषाञ्चिन्मते सा निखिलानां भाषाणां जननी ।

कश्चित् शार्मण्यदेशीयो गुणदोषविवेककुशलः सूरिः भणत्येव—"Sanskrit is the mother of Greek, Latin and German languages, and that it has no other relation to them." (Quoted in *Hindu Superiority*, p. 173.) अन्येऽपि च—"Dr. Ballantyne is inclined to support the theory that Sanskrit is the mother of all Aryan (Indo-European) languages." (Ibid., p. 172).

Mons. Dubois महोदयस्यापि मते—"Sanskrit is the original source of all the European languages of the present day." (*Bible in India*).

ग्रीक्भाषा संस्कृतभाषायास्तनयेति W. Scott Elliot महोदयेनोच्यते—"Greek is the offspring of Sanskrit." (*Historians of India*). "आटलान्टिष्" पुस्तके च एवं प्रतिपादितम्। न किं सत्यवादी श्रीमान् ।

Lord Monboddo महाभागोपि इत्थं ब्रवीति—"There is a language, still existing, and preserved among the Brāhmins of India * * * I shall be able clearly to prove that the Greek is derived from the Shanscrit." (*On the Origin and Progress of Language*, vol. vi, p. 97; Quoted in Max Müller's *Science of Language*, Vol. I, pp. 225-226, foot-note). युरोपमहादेशे Charles Wilkins महोदयेन देवभाषादेवनागराक्षरयोरुत्पत्तिः इत्थमेव वर्णिता । एकदा तु संस्कृतभाषा इह जगति सर्वैरेव सर्वत्र 'व्यावहारिकी भाषा' प्रज्ञाता । यथा Franz Bopp मते—"At one time Sanskrit was the

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

one language spoken all over the world." (*Edinburgh Review*, Vol. xxxiii, p. 43). अन्यत्रापि च दृश्यते—"Sanskrit is more perfect and copious than the Greek and the Latin and more exquisite and eloquent than either." (Ibid). स हि कोविदः तुलनामूलकभाषातत्त्व-(Comparative Philology)-शास्त्रस्य समुद्भावकः। * विदग्धप्रधानेन William Jones महोदयेन ध्वनितमेव —"Sanskrit language is of a wonderful structure, more perfect than the Greek, more copious than the Latin, and more exquisitely refined than either." (*Asiatic Researches*, Vol. I, p. 422) † प्रसिद्धप्रत्नतात्त्विक-Max Müller-महाभागस्तु प्रकाशयत्येव—"Sanskrit, the language of languages. पुनश्च प्रख्यातगुणागुणज्ञेन शार्मण्यदेशजपण्डिताग्रगण्येन Schlegel महाशयेन वर्ण्यते —"Judged by an organic standard of the principle elements of language, the Sanskrit excels in grammatical structure, and is indeed, the most perfectly developed of all idioms, not excepting Greek and Latin." (*History of Literature*, p. 106).

यथा पालिप्राकृतमहाराष्ट्रीशौरसेनीगौडीलाटीमागधीप्रभृतयो भाषाः संस्कृतप्रभवा अवरजाश्च, तद्वत् ग्रीक्लाटिन्जार्माणप्रभृतयोऽपि प्रतीच्यदेशीया प्रसिद्धा भाषाः संस्कृतप्रभवाः। जेन्दभाषाऽपि संस्कृतभाषाविकारसम्भूतैव। किं न अध्यापक Heeren एवमवदत्—"In point of fact, the Zind is derived from the Sanskrit." (*Historical Researches*, Vol. II, p. 220). यद्यपि पह्लवी देवनागरवर्णानां विकारेण सञ्जाता, तथापि जेन्दभाषा संस्कृतभाषाविकारतया आगता एव। वेदानां पठनपाठनविषये तुलनामूलकभाषातत्त्वग्रन्थ (Comparative Philology) पक्षेऽपि च आवे-

* "Ueber das Conjugations-system der Sanskrit Sprache in Vergleichung mit jenem der griechischen, lateinischen, persischen und germanischen Sprache." (1816). The foundation of the science of Comparative Philology was laid by the first publication of Franz Bopp's *Comparative Grammar* in 1848 A.D.

†Also, quoted in Max Müller's *Science of Language*, vol. I, 1891, p.224.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तानुशीलनं परमावश्यकमस्ति। तत्र न कोऽपि सन्देहः। केषाञ्चिन्मते जेन्दभाषा संस्कृतभाषाया दुहितृपदवाच्या स्यात्। वस्तुतस्तु, जेन्दावेस्ता अखिलवेदेभ्यः अतितरामेव कनीयसी इति बहूनां विदुषाम् अभिमतम्। भूयस्यः खलु परकीया भाषाः (foreign languages) संस्कृतभाषातः प्रादुर्भूताः भाषाणामासां संवादोऽपि बाहुल्येन परिलक्ष्यते। तत्र कतिपयानि उदाहरणानि—

संख्यावाचकशब्दः (Numerals)—

Sanskrit	Avestā	Greek (Doric)	Latin	Gothic
Prathamā	Frat'hema	Prota	Prima	Fruma
Sanskrit	Latin	Greek	Lithuanian	Welsh
Tri	Tri	Tri	Tri	Tri

आख्यातम्

Sanskrit	Avestā	Greek	Latin
Dadāmi	Dadhəmi	Dido-mi	Do

तुमुन्प्रत्ययान्तशब्दः (Supines and Infinitives)—

Sanskrit	Latin
Dātum	Datum
Etum	Itum
Stratum	Stratum

अन्ये शब्दाः—

Sanskrit	Avestā	Latin	Greek	Slavonians	Lithuanian
Mitra	Mithra	...	...	...	...
Agni	...	Ignis	...	Ogni	Ugnis
Varuṇa	...	...	Ouranos	...	...
Yama	Yima	...	...	...	...
Asura	Ahura	...	...	...	...
Sapta	Hapta	Septus	...	...	...
Kratu	Khratu	...	Kratos	...	...
Soma	Haoma	...	...	...	...
Sāmi	...	Semi	...	...	...

(Pān. 2.1.27)

'सामि त्वर्धे जुगुप्सिते'—अमरः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sanskrit	Pāli	Bengali
Gabî	Gābî	Gābhī
Duhitā*	Dhītā	Jhi

Old French	French	Italian	Latin	Greek	Persian	Arabic
Ris	Riz	Riso	Oryza	Oryza	[as preserved in the Pushto	Uruzz ruzz

Spanish or Allied forms—

Arroz	Persian Birinj	Sanskrit Vrīhi	Afhgan Wrijzey, Wrijey, Wrijzh'h]¶
	Armenian Brinj		
	Avesta Birinj		

तुलनामूलकभाषातत्त्वग्रन्थे (Comparative Philology) ईदृशानां परस्परसम्बद्धानां शब्दानां विचारा वर्तन्ते।† अनुसन्धित्सापरवशैर्विपश्चिद्भिस्तत एवावगन्तव्याः—

अथ केचिदाहुर्मिश्रदेशस्य हाइरोग्लीफिक् (Hieroglyphic(इत्याभिधेया भाषालिपिश्च (written characters) देवभाषायाः प्राचीनतरा अभूत्। मैशरदेशीय (Egypt) नागरिकसभ्यता (Civilisation) भारतवर्षीयनागरिकसभ्यतायाश्च बहुकालव्यवधानं प्रभेदं प्रतीयते। नैतत् सम्यक्। प्राक् भारतवर्षीया लोकाः बहुलजनाकीर्णाः आसन्, ततस्तत्रत्याः पुरुषा महार्ण-

---

* (दोग्धि अपहरति सर्वस्वं मातृकुलात् इति। यद्वा, दूरे क्षिपति भवति)
Vide, *Calcutta Oriental Journal*, Vol. II, 3, p. 77 (*Popular Etymology*),

¶ अशेषशास्त्रज्ञानसम्पन्नप्रतीच्यप्राच्यदेशीयनानाभाषाविशारदप्रकृष्टशब्दतत्त्ववित्प्रत्नतात्त्विकप्ररूढप्रज्ञश्रीयुक्तअविनाशचन्द्रगृहचतुर्धुरीणेन एम्-ए, वि-एल इत्युपाधिमण्डितेन व्यवहाराभिज्ञेन पितृदेवमहाभागेन उक्तविषये लिखितः प्रबन्धो द्रष्टव्यः।

("नव्यभारत" इत्याख्याते मासिकपत्रे, २८शखण्डे, १३१८ वङ्गाब्दे, फाल्गुने, ६३२-६३३ पत्रद्वयं निरीक्षणीयम्)।

† *Grundriss der indo-arischen philologie und Altertumskunde*" (Encyslopædia of Indo-aryan Philology & Archæology—1987, Ed. by Dr. Georg Bühler, aferwards, F. Kielhorn, now edited by H Lüders & J. Wackernagel). Christian Lassen's "*Indische Altertumskunde*" (1843-1862).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वादि उल्लङ्घ्य मिश्रदेशं गत्वा इथियोपियान् (Ethiopians) जातां प्राप्ता एव। तावदेव मिश्रदेशीयमनुष्याः आरवभूमिभागं, केचित्तु* पल्लीस्थानं (Palestine), अपरेऽपि ग्रीसभूखण्डं प्रस्थिताः। कथं तर्हि मिश्रदेशीया मानवाः भारतीयेभ्यः प्राचीनतराः भवेयुः? पुनश्च, बेबिलनमेषपटेमिया (Babylon-Meso-potamia) प्रभृतयो देशाः भारतवर्षीयसभ्यतापेक्षायाः प्राचीनतरा भवन्ति वा? न कथमपि।

संस्कृतभाषाया लेखनप्रणाली वैदिकयुगादेव प्रचलिताऽस्ति। उक्तञ्च पण्डितप्रवर S. K. Varma महाभागेन—"I feel no hesitation in saying that there are words and phrases occurring in the Saṃhitās of the Vedas, in the *Brāhmaṇas* and in the sūtra works, which leave no doubt as to the use of the written characters in ancient India. It may be confidently asserted that the systematic treatises in prose which abounded at and long before the time of Pāṇini could never have been composed without the help of writing." Oriental Lectures, Balliol College, Oxford, a paper read before the International Congress of Orientalists, Leyden, 1883, on "The use of Writing in Ancient India." *Acts Du Aixieun Congres International Des Orientalistes tenuen 1883 a Leide*, p. 305). याज्ञवल्क्यनारदादयो मुनयः लेख्यपत्राणि (written documents) ऊचुः। कात्यायनोऽपि तद्वत्—"यत्रपवन्वमपत्रा लेखकः सहसादिभिः"। बहुयुगव्यापी पुनः पुनः सामाजिकसंघर्षो धर्मसंस्कारश्च ततः वैदेशिकाक्रमणेऽपि च संस्कृतचर्चा किञ्चिन्मात्रमपि न स्खलितं शिथिलतां वा प्राप्ता। Max Müller वर्णयति स्म—"Yet such is the marvellous continuity between the past and the present in India, that inspite of repeated social convulsions, religious reforms and foreign invasions, Sanskrit

---

* Pococke महोदयस्य मते—"Its other name, Palestine, is derived from the term "Pallistan" (*India in Greece*, p. 214). अस्य च नामान्तरं "प्यालिष्टाइन्" इति पल्लीस्थानत एव निष्पन्नम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

may be said to be still the only language that is spoken over the whole extent of that vast country." (*Idia, What can it teach us* ? pp. 78-79). पुत्रश्च—"Even at the present moment, after a century of English rule and English teaching, I believe that Sanskrit is more widely understood in India than Latin was in Europe at the time of Dante." (Ibid).

'संस्कृतभाषा मृता' इत्येवं वक्तुं कः शक्नोति ? प्रत्युत, नितरां भारत-विद्वेषकसंस्कृतभाषानभिज्ञनिरक्षरस्वजातिस्वधर्मविहीनमहापातकतथाकथिता-भिजात्यसम्प्रदायमूढजनमुखराणां मुखरवविशेषः 'सा मृतेति' क्वचिदेव श्रूयते। परन्तु, अध्यापक M. Winternitz महोदयस्य मतेऽपि तावत्तु कदापि न—"Sanskrit is not a "dead" language even to-day. There are still at the present day a number of Sanskrt periodicals in India, and topics of the day are discussed in Sanskrit pamphlets. Also, the Mahābhārata is still today read aloud publicly * * * *

To this very day poetry is still composed and works are still written in Sanskrt, and it is the language in which Indian scholars even now converse upon scientific questions. Sanskrit at the least plays the same part in India still as Latin in the Middle Ages in Europe, or as Hebrew with the Jews." (*History of Indian Literature*, vol. I, p. 45).

देवभाषां (संस्कृतभाषां) समालोक्य महापुरुषः श्रीमान् मोहनदासकरमचाँदगान्धी जलभृतमेघस्तनितगम्भीरमांसलभारती-निर्घोषेण विवृणोति—"A Hindu's education must be regarded as inadequate without a knowledge of the rudiments of Sanskrit. Hinduism would be extinct without Sanskrit learning and Sanskrit scholarship being cultivated on an adequate scale." (*Young India*, 1924-1926, Ed. by S. Ganesan, Madras, p. 1306). केनचित् प्राच्यदेशजविदुषा संस्कृत-भाषायाः प्रगाढभक्तिजनकतया अधस्तात् पङ्क्तिभिः उपन्यस्तम्—"No country except India and no language except the Sanskrit can boast of a possession so ancient or venerable. No nation

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

except the Hindus can stand before the world with such a sacred heirloom in its possession, unapproachable in grandeur and infinitely above all in glory. The Vedas stand alone in their solitary splendour, serving as a beacon of divine light for the onward march of humanity." (Hindu *Superiority*, p. 180). इति शम्।

वररुचिविरचिता

लिङ्गवृत्तिः

स्तूपालक्तककर्पाससूर्यकूर्पाससारथितरङ्गाः।
अलकसमुद्गवराटकनूपुरकङ्कणाः पुंसि ॥६०॥

एते शब्दाः पुंसि भवन्ति। स्तूपो राशिः। अलक्तकः पादादिरागद्रव्यम्। कर्पासः सूत्रद्रव्यम्। सूर्यो रविः। कूर्पासः कञ्चुकम्। सारथिः सूतः। तरङ्गः कल्लोलः। अलकः केशरचना। समुद्गः सम्पुटकः। वराटः कपर्दकः। नूपुरः पदाभरणम्। कङ्कणः करभूषणम्।

सैन्यायुधमङ्गलनगरवृन्तहरितालविम्बमुकुटकुड्मलानि। विद्धि *तृतीयप्रकृतौ

सैन्यादीनि तृतीयप्रकृतौ* जानीहि। सैन्यं बलम्। आयुधमस्त्रम्। मङ्गलं प्रशस्तम्। वृन्तं प्रसवबन्धनम्। फलं मूलम्। हरितालं प्रसिद्धमेव। विम्बं प्रतिरूपम्। मुकुटं शिरोभूषणम्। कुड्मलं कलिका।

---

* 'तृतीयाप्रकृतौ' इत्यादर्शे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुंस्यवसथस्तथोद्गीथः* ॥६१॥

अवसथ-उद्गीथ*शब्दौ पुंसि भवतः। अयमवसथः परिव्राजकः। अयमुद्गीथः* साम।

दर्पणमृदङ्गजठराः पुंस्युक्ताः कुन्तकुतपधूमाश्च।

एते शब्दाः पुंस्युक्ताः। अयं दर्पणः आदर्शः। मृदङ्गो मुरुजः। जठरः कुक्षिः। कुन्तः प्राशः। कुतपः शस्त्रम्, कालविशेषश्च[1]। धूमो वह्निसम्भवः।

व्रातह्रददण्डाङ्कुशकटाक्षसंग्रामविटपाः पुंसि† ॥६२॥

एते शब्दाः पुंसि भवन्ति। अयं व्रातः सङ्घः। ह्रदः सरः। दण्ड आड्डा लकुटश्च। अङ्कुशः शृणिः। कटाक्षः अपाङ्गदृष्टिः। संग्रामो युद्धम्। विटपो लतागुल्मः।

पामा स्त्रियां निगदिता‡ पुंसि वेमा वै कुणपकूर्चौ च।

पामा-शब्दः स्त्रियां कथितः। इयं पामा विचर्चिका। कच्छुः। वेमादयः पुंसि। अयं वेमा निष्पन्नवस्त्रवेष्टनदण्डः। कुणपो मृतशरीरम्। कूर्चः श्मश्रु।

कन्दरयूथप्रोथाश्च वंशरेणुध्वजाश्चैव§ ॥६३॥

कन्दरादयः शब्दाः पुंसि भवन्ति। अयं कन्दरः पर्वतस्यैकदेशः।

---

* उद्गाय इत्यादर्शे।

[1] दिवसस्याष्टमे भागे मन्दीभवति भास्करः।
स कालः कुतपो ज्ञेयः पितॄणामक्षयम्॥

† विटपाश्च—मु० पा० ‡ विनदिता—आ० § ध्वजाश्च—आ०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यूथः सङ्घातः। प्रोथः अश्वनासिकाविवरयोरुपरिदेशः। वंशो वेणुः। रेणुः पांशुः। ध्वजः केतुः।

केदारखण्डप्रशमाश्च पुंसि नित्यं कपाटश्च।

एते पुंसि भवन्ति। अयं केदारः क्षेत्रम्। खण्डः इक्षुविकारः। प्रशमो धान्यच्छेदनः। कपाटो द्वारि पिधानम्।

हेलाकाञ्चीलालासुधायुधाः स्युः स्त्रियां प्रवेणी च ॥६४॥

एते स्त्रियां भवन्ति। इयं हेला अनादरः। काञ्ची मेखला। लाला श्लेष्मविकारः। सुधा अमृतम्। युधा युद्धम्। प्रवेणी केशरचना।

हानिर्ग्लानिर्वापीविपणीशार्यश्च स्वाहा च।

एते स्त्रियां भवन्ति। इयं हानिरपचयः। ग्लानिरशक्तिः। वापी पुष्करिणी। विपणी पण्यवीथिका। [शाटी कटिप्रावरणम्।] शारी पटोलिका। स्वाहा मन्त्रावसानम्।

लक्ष्मीर्मनःशिलोपानहः स्त्रियां स्थाण्वणुज्वराः पुंसि ॥६५॥

लक्ष्म्यादयः स्त्रियां भवन्ति। इयं लक्ष्मीः श्रीः। मनःशिला धातुद्रव्यम्। उपानत् पन्नद्धी। स्थाण्वादयः पुंसि भवन्ति। अयं स्थाणुः शिवः कीलश्च। अणुः स्वल्पः। ज्वरो रोगः।

पुंसि स्यात् प्राग्वंशस्त्रिषु लिङ्गेषु शृङ्खलं विद्धि।

प्राग्वंशशब्दः पुंसि भवति। अयं प्राग्वंशो यज्ञकुटी। शृङ्खलं त्रिषु लिङ्गेषु जानीहि। अयं शृङ्खलः। इदं शृङ्खलम्। इयं शृङ्खला।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चमसस्तम्भनिदाघपशुशूकविटकाश्च पुंस्युक्ताः ॥६६॥

एते पुंसि कथिताः। अयं चमसः सोमपात्रम्। अयं स्तम्भः। निदाघो घर्मः। पशुर्गवादिः। शूको धान्यादीनाम्। विटकः पिण्डकृतपरिमाणद्रव्यम्, शौण्डो वा।

वल्कलकुण्डलहिमचिह्नखलीनककुद्गुह्यशुल्क-
शकलानि।
तीरोलूखलकवचानि चैव* विद्यादितरजातौ ॥६७॥

वल्कलादीनि नपुंसके जानीयात्। इदं वल्कलं वृक्षत्वक्। कुण्डलं भूषणम्। हिमं तुहिनम्। चिह्नमङ्कः। खलीनं कविका। ककुदं वृषस्य। गुह्यं गोप्यस्थानम्। शुल्कं शून्यस्थानम् [कन्यावित्तं वा]†। शकलं खण्डः। तीरं नदीकूलम्। उलूखलं धान्यादिक्षोटनम्। कवचं सन्नाहः।

मण्डलकेशरभाण्डोत्तरीयसोपानकल्मषाघानि।
प्रादेरन्तं च नपुंसकं सह कुटुम्बपुलिनाभ्याम् ॥६८॥

एते नपुंसके भवन्ति। इदं मण्डलं सूर्यस्य। केशरं किञ्जल्कः। भाण्डमुपकरणद्रव्यम्। उत्तरीयं प्रावरणम्। सोपानं खण्डखण्डिका। कल्मषं पापम्। अघं पापञ्च। प्रशब्दादेरन्तशब्दं नपुंसके विद्धि। इदं प्रान्तमन्त एव। अनुपसर्गस्तु पुंस्येवान्तशब्दः। कुटुम्बपुलिनशब्दाभ्यां सह नपुंसके। इदं कुटुम्बं गोत्रवर्गः। इदं पुलिनं द्वीपम्।

स्थालीसभाजराणां स्त्रीत्वं ‡स्थल्यावीचीशब्दयोश्च।
छविकट्योर्मञ्जर्या वल्ल्याश्चैवं विजानीयात्§ ॥६९॥

---

* च विद्यादि—मु०
† एतदधिकं मुद्रिते पुस्तके
‡ स्थाल्याश्च वीचिगदयोश्च—मु०
§ छविकट्योश्च समञ्जर्या वल्ल्याश्च विजानीयात्—आ०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थाल्यादीनां स्त्रीत्वं भवति। इयं स्थाली रन्धनभाण्डम्। सभा गोष्ठी। जरा वृद्धत्वम्। स्थली उच्चनिर्जलो देशः। वीची तरङ्गः। छविर्लावण्यम्। कटिः श्रोणिः। मञ्जरी वृक्षस्य। वल्ली लता।

शिल्पच्छर्दिरन्नसमलमरकतपलालकृच्छ्राणि* ।
मन्दिररिक्थे† नपुंसके मन्दुरां स्त्रियां विद्धि ॥७०॥

एते नपुंसके भवन्ति। इदं शिल्पं कलादिकं कर्म। छर्दिर्वान्तिः। अन्नं भक्ष्यम्। समलममेध्यम्। मरकतं रत्नम्। पलालं धान्यादीनाम्। कृच्छ्रं कष्टम्। मन्दिरं गृहम्। ‡ रिक्थं द्रव्यम्। मन्दुराशब्दं स्त्रियां जानीहि। इयं मन्दुरा वाजिशाला।

कल्ककृमिमुन्यङ्गारवप्रग्रहहोमर्षियक्ष्मरेफाः ।
मण्डकरण्डवरण्डाश्च पुंसि शपथाम्बरीषौ च ॥७१॥

एते पुंसि भवन्ति अयं कल्कः पापं दम्भश्च। कृमिः कीटः। मुनिस्तपस्वी। अङ्गारः काष्ठस्य। वप्रः प्राकारः केदारः क्षेत्रम्। ग्रह उपरागः। होमो मन्त्राहुतिः। ऋषिस्तापसः। यक्ष्मा रोगः। रेफो वर्णविशेषः। मण्डोऽन्नविकारः। करण्डः कुशभाण्डः। वरण्डः काष्ठविशेषः। शपथः प्रत्ययकरणम्। अम्बरीषो भ्राष्ट्रः।

क्रमशः

---

* शिल्पं छर्दिस्त्वन्नं समलं—मु० † शक्थे—आ०
‡ शक्थम्—आ०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

মহাশয়েন মূলটীকয়োঃ প্রধান-প্রতিপাদ্যানাং বিষয়াণাং সমীচীনয়া রীত্যা ভাবার্থনিরূপণ-প্রধানা মুক্তিদীপিকানাম্নী টীকা তথা বঙ্গভাষাময়ং তাৎপর্য্য-বিবরণঞ্চ সন্নিবেশিতম্। বিস্তৃতরূপেণ সংস্কৃত-ভাষয়া ভূমিকাপি স্থাপিতা। অস্যাং ভূমিকায়াং গ্রন্থকৃতা (তর্কাচার্য্যেণ) স্বীয়মনিতরসাধারণং দর্শনশাস্ত্রনৈপুণ্য-মাবিষ্কৃতম্। যদবলোকনেন প্রায়ঃ সর্ব্বেষামেব বিপশ্চিতাং ভবন্তি মাদ্যন্তি চিত্তানি। অনেন চ বিদ্যার্থিনাং মহানুপকারো ভবিষ্যতীতি মমাস্তি দৃঢ়ো বিশ্বাসঃ। আশাস্যতে যদস্য গ্রন্থস্য সর্ব্বত্র সমধিকপ্রচারো ভবেদিতি। প্রার্থ্যতে চ, জগদীশ্বরো গ্রন্থকর্ত্তারং তর্কাচার্য্যমহাশয়ং চিরায়ুষং বিদধাতু যেনৈতাদৃশানাং দুরূহগ্রন্থস্য ভাবপ্রকাশানাং গ্রন্থানাং প্রণয়নেন লোকোপকারঃ সাধিতঃ স্যাৎ।

৩। **ম॰ ম॰ বামাচরণন্যায়াচার্য্যস্য**—শিবরামকৃতটীকা তু প্রাচীনা সুপ্রসিদ্ধা চেতি ন তত্র কশ্চন বচনাবসরঃ। শ্রীমৎকালীপদ-তর্কাচার্য্য-কৃত-মুক্তিদীপিকায়াস্তু বহূনি স্থানানি সমবলোক্য এতদেব নিরবৈষং যং শিবরামকৃতটীকাপেক্ষয়া মুক্তিদীপিকৈব বিদ্যার্থিনাং সমধিকমুপকারং জনয়িষ্যতীতি।

৪। **ম॰ ম॰ শ্রীযুক্তফণিভূষণ-তর্কবাগীশস্য**

শিবরামকৃতা টীকা মুক্তিবাদস্য যাদিমা।
অজ্ঞাতপূর্ব্বা চাস্মাভিঃ সাপি তেন প্রকাশিতা॥
মহতী ভূমিকা চাদৌ যা বহ্বর্থপ্রকাশিকা।
বিদুষামপি বিজ্ঞেয়া বিস্ময়ং বিদধীত সা॥
তস্যাং কবিত্বপাণ্ডিত্যবহুদর্শিত্বমাত্মনঃ।
প্রকাশ্যায়ং নবীনোঽপি প্রবীণত্বমদর্শয়ৎ॥
মুক্তিবাদমুপাশ্রিত্য নবে বয়সি যা কৃতিঃ।
তর্কাচার্য্যস্য বিদুষস্তস্য সা কীর্ত্তিরক্ষয়া॥

৫। **ম॰ ম॰ পার্ব্বতীচরণ-তর্কতীর্থস্য**—ইদানীমেতন্মুক্তিবাদ-ভূমিকায়ামস্য নানাশাস্ত্রপর্য্যালোচনায়াঃ পরিচয়ঃ প্রাপ্যতে। অনেকপরিশ্রম-স্বীকারপূর্ব্বকং বিবিধগ্রন্থালোচনয়া ভূমিকেয়মস্য রচিতা। তত্র তর্কাচার্য্যস্য যাদৃশবিদ্যাবত্তায়াঃ পরিচয়োঽস্তি তেন স বস্তুত এব প্রশংসনীয়ঃ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

THE

MANJUSHA

The Editor of the Sanskrit Sahitya Parishad wishes to draw the attention of the reader to the new Sanskrit monthly the Manjusha also under his control. It is a bright little magazine of 16 closely printed pages, full of interest. It contains short stories, poems, beautiful English poems and prose passages for translation into Sanskrit for which prizes are offered, proverbs and proverbial sayings from the different European and Indian languages. It is now publishing a brilliant Sanskrit rendering of Bankim Chandra Chatterjee's immortal novel "Krishnakanter Will" and a series of articles on the Sanskrit language from the pen of Pandit Vidhushekhar Shastri. The Manjusha may be regarded as a supplement to the Sanskrit Sahitya Parishad and the subscribers to the Parishad are invited to subscribe for the Manjusha also. It is the cheapest, brightest and at the same time, the most regular of all Sanskrit journals and magazines. *The annual subscription is Rupee One only.* Communications are to be addressed to the Manager.

61/A Ramkanta Bose Street, Baghbazar, Calcutta.

Specimen numbers sent free on application.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073

Vol. XVIII, No. 6] [October, 1935.

१८५७ शकीये आश्विने १८म-वर्षस्य ६ष्ठ-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.

Printed at
CALCUTTA ORIENTAL PRESS
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

THE

MANJUSHA

The Editor of the Sanskrit Sahitya Parishad wishes to draw the attention of the reader to the new Sanskrit monthly the Manjusha also under his control. It is a bright little magazine of 16 closely printed pages, full of interest. It contains short stories, poems, beautiful English poems and prose passages for translation into Sanskrit for which prizes are offered, proverbs and proverbial sayings from the different European and Indian languages. It is now publishing a brilliant Sanskrit rendering of Bankim Chandra Chatterjee's immortal novel "Krishnakanter Will" and a series of articles on the Sanskrit language from the pen of Pandit Vidhushekhar Shastri. The Manjusha may be regarded as a supplement to the Sanskrit Sahitya Parishad and the subscribers to the Parishad are invited to subscribe for the Manjusha also. It is the cheapest, brightest and at the same time, the most regular of all Sanskrit journals and magazines. *The annual subscription is Rupee One only.* Communications are to be addressed to the Manager.

61/A Ramkanta Bose Street, Baghbazar, Calcutta.

Specimen numbers sent free on application.

19th Anniversary of the Sanskrit Sahitya Parishat.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

19th Anniversary of the Sanskrit Sahitya Parishat.
Theatre—"NALADAMAYANTIYAM"

भारते भातु भारती

१७, आर० जि० कर रोड वर्त्मस्थ-
संस्कृत-साहित्य-परिषद्भवनतः
१३४२ सौरभाद्रस्य अष्टाविंशदिवसीया

University Institute, the 24th Sept., 1935, 6 P.M.

सबहुमानमाविदनम्—

महाभागाः, आगामिनि सौराश्विनस्य सप्तमदिवसे कुजवासरे सायं षड्-वादनतः कलिकाता 'युनिभार्सिटी इन्स्टिटिउट्' इत्याख्यभवने संस्कृतसाहित्य-परिषद एकोनविंशवार्षिकाधिवेशनं भविता। तत्र माननीया 'नसीपुरा'धिपा 'राजा' इत्युपनामानः श्रीमन्तो भूपेन्द्रनारायणसिंहमहोदयाः सभापतिपद-मलङ्करिष्यन्ति। भवद्भिः कृपयागत्य सभाकार्यं सम्पूरणीयमिति।

आश्रयोः—
श्रीअमरेश्वरठाकुरस्य,
श्रीयतीन्द्रनाथवसुजस्य च सम्पादकयोः।

कार्यसूची—

१। सभापतिवरणम्। २। कार्यविवरणपाठादिकम्। ३। स्वर्गत-विद्वत्प्रवर-सारदारञ्जनराय, एम. ए. सिद्धान्तवारिधि-महोदयानां चित्रप्रतिष्ठा। ४। सभापतेरभिभाषणम्। ५। परिषत्सदस्यैः नवीनकवि-श्रीयुक्तकालीपद-तर्काचार्यकृत "नलदमयन्तीय" नाटकस्य चाभिनयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"भारते भातु भारती"

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता।
१८५७ शकाब्दे
सौरभाद्रस्य सप्तविंशदिवसः।

सबहुमानमावेदनम्—

महोदयाः, आगामिनि सौराश्विनस्य तृतीयदिवसे शुक्रवासरे सायं सप्तवादनतः परिषदो वर्त्तमानवर्षीयं मासिकाधिवेशनमेकं भविता, तत्र भवतां समुपस्थितिः साग्रहं प्रार्थ्यत इति।

विनीत—
श्रीअमरेश्वरठाकुर-वेदान्तशास्त्रिणः
श्रीयतीन्द्रनाथ-वसुजस्य च
सम्पादकयोः।

आलोच्यविषयाः—

१। विगताधिवेशन-कार्य्यविवरणपाठः।
२। नूतन-सभ्यनामप्रचारः।
३। १२४१ वङ्गाब्दीयायव्ययानुमोदनम्।
४। १२४२ वङ्गाब्दीय-कार्य्यनिर्व्वाहकसमितेः सदस्यानां कार्य्यपरिचालकानां च निरूपणस्यानुमोदनम्।
५। निबन्धस्य पाठः—
"पण्डितराजो जगन्नाथः" इति श्रीर्षकस्य
निबन्धकः—श्रीयुक्त-वङ्किमचन्द्र-साहित्याचार्य्यः।
६। विविधाश्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

October, 1935 | १८५७-शकीये आश्विने १८श-वर्षस्य द्वि-संख्या | Vol. XVIII No. 6

मतिमञ्जरी

पराधीनजातीनां प्रायेण द्वयी परिस्थितिः परिदृश्यते। एकतस्तावद्-स्माकं प्राचीनसमाचारादिकं सर्वमतिमात्रमकिञ्चित्करं वर्वरोचितमिदानी-न्तनजीवननिर्वहणे लेशतोऽपि सामर्थ्यं न बिभर्ति, अन्यथा कथमस्माकमीदृशी समवस्था समुद्भवेदिति मन्यमाना बहवः पितृपितामहादिनिषेवितं मार्गं दूरतः परिहरन्तः कामप्यभिनवामेव विदेशीयालोकसम्पातसमुज्ज्वलां सरणिमनुसरन्ति। अपरे पुनः, न खलु विजितविजेत्रोस्तुल्यकक्षत्वं स्वप्नेऽपि नाम सम्भवति, विजितानां राष्ट्रगतं स्वातन्त्र्यं लेशतोऽपि नावशिष्यते, विजितानां राजनीतितन्त्रानुशीलनं पङ्गोर्गिरिलङ्घनप्रयासमनुहरति, अत एव शून्यस्य जीवितस्य परिपूरणार्थं सर्वथा साम्प्रतिकसमवस्थामविगणय्यैव परम्परागतः समाचार एव परिपालनीयः, पूर्वपुरुषक्षुण्ण एव मार्गोऽनुसर-णीयः, सर्वमप्याधुनिकं ज्ञानविज्ञानशिल्पादिकं विषवद् वर्जनीयमिति समुद्घोष-यन्ति। विवेकिनः पुनः कूपमण्डूकतामपि न कामयन्ते नापि वैदेशिका-चाराद्यनले शलभायितुमीहन्ते, परं स्वदेशीयसंस्कृतौ प्रत्ययमादधानाः पूर्वपुरुष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाचरितव्रतनियमादिषु श्रद्दधानाः स्वदेशीयमतीतवृत्तान्तं समालोचयन्ति, पूर्वजोपनिबद्धानि शास्त्राणि समनुशीलयन्ति, पूर्वपुरुषप्रशुण्णे मार्गे विचरन्ति, साम्प्रतिकविज्ञानप्रभावसमुद्भावितनवनवानपि विषयान् स्वायत्तीकुर्वन्ति, एवं सर्वतः सारं समाहरन्तः शनैः शनैरुन्नतिसोपानमधिरोढुं समीहन्ते। अत एव पूर्ववृत्तान्तस्य सम्यगनुशीलनमवश्यमेव विधातव्यं भारतवर्षीयैरित्युक्तं महीशूरराष्ट्रस्य प्रधानप्राड्विवाकेन 'रील'महोदयेन 'मीथिक्सोसाइटी'समाख्यस्य संस्थानस्य वार्षिकेऽधिवेशने। तस्यातिमनोरमस्य भाषणस्यायं निष्कर्षः—

प्रथमं तावदिदमेव परं सन्तोषस्थानमस्माकं यत् पुरावृत्तसंस्थाया अस्या ये तावद्विषयाः प्रधानतयाऽनुशीलनीयत्वेन निर्दिष्टास्तेष्वेवेदमन्यतमं स्थापत्यं नाम। स्थापत्यं तावद् गौरवेणेतिहासमप्यतिशेते। न खलु इतिहासे तथ्यानां समावेशः समुपलभ्यते, परं तत्तत्तथ्यमधिकृत्यैतिहासिकस्य मनसि यो यो भावः समुत्पन्नस्तस्यैवोपवर्णनं सन्दृश्यते। ऐतिहासिकेऽपि मानुष्यकसुलभा भ्रमप्रमादविप्रलिप्साकरणापाटवादयो दोषा न किल न विद्यन्ते। अत एवेतिहासाध्ययनावसरे सावधानेन मनसैतिहासिकस्य भावः परीक्षणीयः। स्थापत्यं तु सर्वथा विभिन्नमेवेतिहासात्। न हि प्रस्तरफलकादीनां प्रत्नवस्तूनां विलसति मानुषी भाषा यया मनुजजनं विज्ञापयेद्वा विप्रलभेत वा। ते हि स्वनिष्ठं सत्यमेव प्रतिपादयन्तः समवस्थिताः। स्थापत्यविशारदास्तु स्वकपोलकल्पितान् विषयान् बहुश आविष्कुर्वन्तीति तेषां दूषणमेव।

यदा तावद्व्यतीते शतके समागतोऽहं भारतं वर्षम्, तदानीं प्राचीनशिल्पशास्त्रात् प्राचीनेतिवृत्ताच्च पराङ्मुखाण्येवासन् बलवदपि शिक्षितानां चेतांसि। दक्षिणापथं परिभ्रमतो मे बहुश्रुतानामपि जनानां प्रथिततमदेवायतनविषये प्रख्याततमप्रासादविषये चाज्ञातासन्दर्शनेन विस्मयविमूढमासीन्मानसम्। सुप्रसिद्धदेवालयाध्यक्षा अपि कदा तावत् प्रतिष्ठितानीमानि देवायतनानि, केन प्रतिष्ठितानि, केन परिरक्षणोपयोगिद्रव्येण योजितानि, केन संस्कृतानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्येवं पृष्टास्तत्रत्यं स्वीयमज्ञत्वं वाऽल्पज्ञत्वं वा प्रकटयामासुः। अतोऽपि शोचनीयतरमेतत् यत्ते स्वेषु समर्पितभाराणां देवायतनानां योगक्षेमवहने नितान्तत एवौदासीन्यमवालम्बन्त। बहुशः खलु ते सुमनोहरं प्राचीनं मण्डपं भूमिसात् कारयित्वा तस्य स्थान आधुनिकत्वेन सम्भाव्यमानं किमपि मन्दिरादिकं निर्मापितवन्तः। अनेकशः खलु शिलाफलके समुत्कीर्णा लेखा नामशेषतां नीयन्ते, न च तेषामालोकचित्रग्रहणे लेशतोऽपि प्रयस्यते। कतिचिदैतिहासिकशिलालिपय इत्थमेव प्रनष्टाः, यत्र राजपुरुषैः प्रसार्य पाणी निरोधो विहितस्तत्रैव ताः परिरक्षिताः।

अद्यत्वे पुनर्न केवलं भारते वर्षे, पृथिव्याः सर्वत्रैव प्राचीनमण्डपादिषु सविशेषः समादरः परिलक्ष्यते। सिन्धूपत्यका-मध्यैष्या-मध्यामेरिकाप्रभृतिषु तेषु तेषु भूभागेष्वतिमात्रं विचित्राणि खननकर्माणि संसाधितानि, तेभ्यश्चात्यद्भुतानि तथ्यानि समधिगतानि। सभ्यता संस्कृतिश्चास्माभिर्यावत् पुराणत्वेन सम्भाविताऽऽसीत् ततोऽपि परःशतेभ्यः परःसहस्रेभ्यश्च संवत्सरेभ्यः पूर्वं तयोरभूत् समुद्भव इत्यवगतमस्माभिः। किं बहुना प्राचीनभास्कर्यादिसमालोचननिष्णाता अन्तरान्तरा प्रायेण ज्योतिर्गणितादिप्रसिद्धसंख्याशब्देन संव्यवहरन्ति।

चीनेषु मिशरेषु च प्राधान्येन स्थापत्यादिसन्दर्शनेन प्राचीनसंस्कृतेः सत्त्वादिकमूहितुं शक्यते इत्येवासीन्मतं पूर्वेषामैतिहासिकानाम्। अद्यत्वे तु सर्वथा भ्रान्तमेवेदमभिमतमिति प्रतिपन्नं सर्वैः। सहस्रवत्सरेभ्यः पूर्ववर्तिनि भुवो वृत्तान्ते चेद्विनिक्षिप्यते चक्षुः, सर्वेषामेव भूमण्डलवर्तिनां मनुजानां बहुविषयकमैक्यमेव नयनपथमवतरेत्। आर्यसभ्यतार्यसंस्कृतिश्च बहुतर एव भूभागे प्रसारितासीत्। न खलु पूर्वमीदृशार्यप्रभावप्रसारे प्रत्ययोऽभूत् प्रामाणिकानाम्, इदानीं पुनः प्रतिदिनमेव प्राचीनदेवालयादिभ्यः खननादिनाऽहमहमिकया प्रादुर्भूतानि प्रमाणानि बलादनिच्छतोऽपि प्रत्याययन्ति।

बहु किल विज्ञेयमस्यस्माकं प्राचीनमण्डपादिनिर्माणशास्त्रतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विज्ञानञ्चैतदखिलं पारमार्थिकं ज्ञानमिव विनयमेवादधाति। वर्तमान एवास्माकं बहुमानः, वर्तमान एवास्माकं गौरवबुद्धिः, परमतीतस्य समुत्कर्षस्य पुरतः सर्वथा निष्प्रभत्वमेवापद्यते वर्तमानं सर्वमेव। अनेकानि वस्तूनि मनुजजातिसाधारणान्येव, अत एव सर्वथा परिहरणीय एव स्वगौरवाभिमानः। जीवितविषये च समुदारैव दृष्टिर्विधेया। प्राचीनतमेऽपि समये तासां तासां जातीनां मध्ये व्यवहारादिकं प्रवृत्तमासीदिति ह्यवगम्यते शिल्पशास्त्रतः।

न खल्वेतावता शुष्कैः सार्वजनीनैरस्माभिर्भवितव्यमिति बोद्धव्यं भवद्भिः। सर्वसाधारणमैत्र्यादिसमुन्मेषेण तत्तज्जातिगतानि वैलक्षण्यानि कालक्रमेण क्षीणतामापादयितुं शक्येरन्, परं तथाविधेन व्यापारेण जातिगतवैशिष्ट्यस्य मूले कुठारश्चेत् समर्प्यते तर्हि किं वा ततः शोचनीयतरमापद्येत। सर्वात्मना जातिगतवैशिष्ट्यस्य संरक्षणमेवास्माकं परो धर्मः। न खलु मदायैतदपेक्ष्यते, परं परमेश्वरेण मनुजजनस्य परिचर्यार्थं ये तावदुत्कर्षा अस्मभ्यं प्रसादीकृतास्तेषां संरक्षणमवश्यमेव विधातव्यमित्यावश्यकमेतत्।

अहञ्चेद् भारतीयोऽभविष्यम् सर्वथा भारतवर्षस्य गौरवेण, भारतस्य माहात्म्येन, भारतस्य वैशिष्ट्येन, भारतस्य शिल्पेन, भारतस्य स्थापत्येन, भारतस्य विद्यया च गौरवान्वितमात्मानमाकलयिष्यं गर्वं च श्लाघां चान्वभविष्यम्।

यथा किलास्या भारतभूमेः पुत्रा दुहितरश्च पूजनीयाया भजनीयायाश्च जन्मभूमेरितिवृत्तं च वैशिष्ट्यं चावबुध्येरन् सम्यक्तया च बहु मन्येरंस्तदर्थं भारतभूमेरितिवृत्तभास्वतः समन्ततः प्रसारिकुज्झटिकाजालस्यापसारणाय सर्वात्मना प्रयतितव्यं सर्वैरेव भारतवर्षीयैः।

महान् खलु देशो भारतवर्षम्। अत्र चान्तर्भवन्ति बहवः प्रदेशा जातयश्च, परं किं नश्छिन्नं तावता। न खलु भारतवर्षे भक्तिः स्वप्रदेशभक्त्या स्वदेशप्रीत्या च विसंवादमासादयति। न खलु महीशूरीय इति कस्यापि भारतीयत्वं हीयेत। स्वप्रदेशभक्तिमूलैव समग्रभारतवर्षे भक्तिः फलं प्रसुवीत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदितमेवैतत् प्रायेण संस्कृभाषाप्रणयिनामशेषाणाम् यत् पाश्चात्त्यैः प्रज्ञ-तत्त्वविशारदैः प्राचीनेऽर्वाचीने च काले समाकृष्यमाणाः कालिदासादयो भारतीयमहाविप्रकाण्डा लोकान्तरेऽपि जर्जरशरीराः कण्ठगतप्राणा वर्तन्ते। एतत् पुनरिदानीं परमं प्रमोदस्थानमस्माकं यद् भारतवर्षीयैरपि विपश्चिद्भिः पाश्चात्त्याः कविप्रवरा इतस्ततः समाकृष्यन्ते। तथाहि पाश्चात्त्येषु कविप्रवरेषु यस्तावत् समस्वरमेव श्रेष्ठतया स्वीक्रियते सर्वैः स एव कविकुलचूडामणिः शेक्षपीयरमहोदयः खृस्तीयषोडशशतकतः पूर्वमेव समुत्पन्नः कालिदासादि-कविप्रजापतीनां कृतिषु दत्तावधानः समुपजातकविभावः प्रणिनाय शाकुन्त-लादिच्छायायोनीनि ह्यामलेट्-प्रभृतीनि काव्यरत्नानीत्याशयिष्ट माद्राजपत्त-नस्थः कश्चन समुद्रलङ्घनसंलब्धविचक्षणभावः पुरुषधौरेयः। इयन्तं कालं यावन्नाव उपरि शकटमासीदिदानीं शकटस्योपरि नौर्दृश्यते।

——

पुरातत्त्वविद्भिः प्रतिदिनमेवाश्रुतचराणि तथ्यानि समुद्भाव्यन्ते। तेषां विचारशैली श्रावणसंख्यायां प्रकाशितात 'पाँचीरजकिनी'प्रबन्धत एव स्फुटी-भवति। पुरातत्त्वविषये च सर्वथा शार्मण्यानामेव प्राधान्यमित्यवश्यमेवा-भ्युपगन्तव्यम्। रारट्यन्तां नामैतिहासिकाः खृस्तजन्मत ऊनविंशतितमे शतके धूमशकटस्य प्रादुर्भावम्, केनचन शार्मण्यसुधिया पुनः खृस्ताविर्भावतः षोडशशतके समधिगतजन्मनः शेक्षपीयरमहोदयस्य धूमशकटेन साकं निबिडः परिचयः प्रमाणोपन्यासपुरःसरं प्रतिपादितः। तथाहि निदाघ-निशीथेषु कोलाहलमयानि यन्त्राणि निद्रालूंश्च नागरिकानधिकृत्योक्तम्—

> Thou.....in complete steel
> Revisit'st thus the glimpses of the moon,
> Making night hideous.
>
> *Hamlet* i. 4

"आपादचूडमयोमयस्त्वं निशां भीषणतामापादयन पुनरपि क्षणदृष्टनष्टं चन्द्रमसमुपसर्पसि।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरातनानि यन्त्राणीदानीं बाहुल्येन क्रीयन्ते धनिभिः। तेषां च चालने क्लेश इत्थमुपवर्णितः—

Which much enforced shows a hasty spark,
And straight is cold again.

Julius Caesar, iv. 3.

"यत् किल पुनः पुनर्बलात् प्रणुन्नं मुहूर्तकं शिखामेकां प्रदर्शयति पुनरपि च जडिमानं भजते।"

अतिमात्रं परिचालितस्य यन्त्रस्याकाण्डे निश्चलतयाऽवस्थितिमधिकृत्योक्तम्—

So quick bright things come to confusion.

Midsummer Night's Dream, i.1.

"एवमेव त्वरिततरं समुज्ज्वलानि वस्तूनि विषर्यासमायान्ति।"

यच्च धूमशकटाधिरूढा आरक्षिकपुरुषाः पश्यतोहराननुसरन्ति तस्यापि वर्णनमुपलभ्यते—

When night-dogs run, all sorts of deer are chased.

The Merry Wives of Windsor v. 5.

"यदा नैशसारमेया धावन्ति सर्वविधा मृगा ग्रहणमुपयान्ति।"

यन्त्राणामतितैलावसेक इत्थं विनिन्द्यते—

The rankest compound of villainous smell that ever offended nostril.

The Merry Wives iii. 5

"घ्राणोद्वेजकेषु दुष्टगन्धेषु सर्वथा कटुतममेव।"

चतुष्पथे सन्निवेशितानां रथ्यारक्षिणाम् उत्क्रान्तमर्यादान् धूमशकटिकान् प्रति समाचरणमधिकृत्योक्तम्—

.....All his faults observed,
Set in a note-book, learned and conned by rote.

Julius Caesar iv. 3

'तस्य सर्वे दोषाः परिलक्षिताः, दोषनिर्देशपुस्तके सन्निवेशिताः, यत्नेन च कण्ठे कृताः।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धूमशकटयान्त्रिकस्तावदित्थमुपवर्णितः—

Another lean, unwashed artificer.

King John i. 2

"अपरः कृशोऽनिर्वर्तितस्नानः शिल्पी ।"

धूमशकटसमाहतः पादचर्यारोग्यशालायां शयान इत्थं प्रलपति—

Those clamorous harbingers of blood and death.

Macbeth, v. 6.

"शोणितमोक्षणस्य मरणस्य च कोलाहलकारिणोऽग्रदूताः ।"

चक्रनेमिपरिधानीयगतः क्रुशोऽपि कटाक्षितः—

Let me not burst.

Macbeth, i. 4

"नाहं स्फुटेयमिति ।"

अपि च

My high-blown pride
At length broke under me.....
Vain pump (some foolish emendations
prefer 'pomp')...I hate ye.

Henry VIII, iii. 2

"अन्ततश्च भग्नो मेऽत्यन्तसमुच्छ्रितोऽभिमानः । वृथाभस्त्रे [कैश्चिन्मूर्खैः शोधकैरत्र pomp इति पठ्यते] द्वेष्मि त्वाम् ।"

दृश्यतां तावच्छोभनपार्थिवतैलस्य विज्ञापनम्—

A rarer spirit never
Did steer humanity.
Antony and Cleopatra v, 1.

"न खलु कदाचीतो दुर्लभतरेण स्नेहेन चालितपूर्वा मनुजाः ।"

The spirit of time shall teach thee speed.

King John iv. 2

"कालस्य रसस्त्वां जवं शिक्षयिष्यति ।"

पार्थिवतैलाशये यदा सलिलस्य सद्भावस्तदा यन्त्रं शब्दायते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

These foolish drops do something drown my mainly spirit.

Merchant of Venice, ii. 3.

"इमे मूढा बिन्दवो निमज्जयन्तोव मे प्राधानिकं रसम् ।"

दृश्यतां तावद्धूमशकटोपकरणानां विज्ञापनम्—

You have the start of me.....
Use me as you will.

Merry Wives of Windsor v. 5

"यथेच्छं मामुपयुङ्क्ष्व ।"

बहूनां शकटानां संमर्देन यदा रथ्यायां शकटा निश्चलप्राया अवतिष्ठन्ते, तादृशीं समवस्थां मनसि निधायोक्तम्—

"Why, one that rode to his execution
Could never go so slow." *Cymbeline*, iii. 2

"अहो ! वध्यभूमिं प्रचलितोऽपि नर एवं शनैर्न गच्छेत् ।"

शकटादीन नागरिकरीत्या महताडम्बरेण परिचालयतो रथ्यारक्षिण उद्दिश्योक्तम्—

Look with what courteous action
It waves you on. *Hamlet*, i. 2.

"दृश्यताम् कथं दाक्षिण्येन त्वां दूरतः सञ्चालयति ।"

धूमशकटेऽतिमात्रं बद्धपक्षपातेन केनचन निर्निशाकरासु विभावरीषु सह सखिजनेन परिभ्रमता स्वशकटसम्पतितं ज्योतिरित्थमभिष्टूयते—

Twenty glow-worms shall our lanterns be,
To guide our measures round about the tree.—

Merry Wives v. 5.

"वृक्षस्य समन्तादस्माकं गतेः परिचालनाय विंशतिः खद्योताः प्रदीपायेरन् ।"

निशायां पर्यटद्भ्यो धूमशकटेभ्य आलोकनिदर्शनमेवमुपवर्ण्यते—

(Line clear—Pass)
The ground is tawny,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Yes, with a green eye in't.

Tempest, ii. 1,

(Danger—Stop).

Making the green one red.

Macbeth ii. 2.

(निरावाधः पन्थाः—गम्यताम्)

पिशङ्गी भूमिः, वाढम्, तत्र च विलसति हरितं नयनम् ।

(बाधा—स्थीयताम्)

"हरितं लोहिताययन् ।"

हरितस्य लोहितस्य चालोकस्य शेक्षपीयरस्य समयेऽपि तात्पर्यं साम्प्रतिकमिवासीत् ।

एतैरेवोद्धैतरंशैर्विस्पष्टमेव प्रतीयते शेक्षपीयरमहाभागस्य धूमशाकटिकत्वम् । किञ्च पादचारिषु तस्य भावपर्यालोचनयात्र लेशतोऽपि संशयो नावशिष्यते ।

You are not the dust which the rude wind
Blows into your face

King Lear, v. 2.

"न खलु त्वं तद्रजो यत् किल दुर्दान्तोऽनिलो विकिरति ते वदने ।"

यथा किल विपश्चिताऽध्यापकप्रवरेण सावेगमुच्यते—न खल्विदं सन्दिग्धतमस्यापि चेतसि न प्रभवेत् प्रत्ययमाधातुम् ।

उपसंहार एतदेव वक्तव्यं यत् सत्स्वप्यानुषङ्गिकेषु दोषजातेषु

Though in this city he
Hath widow'd and un-childed many a one
Which to this hour bewail the injury,
Yet he shall have a noble memory.

Coriolanus v. 5.

"यद्यपि वर्तन्त एवात्र नगरे बहवस्तथाविधाः प्रमदा याः किलानेन वैधव्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपादिताः, सन्तानैश्च वियोजिता अद्यापि परिदेवयन्ते तत्तद्वियोगम्, तथाप्युदात्ततमेन स्मृतिचिह्नेन संयोजनीय एवायम्।"

स हि निःसंशयं शेक्षपीयरमहाभागस्य प्रियपात्राणां मञ्जुले महति च गणेऽन्तर्भवति।

मेघनादवधम्

सप्तदशः सर्गः

[निबन्धकः—श्रीनित्यगोपालविद्याविनोदशर्मा]

सौमित्रिरुद्यानमदो विहाय रामस्य यातः शिबिरं सुशीघ्रम्।
मृगेन्द्रमालोक्य यथा मृगावि-त्तथाऽगमद् यज्ञगृहं सशत्रुम् ॥१॥
ग्रहीतुकामोऽस्त्रगृहेऽतिशातं भीमे मृधे शस्त्रवरं प्रवीरः।
ययौ यतो राघव आस्त तत्र महायशाः शौर्ययशःकिरीटी ॥२॥
नत्वा सुधी रामपदे सभक्तिर्विभीषणं मित्रवरं बभाषे।
तवाऽऽशिषा पूर्णमनोरथोऽयं श्रीपादपद्मार्च्चनतृप्तदासः ॥३॥
स्मरन पदोः काननमध्ययातोऽयक्षि प्रभो स्वर्णगृहे भवानीम्।
परीक्षितुं दासमिमं कतीशा ततान माया गदितुं न शक्तः ॥४॥
दौवारिकं भूतपतिं न्वपश्यं द्वारे ददौ वर्त्म विना रणं मे।
पुण्येन ते देव यथा महाहिः पलायते भेषजनष्टवीर्यः ॥५॥
वनात्ततः सिंह इयाय गर्जन निरस्तवानेनमहं तदैव।
वात्योत्थिता भैरवनिस्वनेन दावेन देशश्च विदह्यते स्म ॥६॥
दग्धं वनं तेन शशाम वह्नि-रारादगच्छत् पवनः क्षणेन।
ऐक्षे पुरः स्वर्गललामभूता देवाङ्गनाः कुञ्जविहारमत्ताः ॥७॥
बद्धाञ्जलिस्ता अयजे वरञ्चायाचे ततः प्रस्थितिमाशु दूरम्।
गतासु देवीषु ततः समीप उदज्वलन्मन्दिरमेकमग्र्यम् ॥८॥
सरोऽवगाह्यार्चितवान भवानीमिन्दीवरैर्भक्तिविशुद्धचेताः।
साक्षाद् भवित्री वरदा कृपार्द्रा प्रावाच तुष्टा मधुवर्षिवाग्भिः ॥९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भो लक्ष्मणाद्यामरवृन्दमासीत्त्वयि प्रसन्नं प्रहितश्च शस्त्रम् ।
मरुत्वताऽगच्छमहं स्वयञ्च त्वत्कार्यसिद्ध्यै गिरिशेन दिष्टा ॥१०॥
दिव्यास्त्रमादाय विभीषणेन बलिन् प्रतिष्ठस्व निकुम्भिलायै ।
अर्चन्तमग्निं सहसा विगृह्य व्यापादयेन्द्रारिमतुल्यवीर्यम् ॥११॥
मायावृतो मे भयमुक्त ऋच्छ किमिच्छसि ब्रूहि यशस्विमुख्य ।
प्रभातकल्पा रजनी नरेन्द्र कुर्विन्द्रजिन्नाशविधान आज्ञाम् ॥१२॥
उवाच रामः प्रसमीक्ष्य दूतं यमस्य दूराद् महिषप्रतीकम् ।
प्रयान्ति भीताः सुरदैत्यलोकास्त्वां प्रेषयाम्यङ्ग कथं तदास्ये ॥१३॥
उद्धूय सीतामलमृद्धसत्त्व भ्रातर्मुधा बद्धमहार्णवोऽहम् ।
रक्षोगणश्चानयमङ्ग लङ्कां बद्ध्वा मृधे सैन्यगणैः सनाथम् ॥१४॥
सिक्ता मही शोणितधारयेव वर्षाजलैर्नष्टमभूत् समग्रम् ।
राज्यं धनं जन्मदबन्धुवर्गा भाग्यस्य दोषैर्मम जीवबन्धो ॥१५॥
एकाऽस्ति सीता भवने प्रदीपो ध्वान्ते मदीये निरवाच्च सोऽपि ।
को वाऽस्ति विश्वे वद तात यस्य पश्यन् मुखं जीवितुमिच्छुरस्मि ॥१६॥
प्रतिव्रजारण्यनिवासहेतोर्भ्रातः पुनः प्रेष्ठ कुलघ्न आगाम् ।
आशाविमुग्धो रिपुराज्यमेतत्त्वया समं मद्गतजीवितेन ॥१७॥
सौमित्रिरूचे कथमार्य भीतिमेवं समाप्नोषि बली बलेन ।
दैवस्य यस्त्रस्यति किं त्रिलोक्यां कुतोऽपि शक्रश्च यदात्मनीनः ॥१८॥
शैलात्मजा शम्भुरुभौ सहायावीक्षस्व लङ्कां सुरकोपमेघैः ।
वृतां यथा स्वर्णमयी च शोभा वृणोति दृष्यं तव देव हास्यम् ॥१९॥
प्राज्ञप्रभो भृत्यमिमं नियुङ्क्ष्व सदेवशस्त्रं प्रविशामि गेहम् ।
रात्रिञ्चराणां तव पादपद्मप्रसादलेशेन निहन्मि तेषाम् ॥२०॥
केनावजानासि दिवौक-आज्ञां पथा हि धर्मस्य सदा गतिस्ते ।
करोष्यकार्यं कथमार्यगृह्य भनक्ति कः शान्तिघटं पदाभ्याम् ॥२१॥
विभीषणश्चाह सखे यदुक्तं तथ्यं तदेवातुलविक्रमोऽसौ ।
कृतान्तदूतोपममेघनाद इन्द्रार्तिकृद् वीरगणैकजिष्णुः ॥२२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृथाऽद्य तस्माद् भयमाप्नुयाम स्वप्ने पिशाचेश्वरभाग्यलक्ष्मीः ।
स्थित्वाऽन्तिके मे शिरसः प्रसन्ना जगाद मां द्योतितदूष्यधामा ॥२३॥
विभीषणास्मिन्नगरेऽतिपापे ज्येष्ठोऽतिगर्वेण तव प्रमत्तः ।
आसे कथं पापसमूहहन्त्री किं पद्मिनी भाति मलीमसाप्सुः* ॥२४॥
मेघावृते खे न हि दृश्यते भं किन्तु त्वयि प्रीतिमती सुपुण्यैः ।
नृपासनं प्राप्स्यसि सातपत्रं राज्येऽभिषेक्ष्यामि भवन्तमाशु ॥२५॥
सौमित्रिरासाद्य तवाऽऽनुकूल्यं त्वद्भ्रातृपुत्रं निहनिष्यति श्वः ।
विधेहि गीर्वाणनिदेशमर्थ्यं भो भाविरात्रिञ्चरलोकपाल ॥२६॥
सुप्तोत्थितोऽपश्यमहं स्ववेश्म देदीप्यमानं विभृतश्च दिव्यैः ।
गन्धैस्तथा तूर्यनिनाद आराद् मृदु श्रुतो व्योम्नि मयाऽतिहृद्यः ॥२७॥
ऐक्षे प्रतीहारमुखे विमुग्धः सौन्दर्यमूर्त्तिं स्मरगर्वहन्त्रीम् ।
कादम्बिनीकृष्णमनोज्ञकेशीं श्रियं समेघामिव चञ्चलाञ्च ॥२८॥
अन्तर्हिता सा सहसैव लक्ष्मीर्दत्ता च दृष्टिर्बहुशो मयाऽलम् ।
पुनर्न सिद्धस्तु मनोरथो मे माताऽददान्मे शुभदर्शनं न ॥२९॥
काकुत्स्थ वार्त्तां शृणु सावधानमाज्ञां विधेहि त्वमहं व्रजामि ।
त्वया समं यज्ञगृहं यतः स मद्भ्रातृपुत्रो यजते कृशानुम् ॥३०॥
नृपाल यत्नेन सुरानुशिष्टं संरक्ष जायेत तवेष्टसिद्धिः ।
वदामि तथ्यं रघुवंशकेतो विश्वासमाधेहि सुरप्रसादे ॥३१॥
प्रत्याह रामो गलिताश्रुनेत्रः स्मर्त्तुं मनः खेदमतीव धत्ते ।
पूर्वप्रवृत्तिं रुधिराशनेन्दो कथं विसृज्येत मयाऽनुजोऽद्य ॥३२॥
कुमन्त्रदुष्टा प्रियमन्थराया जाता यदा केकयराजपुत्री ।
रुष्टा ममात्यन्तमदृष्टदोषात्तदाऽत्यजं राज्यमहं समृद्धम् ॥३३॥
सत्यं पितुः पालयितुं रतस्य ममानुजः केवलभक्तिवश्यः ।
मातृ रुदत्याः सुखराज्यभोगं विहाय महुःखहरोऽभवत सः ॥३४॥

---

* समासान्तविधिरनित्य इति परिभाषया समासान्ताभावः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माता सुमित्रा सुचिरं रुरोद वधूश्च शुद्धान्तमलं विलापैः ।
बिभेद पौरान् स्वजनांस्तथार्त्तांश्छायेव हित्वाऽनुससार मां सः ॥३५॥
निरस्य पादेन दुरापभोगान् नवीनतारुण्य इतोऽस्मि वन्याम् ।
प्रसूः सुमित्राह कथं नु राम जहर्थ मे नेत्रमणिं छलात्त्वम् ॥३६॥
अमूल्यरत्नं प्रददामि तुभ्यं रक्षेस्त्वमेतत् सततं सयत्नम् ।
याचित्वा ममैषा सुतरक्षणार्था निष्प्राणदेहा निवसामि गेहे ॥३७॥
अलं समुद्धृत्य विदेहबालां वस्तुं पुनर्यामि वने वयस्य ।
न रावणिर्जेय इहास्मदीयैर्वीरैस्तथा देवमनुष्यदैत्यैः ॥३८॥
सर्वे वयं येन समं नियोद्धुं नालं कथं लक्ष्मण एककस्तम् ।
संयोत्स्यते मित्र समागमाम लङ्कां वृथाशापरिमुग्धचित्ताः ॥३९॥
दिव्योत्थिता गीः सहसैव तत्र विदेहबालाहृदयाब्जमित्र ।
मा देववाक्ये तव संशयो भूदाकाशमालोकय मुक्तशङ्कम् ॥४०॥
ददर्श रामः परिविस्मितात्मा खे युध्यतेऽहिः शिखिना सशब्दम् ।
दिशः प्रपूर्णाः परितोऽतिरावैश्छायेव पक्षस्य घनानरुन्ध ॥४१॥
बभूव कम्प्रा धरणी जलञ्च सोच्छ्वासमासीत् कियता क्षणेन ।
पपात भूमावहिभुक् परेतो जगर्ज जिष्णुर्भुजगोऽतिहृष्टः ॥४२॥
विभीषणः प्राह सखे त्वयाऽद्य दृष्टं यदाश्चर्यमदृष्टपूर्वम् ।
निरर्थमेतन्न कदापि भव्यं नेदं विकल्पः कपटो न माया ॥४३॥
दृष्टं पुरस्ताद् यदवश्यभव्यं प्रपञ्चरूपेण रघूत्तमाद्य ।
लङ्का ह्यवीरा भविताऽचिरेण सौमित्रिबाणानलतापदग्धा ॥४४॥
निवेशमाविश्य रघुक्षितीन्द्रः सौमित्रिमाभूषयदस्त्रशस्त्रैः ।
गृहीतशस्त्रः स दधार शोभां सुपर्वसेनापतितारकारेः ॥४५॥
सतारमामुच्चदयं सुवर्म रत्नोज्ज्वलं खड्गवरञ्च भीमम् ।
सहेमदन्तिद्विजजातचर्म तूणेन पृष्ठेऽजयदर्कबिम्बम् ॥४६॥
वामेन दोष्णा स दधार चापं दिव्यं बलाद् मूर्ध्नि किरीटमाभात् ।
सौरांशुसम्पन्नमिवातिदीप्रं यस्य प्रभाभिः ककुभोऽचकासुः ॥४७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननर्त्त चूडा मुकुटोपरिष्टात् सटेव कम्रा पशुराजपृष्ठे ।
सुसज्जितः सोऽतिविवृद्धतेजा मध्याह्नमार्त्तण्डनिभो व्यलोकि ॥४८॥
बली स वेगाच् शिविरादयासीद् धावन् यथाऽश्वः श्रुतशृङ्गनादः ।
युद्धाय वीराय भविष्यतेऽयं विभीषणस्तस्य बभूव सध्रयङ् ॥४९॥
ववर्ष पुष्पाणि सुरो ननाद माङ्गल्यतूर्यं दिवि देवनार्यः ।
अनर्त्तिपुर्विश्वमवाप मोदं ज्ञात्वा निपातं युधि देवशत्रोः ॥५०॥
पूर्णा त्रिलोकी जयघोरघोषैः कृताञ्जली राघव आह वीक्ष्य ।
नभोऽम्ब याचे शरणं पदाब्जं मा विस्मरैनं तव दीनदासम् ॥५१॥
कियन्ति दुःखानि मया गतानि धर्माय मातः सकलानि वेत्सि ।
प्रयच्छ धर्मस्य फलं महेशि त्वभाजनं रक्ष मृधे कराले ॥५२॥
निहत्य दुर्वृत्तनृशंसदैत्यान् देवानरक्षो बहुधार्त्तभीतान् ।
प्रसीद रक्षैनमसुप्रियं मे युद्धेऽभये भ्रातरमाद्यं यातून् ॥५३॥
एवं स तुष्टाव रघूत्तमस्तां देवीं स्तुतिन्तां समुवाहयद्द्यौः ।
कैलासमाश्वाशुगतिः सुगन्धं यथाऽहसद्देवपतिश्च नाके ॥५४॥
श्रुत्वार्त्तिपूर्णं स्तवनञ्च तस्य नगेन्द्रकन्या मुदमाप्य वह्नीम् ।
तथाऽस्तु सम्भाष्य रघूत्तमं सा गोर्भिः प्रशान्ताभिरनेष्ट सान्त्वम् ॥५५॥
ऊषोदयाद्रौ समुदैद्धसन्ती तमोपहाशेव हृदः सुखाकृत् ।
खगा अकूजन् मधुरं निकुञ्जे भृङ्गा दधावू रुचिरं स्वनन्तः ॥५६॥
गता सतारा रजनी सुमन्दमूषाललाटे शुशुभेऽतिदीप्रम् ।
नक्षत्रमेकं कुसुमञ्च तस्याः कोशेषु पुस्फोट भराजिकल्पम् ॥५७॥
रक्षोवरं प्राह पुनश्च रामः प्रयाहि मित्रावहितोऽतियत्तः ।
अमूल्यरत्नं निहितं करे ते त्वमद्य मे जीवितमृत्युनाथः ॥५८॥
आश्वास्य तं प्राह विभीषणोऽपि मा भैः* प्रियादित्यसुरेशपूज्य ।
सौमित्रिरायोधनमूर्ध्नि नूनं हनिष्यतीन्द्रद्विषमेहि धैर्यम् ॥५९॥

---

* भूरिप्रयोगानुरोधादर्वाचीनैर्वैयाकरणैरेतस्य साधुत्वमभ्युपगतम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रणम्य सौमित्रिरगात् पदाब्जे रामस्य मित्रेण विभीषणेन ।
शनैर्वृतौ तौ तमसाऽद्रिशृङ्गं प्रातर्यथा जग्मतुरिष्टलङ्काम् ॥६०॥
यत्रास्त पद्मा कमलासने श्री रक्षःकुलेन्द्रस्य वधूः सुवेशा ।
मायाऽविशत् स्वर्णनिकेतनं तत् पृष्ट्वा च लक्ष्म्यागमनस्य हेतुम् ॥६१॥
स्मेराऽनना प्रत्यवदन्महेशी तेजोऽम्बुधेः संवृणु कन्यकेऽद्य ।
सौमित्रिराविश्य सुवर्णधाम हनिष्यतीन्द्रद्विषमिष्टिगेहे ॥६२॥
तेजस्विनि त्वं प्रलयाग्नितेजाः प्रवेष्टुमेतन्नगरं क ईशः ।
प्रसीद देवेशि मुकुन्दजाये त्रायस्व रामं कृतधर्मपुञ्जम् ॥६३॥
निश्वस्य दीर्घं समुवाच पद्मा कस्यापि नाज्ञा तव लङ्घनीया ।
तथापि देवेशि रुदन्ति तप्ताः प्राणाश्च मे राक्षसभूपदुःखैः ॥६४॥
सौमित्रिमाख्याहि पुरं प्रवेष्टुं *निर्भीकचित्तं वरमर्षयामि ।
युद्धे स नूनं निहनिष्यतीशे परन्तपं मेघनिनादमुग्रम् ॥६५॥
विनिर्ययौ सा नगरान्नृपश्रीः प्रत्यूषकाले शिशिरार्द्रपुष्पम् ।
फुल्लं यथा फुल्लहृदा च देव्या शुष्का तदा मङ्गलचिह्नरम्भा ॥६६॥
माङ्गल्यकुम्भः सहसा बिभेद निनाय तद्वारि विशेषमुर्वीं ।
तेजश्चयः पादसरोजमापत् प्रातः खरांशुं शिशिरांशुरेवम् ॥६७॥
लङ्कास्त हीनद्युतिरस्तरत्ना सर्पीव मेघाश्च भृशं जगर्ज्जुः ।
ररास सिन्धुर्वसुधा चकम्पे दुःखेन तेऽष्टापदशोभिलङ्के ॥६८॥
प्राचीरमारुह्य समीपवर्त्ति-सौमित्रिमालोकयतामुभे वा ।
तमोवृतं देवमशीतरश्मिं किंवाऽनलं धूमशिखावलुप्तम् ॥६९॥
विभीषणोक्तं पवनं व साग्निं दुर्वारमाजौ विनिरीक्ष्य ते तम् ।
आस्तां समुत्के कथमिन्द्रशत्रुं संत्रास्यतेऽनेन रणे जने कः ॥७०॥
व्याघ्रो यथा वीक्षितकृष्णसारो दूरे वने धावति गुल्मगुप्तः ।
सौमित्रिरेवं जितशक्रशत्रुं हन्तुं ययौ ग्राह इवावगाढम् ॥७१॥

---

* ईदृशेषु स्थलेषु तुमुनः प्रयोगः कालिदासादिमहाकविसम्मत एव ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निश्वस्य दुःखेन विसृज्य मायां देवीन्दिरेयाय गृहं स्वकीयम् ।
रुरोद पद्माऽश्रु भुवा विलुप्तं शुक्त्येव मुक्ताजनिका सुवृष्टिः ॥७२॥
मायाबलेनाथ विवेश वीरद्वयी पुरं द्वारमभूच्च मुक्तम् ।
सौमित्रिसङ्गेन परिप्रणादं श्रुतो न केनापि स भीमनादः ॥७३॥
मायाच्छलेनातिविमूढचित्ता रक्षोगणा मृत्युसमं न जज्ञुः ।
वीरद्वयं तत्र समागतं हा विवेश सर्पः कुसुमं सुगुप्तम् ॥७४॥
ददर्श सौमित्रिरतीव चित्ते सविस्मयो द्वारि बलं प्रमत्तम् ।
तुरङ्गमातङ्गरथाधिरूढमजेयमाजौ बलगर्वदृप्तम् ॥७४॥
अधृष्यमालोक्य रणोन्मदं तद् बलं सदेवासुरदैत्यशङ्कम् ।
शनैः शनैरेव सुवीरयुग्मं सजोषमालोकयदुच्चहर्म्यम् ॥७६॥
प्रासादमुद्यानमगण्यमुत्सं सरांसि शालाः करिघोटकानाम् ।
रथांश्च नाट्यालयमस्त्रशालामपश्यतां तौ सुरवैरिपुर्याम् ॥७७॥
लङ्का समृद्ध्या जितदेवधामा संख्यातुमस्या विभवो न शक्यः ।
निर्णेतुमृक्षं नभसश्च रत्नं रत्नाकरस्थं क इह प्रभुः स्यात् ॥७८॥
मध्येपुरं राजगृहाणि वीरः प्रैक्षिष्ट मुक्ताफलवज्रयुक्ति ।
चूडा यदीया गगनस्पृगासीन् मेरोः शिरः श्रेणिरिवातिचार्वी ॥७९॥
मातङ्गदन्तः सह हेमकान्त्या मुखे गवाक्षस्य चकास्ति रम्यम् ।
तुषारराशाविव सौरभानुः प्रातर्दृशोस्तर्षण ईक्षकाणाम् ॥८०॥
यशस्विसौमित्रिरुवाच मित्रं विभीषणं धन्य इहाग्रजस्ते ।
लोके महिम्नां स हि सिन्धुरेको नेदृक् समृद्धिर्जगतीक्ष्यतेऽस्मिन् ॥८१॥
विभीषणः प्राह विषण्ण एतत् सर्वं हि सत्यं यदवक् नृसिंह ।
पृथ्व्यां न कस्यापि समृद्धिरीदृक् तथापि सम्पच्चपलातिलोला ॥८२॥
एकः प्रयाति विलयन्त्वपरः समेति रीतिर्भुवो जलनिधेरिव वीचिवीथिः ।
वीर त्वरस्व जहि तूर्णमवध्यवीरमिन्द्रारिमाप्नुहि यशोऽमरतानिदानम् ॥८३॥

इति श्रीमेघनादवधे महाकाव्ये लक्ष्मणस्य लङ्कानिरीक्षणं नाम सप्तदशः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्ता

प्रथमः परिच्छेदः

पुरा हुगलिशाखाविद्यालयस्य प्रधानाध्यापकमहोदयेन ये तावत् त्रयश्छात्रा विद्यालयस्य रत्नत्वेन विनिर्दिष्टास्ते प्रतिदिनमेव भिन्नेभ्यस्त्रिभ्यो ग्रामेभ्यः क्रोशसम्मितं पन्थानं पादचारेणातिक्रम्याध्ययनायागच्छन्ति स्म। अहो! कियद्वा नासीत् त्रयाणां परस्परं प्रेम। न खलु तथाविधं दिवसमेकमप्यासीद् यस्मिंस्त्रय इमे सखायो विद्यालयमागच्छन्तो मध्येमार्गं खल्वाटवटवृक्षस्याधस्तादमिलित्वा पाठशालां प्रविविशुः। त्रयाणामेव गृहाणि हुगल्याः पश्चिमतोऽवस्थितानि। जगदीशस्तावत् सरस्वत्याः सङ्गमं समतिक्रम्य दिघडाग्रामादागच्छति स्म, वनमालिरासविहारिणौ चानन्तरवर्तिभ्यां ग्रामाभ्यां कृष्णपुरराधापुराभ्याम्। यथा हि जगदीश एव सर्वेषु मेधावितम आसीत्, तथैव तस्यार्थिकी परिस्थितिरपि हीनतमैवासीत्। तस्य पिता तावद् ब्राह्मणपण्डितः, याजनं कृत्वा विवाहोपनयनादिषु च पौरोहित्यं विधाय कथञ्चित् सांसारिकव्ययं निर्वाहयति स्म। वनमालिनः परिवारस्तु समृद्ध एव, तस्य पिता सर्वत्रैव कृष्णपुरस्य माण्डलिक इति समाख्यायते स्म। रासविहारिणः परिवारस्याप्यार्थिकी परिस्थितिः समीचीनैवासीत्। क्षेत्रं वित्तं कृष्यादिकम्, उद्यानतटाकम्—यस्मिन् स्थिते ग्रामे लीलयैव संसारयात्रानिर्वाहो भवति—तत् सर्वमेवासीत्। सत्स्वपीदृशेषु विभवेषु कस्मिंश्चित् पत्तने गृहमभाटकित्वा, वात्या वा भवतु वृष्टिर्वा भवतु शीतातपं सममेव शिरसा विधूय, एतावन्मार्गं पद्भ्यामतिक्रम्य यत् प्रतिदिनं गृहाद् विद्यालये गमनागमनं कुर्वन्ति बालास्तत्र बीजमेतदेव यत्—तदानीं कावपि पितरौ पुत्राणामीदृशक्लेशस्वीकरणं कथमपि क्लेशत्वेन न पर्यगणयताम्। प्रत्युत न खल्वियन्मात्रमायासमन्तरेण सरस्वती वश्यतामियादित्येवासीत् तेषां द्रढी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यान् प्रत्ययः। यद्वा तद्वा भवत्वत्र बीजम्, एवमेव बालकत्रितयं प्रवेशिकां परीक्षां समुत्तीर्णम्। प्रतिदिनमेव वटवृक्षस्याधस्तात् समुपविष्टैस्तैर्विधीयते स्म प्रतिज्ञा, यावज्जीवं कदापि न पृथग्भविष्यामः, विवाहं नैव विधास्यामः, व्यवहाराजीवत्वं चावलम्बमानास्त्रय एवैकस्मिन् भवने निवत्स्यामः, अर्थं समुपार्ज्य निखिलमेवार्थमेकस्यामेव पेटिकायां रक्षिष्यामः, तेन च देशहितं साधयिष्याम इति।

एतत् तावद् बालानां मनोरथविजृम्भणम्। यत् खलु न मनोरथमात्रं परं सत्यं तदन्ततः कीदृशं सञ्जातमित्येवेदानीं विव्रियते। साम्प्रपदीनस्य प्रथमो ग्रन्थिः शिथिलतामभजत् बी. ए. श्रेण्याम्। तदानीं कलिकातायां केशवसेनस्य प्रचण्डः प्रतापः प्रोल्लसति स्म। तस्य व्याख्यानानां भाषणानां च विलक्षणो वेगः। न खलु तं वेगं प्रबभूव ग्रामीणं बालकत्रयं प्रतिरुध्यात्मानं पर्यवस्थापयितुम्—स्रोतोवेगेन दूरत एव ते नीताः। कामं स्रोतसा नीता एव ते, तथापि वनमालिरासविहारिणौ यथा प्रकाशमेव गृहीतदीक्षौ ब्राह्मसमाजान्तर्निविष्टौ सञ्जातौ, न खलु प्रबभूव जगदीशस्तथा विधातुम्। कामं स तेषु मेधावितमस्तथापि नितान्तत एव दुर्बलचेताः। तत्र च तस्य ब्राह्मणपण्डितः पिता तदानीमपि जीवित एवासीत्। इतरयोस्तु तथाविधः कोऽप्यन्तरायो नावर्तत। कियतश्चित कालात् पूर्वं परलोकं प्रस्थिते पितरि वनमाली तदानीं कृष्णपुरस्य माण्डलिकः, रासविहारी च राधापुरीयायाः समग्रायाः सम्पद एकातपत्रः सम्राट्। अतश्च स्वल्पेनैव समयेन सखायाविमौ ब्राह्मकुले विनिर्वृत्तविवाहौ विदुष्यौ भार्य्ये परिगृह्य स्वभवनं प्रत्यावृत्तौ। परं दरिद्रस्य जगदीशस्य तथाविधं सौकर्यं नाभवत्। तेन हि निरुपायतयाऽनिच्छतापि यथाकालं व्यवहारशास्त्रीयां परीक्षां समुत्तीर्य कस्यचन मध्यवित्तस्य ब्राह्मणस्यैकादशवर्षीयां कन्यकां परिणीयार्थोपार्जनार्थं प्रयागं प्रति प्रस्थितम्। यौ तावत् तत्र स्थितौ यत् किल कार्यं कलिकातायामेकान्ततः सुशकमेव प्रत्यभात् तद् ग्रामे प्रत्यावृत्तयोस्तयोरतिमात्रं दुःसाधमेवाभाति स्म। वधूजनस्तावच्छ्वशुर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवनमागत्य नैवावगुण्ठनेन संवृणोति वदनकमलम्, उपानत्-पादत्राणादि-प्रावृतपादो रथ्यासु निर्गच्छति इति कौतुकसन्दर्शनाय पञ्चभ्यो ग्रामेभ्यो ग्रामीणा महता संमर्देन तत्र समायाताः। समग्रं च ग्रामं परिव्याप्य तथा-विधः कदर्यो जनवादकोलाहलः संप्रवृत्तो यथा नितान्ततो निरुपायमन्तरेण कोऽपि न प्रभवति सपत्नीकस्तत्रावस्थातुम्। उपायसद्भावाद् वनमाली ग्रामं परित्यज्य कलिकातामागत्य तत्रैव निवासमकल्पयत्, केवलायां च भूस-म्पद्यनाश्वस्तो वाणिज्यमपि प्रारब्धवान्। रासविहारिणः पुनर्धनागमः स्वल्प एव। अत एव स स्वं पृष्ठमेकेन विदुष्याश्च भार्यायाः पृष्ठमपरेण शूर्पेण समा-वृत्य कथमपि जन्मस्थान एवाव्यवहार्योऽवतस्थे। अतश्चैषां त्रयाणां मित्राणामेकस्य प्रयागेऽपरस्य राधापुरेऽन्यस्य च कलिकाताया-मवस्थानादामरणमविवाहितैरेकस्मिन्नेव भवने निवसद्भिरेकस्यामेव पेटिकायां सञ्चितद्रव्यैर्दशोद्धरणप्रतिज्ञापाततः पिहितैवातिष्ठत्। यश्च स्थाणु-र्न्यग्रोधपादपः साक्षिभूतोऽवर्तत स हि कस्मिन्नपि कमपि दोषमनारोप्य मन्ये तूष्णीमेवान्तर्हसति स्म। इत्थञ्च बहूनि दिनानि व्यतीतानि। यद्यपि मित्राणाममीषां कदाचिदेव कथञ्चित् साक्षात्कारः समपद्यत तथापि न खलु सर्वथा तिरोहितोऽसौ बाल्यप्रणयः। यदा तावज्जग-दीशस्य पुत्रः समजनि तदा प्रयागाद् वनमालिने शुभवृत्तान्तमिमं विज्ञाप-यता तेन विलिखितम्, तव चेत् तनया सञ्जायेत तामेव पुत्रवधूत्वेन वृत्वा बाल्ये समाचरितस्य पातकस्य कथञ्चित् प्रायश्चित्तं विधास्यामि। न खलु मुहूर्तमात्रं विस्मृतं मया यत्तवैव कृपया व्यवहाराजीवो भूत्वा सुखं निव-सामीति।

वनमालिना चोत्तरं लिखितम्—सम्यक्। दीर्घायुर्भूयात् ते कुमारः। परं मम तनयालाभस्य लेशतोऽपि सम्भावना नास्ति। तथापि मङ्गल-मयस्यानुकम्पया कदापि तनया चेज्जायेत तुभ्यमेव प्रदास्यामि। विलिख्य पत्रमात्मगतं जहास वनमाली। वत्सरद्वयात् पूर्वं रासविहारिणोऽपि पुत्रजन्मतः परमेवंविधैव विहिताऽभ्यर्थनेति। वणिग्वृत्तिप्रसादेन साम्प्रत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मसौ धनिकधौरेयः संवृत्तः, अत एव सर्व एव तदीयां तनयां स्वगृहमानेतु-मुत्कण्ठन्ते ।

द्वितीयः परिच्छेदः

न खलु मासद्वितयं मासषट्कं वा व्यतीतम्, इदानीं विंशतिवर्षानन्तर-वर्ती वृत्तान्त उपवर्ण्यते । वनमाली वृद्धभावमुपगतः । कतिचिद्वर्षाणि निरन्तरमामयाक्रान्तोऽसौ साम्प्रतं शय्यासमाश्रितः प्रतीतवान्, नेतः पुन-रुत्थानं मे स्यादिति । स हि शैशवात् प्रभृति भगवत्परायणो धर्मभीरुश्च । न खलु मरणादसौ बिभाय । केवलमेककस्य सन्तानस्य विजयाया विवाह-विधेर्निर्वर्तनायावकाशो नैवालम्भीति विचिन्त्य कथञ्चिद्विक्षुब्ध-मस्य मानसम् । तस्मिन् दिनेऽपराह्णसमये सपदि विजयाया हस्तं स्वह-स्ताभ्यन्तरे स्थापयित्वाऽवदत्, वत्से, न खलु पुत्रो मे नास्तीति लेशतोऽपि दुःखमनुभवामि । त्वमेव मे सर्वम् । यद्यपि न खल्विदानीमप्यष्टादश वर्षाणि ते पूर्णानि, तथापि क्षुद्रस्य ते शिरस उपरि विशालाया अपि सम्पदो भारं विनिक्षिप्य गच्छतो मे न स्तोकमपि भयमुपजायते । माता ते नास्ति, भ्राता ते नास्ति, पितृव्यादिकमपि किमपि नास्ति । तथापि निःसन्दिग्धमेव विजानामि सर्वमेव मदीयमक्षुण्णमेव तिष्ठेत् ; केवलमियमेव मे प्रार्थना—यद्वा करोतु यद्वा भवतु, जगदीशस्तावन्मे वाल्यबन्धुः । ऋणनिर्यातनार्थं कदापि तस्य गृहभवनादिकं न विक्रेतव्यम्, तस्य चैकः पुत्रोऽस्ति – न खलु कदापि प्रत्यक्षीकृतोऽसौ, परं श्रुतं मया—अतीव साधुरयं वत्सः । न खलु पितुरपरा-धेन निराश्रयोऽयं विधीयतामित्येव मेऽन्तिमाऽभ्यर्थना ।

विजया बाष्पावरुद्धकण्ठाऽवदत्, तात, न खलु भवदीयमादेशं कदाप्य-न्यथाकरिष्यामि, यावज्जगदीशमहोदयो जीवति तावद् भवन्तमिव तं बहु मंस्ये । परं परेते तस्मिन् किमिति समग्रां सम्पदं मुधैव तत्पुत्राय समर्पयेयम् । न खलु कदापि तं प्रत्यक्षीकृतवान् भवान्, नाप्यहम् । अथ चेत् सत्यमेवासौ विद्यास्वभिविनीतः, विनैवायासं विनिर्यातयेत् पितुर्ऋणम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वनमाली कन्याया मुखे चक्षुषी संन्यस्यावदत्, वत्से, न खलु स्वल्पं तस्य ऋणम्। स चेद् बालो न प्रभवेदेतद्विनिर्यातयितुम्।

कन्या प्रत्युवाच, यो न प्रभवति, कुसन्तान एवासौ, न खलु तस्मिन्ननुकम्पा प्रदर्शनीया।

सुपरिचित एवासीत् सुशिक्षितायास्तेजस्विन्यास्तनयायाः स्वभावो वनमालिनः। अत एव नैवासौ निरबध्नात्, केवलं दीर्घं श्वासं विसृज्यावदत्, वत्से, सर्वेष्वेव कर्मसु परमेश्वरमेव शिरसि निधाय यथाकर्त्तव्यं विधीयताम्। न खलु तामनुरोधविशेषबद्धां विधातुमभिवाञ्छामि। इत्युक्त्वा मुहूर्त्तं तूष्णीं स्थित्वा पुनरपि निश्वासं विमुच्यावदत्, जानासि वत्से विजये, यदा तावज्जगदीशोऽयं परमार्थत एव मनुष्यपदवाच्य आसीत् तदा तव जन्मतः पूर्वमेव पुत्रार्थं प्रार्थिताऽसि। मयापि वत्से, तथैव प्रतिपन्नम् इत्युक्त्वैव समुत्सुकाभ्यामेव नयनाभ्यामसावपश्यत्।

तस्येयं कन्यका शैशव एव मातृहीना, तेनैव तस्याः पितुर्मातुश्चोभयोरेव स्थानं परिपूरितम्, अत एव पितुः सकाशे मातुरिव सप्रणयं सम्प्रार्थने कदापि सङ्कोचं नान्वभूद्विजया। अत एवोक्तं तया, तात केवलं मौखिकमेव वचस्तस्मै प्रतिपन्नं न पुनरान्तरम्।

किमिति वत्से ?

तथा चेत् सकृदपि तं चक्षुर्भ्यामपि द्रष्टुं कथं नाकामयिष्यथाः।

वनमालिनोक्तम्, यदा तावद्रासविहारिणः श्रुतम्, पुत्रः किलायं मातेव दुर्बलः—किं बहुना, भिषजस्तस्य दीर्घजीवनं लेशतोऽपि नाशंसन्ते, तदा सविधेऽपि वर्त्तमानं तमानाय्य द्रष्टं नोदसहिषि। अस्यामेव कलिकातानगर्यां क्वचन भाटकितभवनेऽवस्थायासौ तदा बी० ए० श्रेण्यामधीतवान्। तत ऊर्ध्वं स्वयमेव तेन तेनाऽऽमयेन समाकुलस्तद्गतं किमपि नाचिन्तयम्। इदानीं पुनः पश्यामि वत्से, तेन मे महती हानिः संपन्नेति। तथापि सत्यमेव ते ब्रवीमि वत्से, तदानीं जगदीशाय त्वामधिकृत्याऽऽन्तरमेव वचनं प्रतिपन्नम्। पुनः किञ्चिद्विश्रम्यावोचत, अद्य तावत् सर्व एव जगदीशम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अकर्मण्यो द्यूतकर इति, अकिञ्चित्करो मद्यप इति विजानन्ति। परम् अयमेव जगदीश एकदा सर्वेष्वेवास्मासु साधिष्ठ एवासीत्। न हि विद्यां वा बुद्धिं वाऽधिकृत्य ब्रवीमि, ते तु बहूनामेव वर्तते, परं न खल्वेवमान्तरं प्रेम कस्मिन्नपि मया प्रत्यक्षीकृतम्। इदमेव तस्य विनाशाय संवृत्तम्। कामं तस्य बहवो दोषाः—जानाम्येवाहं सम्यक्, तथापि यदैव स्मृतिपथमध्यारोहति सहधर्मिण्याः शोकेनोन्मत्तीभूतोऽयम्, तदैव वत्से, तव मातरमनुस्मृत्य मानसं मे तस्मिन् श्रद्धानिर्भरं सम्पद्यते। तस्य पत्नी तावत् सती लक्ष्मीरेवासीत्। मरणावसरे तया नरेन्द्रमाहूय केवलमिदमेवोक्तम्, वत्स, केवलमिदमेवाशासे, परमेश्वरे तेऽप्रकम्प्या श्रद्धा विराजतामिति। श्रुतं किल मया न खलु मातुरिदं पश्चिममाशीर्वचनं नैष्फल्यमभजत्। अस्मिन्नेवाल्पे वयसि नरेन्द्रो मातेव परमेश्वरे श्रद्धातुं शिक्षितवान्। येनैतत् कर्तुं पारितम्, किं तस्येहावशिष्यते वत्से ?

विजयाऽपृच्छत्, किमेतदेवेह श्रेष्ठं कार्यम्, तात ?

मुमूर्षोः स्थविरस्य विशुष्कं नयनं सबाष्पं सञ्जातम्। सहसैव प्रसार्य पाणी कन्यकां वक्षसि समाकृष्यावदत्, एतदेव सर्वेषु श्रेष्ठं कार्यं वत्से। संसारस्याभ्यन्तरे, संसाराच्च बहिः समग्रे ब्रह्माण्डे इतोऽधिकतरं कर्त्तव्यं न विद्यते। स्वयं त्वं कदापि प्रभवसि वा मा वा, वत्से, यस्तावत् प्रभवति, तस्यैव पादयोर्मस्तकं निधेयाः—अहमपि मरणसमयेऽनयैवाशिषा त्वां योजयामि।

अहनि तस्मिन् पितुर्वक्षसि पतिताया विजयाया मनस्यभवत्—कोऽपि नितरां मधुरेण नितरां च प्रोज्ज्वलेन नयनपातेन पितुर्वक्षसस्तदीयवक्षसोऽन्तरतमं प्रदेशमभिवीक्षत इव। एषा चाननुभूतपूर्वाऽतिविचित्राऽनुभूतिरहनि तस्मिन् मुहूर्तकं तां सर्वथा परवशां व्यधात्। वनमालिनोक्तम्—बालकस्य नाम नरेन्द्रः। तस्य पितुर्मुखाच्छ्रुतं स भिषक् सम्पन्नः, परं तेन चिकित्सावृत्तिर्नावलम्ब्यते। स चेदधुनात्र देशेऽवास्थास्यत, अवसरेऽस्मिन् सकृत् तमानाय्य दर्शनसुखमपि तावदन्वभविष्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विजययाऽनुयुक्तम्, स इदानीं कुत्र वर्तते ?

वनमालिनोक्तं तस्य मातुलस्य सविधे सुह्मप्रदेशे। न खल्विदानीं जगदीशः सर्वं समञ्जसतया कथयितुमलम्। तथापि तस्य मुखनिर्गतैरेकद्वैरसम्बद्धैर्वचनैः प्रतीयते मातुरखिलाः सद्गुणाः पुत्रे संक्रान्ता इति। यत्र वा यथा वा तिष्ठतु, जीवतादयं बाल इति भगवन्तमभिप्रार्थये।

समागता सन्ध्या। प्रदीपप्रदानायाऽऽगतेन भृत्येन समावेदिते विलासमहोदयस्यागमनवृत्तान्ते, वनमालिनोक्तम्, त्वं तर्हीदानीं निम्नतलं गच्छ वत्से, अहं किञ्चिद् विश्राम्यामि।

पितुः शीर्षण्यान्युपाधानानि प्रगुणीकृत्य पादयोरुपरिस्थं प्रावरणं यथास्थानं सन्निवेश्य दीपशिखां नयनतोऽपसार्य, निम्नभूमिमवतीर्णायां विजयायां पितुर्जीर्णं वक्षो विदार्य केवलं दीर्घश्वास एको विनिःसृतः। तस्मिन् दिने विलासस्यागमनोदन्तेन दुहितुर्वदनमण्डले या तावदारक्ताभा प्रादुर्भूता सैव वृद्धं व्यथयामास।

विलासविहारी तावद् रासविहारिणस्तनयः। सुचिरमत्र कलिकातानगरेऽवस्थायासौ प्रथमम् एफ्० ए०, ततश्च बी० ए० श्रेण्यामधीते। समाजत्यागात् प्रभृति प्रायेण नैव गच्छति वनमाली जन्मभूमिम्। यद्यपि साकमेव वणिज्यया सम्पद्विवृद्ध्या जन्मभूम्यामपि भूसम्पद् बहुलं विवर्धितैव, तथापि तस्याः सर्वस्या योगक्षेमवहनभारो बाल्यबन्धो रासविहारिण एवोपरि समर्पित आसीत्। तेनैव सूत्रेण विलासस्यास्मिन् गृहे गमनागमनं प्रवृत्तमिदानीं यत् कारणान्तरे पर्यवसितं तदुपरिष्टाद् व्यक्तीभविष्यति।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वररुचिविरचिता

लिङ्गवृत्तिः

पूर्वानुवृत्तिः

मथुरा तनुस्तनूर्वर्त्तिनी च सूची यवागूः ।
***वसीर्णिकानिकाशाशर्कराः स्त्रियां पुंसि तर्कश्च ॥७२॥**

एते स्त्रियां भवन्ति । इयं मथुरा नगरी । तनुः शरीरम्, तनूस्तदेव । वर्त्तिनी काष्ठोद्भवं शब्दसाधनम्† । सूची मूलं पापस्य । यवागूः अन्नविकारः । वसर्णिका मणिः(?) । निकाशा कर्षविकारः । इयं शर्करा गुडविकारः । तर्कः पुंसि भवति । अयं तर्कः ऊहः । चशब्दः पादपूरणे ।

बन्धुरविषाण[योस्त्रिकं भवेत् पल्वलं तृतीयं स्यात् ।]

[त्रिकमिति लिङ्गत्रितयम् । बन्धुरः, बन्धुरा, बन्धुरम् उत्तप्तमांसम् ।] इदं विषाणम् । इयं विषाणा । शृङ्गम् । पल्वलं तृतीयं नपुंसकमित्यर्थः । इदं पल्वलमल्पसरः ।

शकटोशीरकुतूहलशरावबृन्दानि नपुंसकानि‡ जानीहि ॥७३॥

एतानि नपुंसकानि जानीहि । इदं शकटं यानम् । इदमुशीरं वीरणमूलम् । कुतूहलं कौतुकम् । शरावं मृन्मयभाजनम् । बृन्दं समूहः ।

यूकोल्काशुक्त्योषधिवर्त्तिभ्रुकुटयः स्त्रियामुदिताः ।

इयं यूका मस्तककृमिः । उल्का सङ्घातद्वयम्, दग्धकाष्ठञ्च । शुक्तिर्जल-

* सरणीनि—आ०

† "वर्तिनी प्रत्ययम्" इत्यादर्शे ।

‡ नपुंसकानि—नास्ति मुद्रिते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्भवा। ओषधिः फलपाकान्तो वृक्षविशेषः। वर्त्तिर्दीपस्य। भ्रुकुटि-भ्रंभङ्गः पुष्परचना वा।

वाल्मीक्यध्वरनिर्यूहव्यूहमुस्तकाः पुंसि कुम्भश्च ॥७४॥

वाल्मीक्यादयः पुंसि भवन्ति। यथा—वाल्मीकिः ऋषिर्मृत्कूटश्च। अयमध्वरो यज्ञः। निर्यूहश्चन्द्रपाणिः(?)। व्यूहः समूहः प्रभूतः। मुस्तको गन्धद्रव्यम्। कुम्भो घटः।

केयूरतरलतूर्याङ्गदानि नित्यं नपुंसके विद्धि। पुंसि गवाक्षः

एतानि नपुंसके जानीहि। गवाक्षः पुंसि। यथा—इदं केयूरं बाहु-भूषणम्। इदं तरलमलङ्कारः। तूर्यं वादित्रम्। अङ्गदं बाहुभूषणम्। अयं गवाक्षो वातायनः।

श्यामा स्त्रियां* भुशुण्डी च भाण्डी च ॥७५॥

एते शब्दाः स्त्रियां भवन्ति। इयं श्यामा। इयं भुशुण्डी आयुधम्। भिण्डी [भाण्डी] भिन्दिपालः।

भवतोऽपजनोपपदोङ्गपदौ†पुंसि नित्यमिमनिच्च।

अपोपपदः अङ्गशब्दः, जनोपपदः पदशब्दः पुंसि भवति। अयमपाङ्गो नेत्रप्रान्तः। जनपदो लोकः। रतो हलाङ्क देर्लघोः [पा० ६।४।१६१] इति रेफादेशः। इमनिच्प्रत्ययान्ताः पुंसि भवन्ति। अयं प्रथिमा गरिमा लघिमा द्रढिमा इत्येवमादयः।

---

* च भाण्डी भुशुण्डी च—मु। † भवत्यपजनोपपदोऽङ्गपदः—आ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वङ्क्षणकोष्ठश्रेषाश्च सह निपातोपसर्गाभ्यां पुंसि ॥७६॥

एते पुंसि भवन्ति। अयं वङ्क्षणः, तनुस्थानम्। कोष्ठो हरिशाला(?)। श्रेषः *अन्तादयः (१)। निपातश्चादिः। उपसर्गः प्रादिः।

स्थावराणञ्-य-यच-छ-ढक्-यक्-वुञस्तु यदि वा भावे।
कर्मणि स्युस्तदेषां नियतं नपुंसकत्वं जानीहि ॥७७॥

अण् अञ् य यत् छ ढक् यक् वुञ् च। एते प्रत्यया भावे कर्मणि च। यदि भावे स्युस्तदा तदन्तानां नपुंसकत्वं जानीहि। यथा—हायनान्त-युवादिभ्योऽण् [पा० ५।१।१३०]। द्विहायनस्य कर्म भावो वा द्वैहायनम्। यूनो भावः कर्म वा यौवनम्। नस्तद्धिते [पा० ६।४।१४४] इति नलोपे प्राप्ते अन् [६।४।१६७] इति प्रकृतिभावः। स्थाविरम्। याजमानम्। इगन्ताच्च लघुपूर्वात् [पा० ५।१।१६१] इत्यण्। मृदोर्भावः कर्म वा मार्दवम्। पाटवम्। लाघवम्। आर्जवम्। अण्। प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् [पा० ५।१।१३०] अश्वस्य भावः कर्म वा आश्वम्। गार्दभम्। वयोवचनात् कौमा-रम्, शैशवम्। उद्गात्रादेः। इदमौद्गात्रम्। सख्युर्यं [पा० ५।१।१२६] इति यः। सख्युर्भावः कर्म वा सख्यम्। स्तेनाद् यन्नलोपश्च [पा० ५।१।१२५] इति यत्प्रत्ययः। स्तेनस्य भावः कर्म वा स्तैन्यम्। होत्राभ्यश्छः† [पा० ५।१।१३४] होतुर्भावः कर्म वा होत्रीयम्। पोत्रीयम्। औद्गात्रीयम्। दुहित्रीयम्। कपिज्ञात्योर्ढक् [पा० ५।१।१२७] कपेर्भावः कर्म वा कापेयम्। पत्यन्त-

---

* अन्यादय—आ
† होत्रादिभ्यश्छः—आ

(१) अन्तो रुक् नाशय—पृथ्वीश्वरः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

EXTRACTS FROM OPINIONS

ON

CHHANDOGYAMANTRABHASHYA

EDITED BY

DURGAMOHAN BHATTACHARYYA, M. A,

Kāvya-Sāṅkhya-Purāṇatīrtha

With a Foreword

BY

Mm. Dr. GANGANATH JHA

Published by the Sanskrit Sahitya Parishad.

(Price—Rs. 3-12 ; for Members—Rs. 3 only)

1. Mahamahopadhyaya **Dr. Haraprasad Shastri** (wrote in the *Indian Historical Quarterly*):

It has all the excellences of a commentary—clear, concise, expressive and lucid. The editor's work has been done with great care, accuracy and thought. The Samavedin will certainly be thankful to Durgamohan Bhattacharyya for his numerous appendices and indices.....he has done a scholar's work.....and therefore deserves thanks from every one who has any pretence of scholarship.

2. **Prof. F. W. Thomas** (Boden Professor of Sanskrit, Oxford) :

You have produced a good edition with careful citation of various readings and useful Indexes.....Your Introduction contains a valuable account of the work and its

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(Opinions continued.)

author whose date is satisfactorily settled. Your discussions show that you have carefully studied the writings of earlier scholars including Winternitz, Oldenberg and Stönner and that you bring critical ability to bear on them.

3. **Prof. M. Winternitz** (Prague) :

This is a highly interesting Vedic text, the commentary and the Indices are very useful.

4. **Prof. A. B. Keith** (Regius Professor of Sanskrit, Edinburgh) :

I am glad the work is now adequately edited and provided with the necessary indices which are indispensable for the utility of texts of this kind. The work seems to have been carefully and competently executed and to serve a useful purpose.

5. **বসুমতী**—"...এই সর্ব্বাঙ্গসুন্দর পুস্তকখানি যেমন আনুষ্ঠানিক হিন্দুর পক্ষে পরমোপযোগী হইবে, তেমনই বেদবিদ্যানুশীলন-তৎপর ইতিহাস-জিজ্ঞাসুর পক্ষে আদরণীয় হইবে। ভাষ্যকারের বঙ্গীয়ত্ব-হেতু এই গ্রন্থ বাঙ্গালীর গৌরবের বস্তু। তথ্যপূর্ণ ভূমিকা-রচনা, অত্যাবশ্যক অনুক্রমণিকা-সন্নিবেশ এবং সুনিপুণ গ্রন্থ-সম্পাদনের দ্বারা সম্পাদক মহাশয় তাঁহার বিদ্যাবত্তা, শ্রমশীলতা ও সাবধানতার পরিচয় দিয়াছেন।"

সংস্কৃত-সাহিত্য-পরিষৎ-পত্রিকায় বিজ্ঞাপনের হার

কভার ২য় বা ৩য় পৃষ্ঠা	(সম্পূর্ণ)	মাসিক	... ...	৮৲
"	(অর্দ্ধেক)	"	... ...	৪৷৷০
"	(এক-চতুর্থাংশ)	"	... ...	২৷৷০
কভার ৪র্থ পৃষ্ঠা		"	... ...	১০৲

বিজ্ঞাপন অনেক দিনের জন্য হইলে বিশেষ হার পত্রদ্বারা জ্ঞাতব্য।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073

Vol. XVIII, No. 7] [November, 1935.

१८५७ शकीये कार्त्तिके १८श-वर्षस्य ७म-सङ्ख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्, श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्

Foreign price—7s.

Printed and Published by

Dinabandhu Sahityashastri

The Sanskrit Sahitya Parishad, 17, R. G. Kar Road, Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिकाता ओरियेण्टाल सिरिज

१। **युक्तिकल्पतरुः**—महाराजश्रीभोजविरचितः। पण्डितश्रीईश्वरचन्द्रशास्त्रिसांख्य-वेदान्त-न्याय-दर्शनतीर्थेन संशोधितः। अत्र राजनीतिः, गृह-दुर्ग-नगरादिनिर्माणम्, कृत-ध्वजचामरालङ्कारादिनिर्णयः, मणिरत्नाश्वगजादिपरीक्षा, शस्त्र-नौका-यानादिलक्षणानि च सविशेषं निरूपितानीति तत्तद्विषयमनुसन्धित्सूनां महोपयोगोऽयं ग्रन्थः—२॥०

२। **चाणक्यराजनीतिशास्त्रम्**—विद्वद्वर-जोहान् फ्रान् स्यानेन-कृताङ्गलभूमिका-समेतम्—॥=०

३। **मुक्ताफलम्**—बोपदेवविरचितम् हेमाद्रिकृतटीकासहितम् वैष्णवानामत्युपादेयतया परिगृहीतं भागवततत्त्वरत्नमिदं डाः श्रीनरेन्द्रनाथ लाहा, पि-एइच. डि. लिखितबृहदाङ्गल-भूमिकया समलङ्कृतम् खण्डद्वयात्मकम्—६

४। **चाणक्यकथा**—रविनत्तकविरचिता। विशाखदत्तकृत-मुद्राराक्षससंवादिनीयं कथा सुललितपद्यमयी (द्वितीयाङ्कनाहत्तिः)—१

५। **वक्रोक्तिजीवितम्**—श्रीराजानककुन्तलविरचितं स्वोपज्ञवृत्तिसमेतमतिप्रमाणभूत-मलङ्कारशास्त्रम्, डाः श्रीसुशीलकुमार दे, डि. लिट्. महोदयेन संशोधितम्—३॥०

६। **पद्मपुराणम्**—स्वर्गखण्डस्य पञ्चाध्यायात्मकः शकुन्तलोपाख्यानम् पातालखण्डस्यैका-दशाध्यायात्मक-रघुवंशवर्णनञ्चाव बङ्गदेशोपलब्धहस्तलिखितमादर्शमाश्रित्य संशोधितमध्यापक-श्रीहरदत्तशर्म्मणा सुबृहदाङ्गलभाषामयभूमिकायां प्रमाणीकृतञ्च कालिदासीयशकुन्तल-रघुवंशयोर्बीजभूतत्वं पद्मपुराणस्य—२

७। **जयमङ्गला**—श्रीशङ्कराचार्यविरचिता। ईश्वरकृष्णकृतसांख्यसप्ततिग्रन्थस्य टीकेयं श्रीहरदत्तशर्म्मणा संशोधिता—२

८। **योगचिन्तामणिः**—श्रीशिवानन्दसरस्वतीकृतिरतिप्राचीनो ग्रन्थोऽयं योगशास्त्रा-ब्धिरिति शक्यते वक्तुम्—२

९। **ब्रह्मसूत्रम्**—श्रीमद्भागवतभाष्यसमेतम्। "अर्थोऽयं ब्रह्मसूत्राणां श्रीमद्भागवताभिधः" इति गारुडवचनस्य याथार्थ्यं प्रदिदर्शयिषता पण्डित-श्रीहरि-दासविद्यावागीशेनात्र श्रीमद्भागवतग्रन्थादुद्धृता ग्रन्थांशब्रह्मसूत्रभाष्यतया निरूपिताः, ब्रह्मसूत्राणि च बङ्गभाषया विशेषेण व्याख्यातानि—२॥०

प्राप्तिस्थानम्—
कलिकाता ओरियेण्टाल बुक एजेन्सी
९ पञ्चानन घोष लेन, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

November, 1935. | १८५७-शकीये कार्त्तिके १८श-वर्षस्य ७म-संख्या | Vol. XVIII No. 7

मतिमञ्जरी

हा हन्त ! विषमतमः किलायं समयः समापतित आर्याणाम्। साम्प्रतं न केवलमनार्या एवाऽऽर्याणां प्रातिकूल्यं समाचरन्ति, आर्यवंशे समधिगतजन्मानोऽपि सनातनधर्मसमुन्मूलनाय प्राणानपि पणीकुर्वन्ति। ये तावद्विनिन्दन्ति वेदान्, प्रतिक्षिपन्ति पुराणानि, समुत्सारयन्ति स्मृतिशास्त्राणि, तिरस्कुर्वन्ति तन्त्राणि, स्वमनीषिकयैव च समुद्भावितं स्वैराचारं परमं धर्मं समाकलयन्तस्तस्यैव संस्थापनार्थं महीयांसमुद्यममादधति, स्वनासिकाच्छेदनपुरःसरमपरयात्राप्रतिरोधन्यायञ्चानुसरन्तः स्वप्राणपरित्यागोपन्यासेन स्वधर्मात् प्रच्यावयन्ति धर्मधनानृजुधियः, त एवेदानीं नेतृपदमधितिष्ठन्ति, त एव च तर्जनीसंकेतेनार्यसमाजं परिचालयितुं समीहन्ते। ये तावत् प्रतिपादविक्षेपं परोलक्षान् प्राणिनः परेतभूमिं प्रापयन्ति, ये च गान्धिमहोदयस्यानुशासनं शिरसि कुर्वन्तः सञ्जाताङ्कुरानेव सजीवांश्चणकान् सञ्चर्वयन्ति, ये च सर्वविधपशुपक्ष्यादीनां नवनवेन मांसजातेन रसनां परितर्पयन्ति तेषामेवेदानीं शास्त्रविहितपशुविशसनसन्दर्शनेन विदीर्यन्त इव हृदयानि, प्रतिष्ठन्त इव च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राणाः, निरर्गलं च विगलन्ति बाष्पवारीणि नयनेभ्यः। धर्मैकसारास्तु भारतीयाः—

नाकस्माच्छाण्डिलीमाता विक्रीणीते तिलैस्तिलान।
लुञ्चितानितरैस्तस्माद्धेतुरत्र भविष्यति॥

इति पञ्चतन्त्रोक्तं श्लोकमनुस्मरन्तो नांशतोऽपि श्रद्दध्युरमीषां वचनजालेषु। न खलु विस्मर्यतामीभिः संस्कारकस्मन्यैर्यद् धर्मबुद्ध्या देवताभ्यः पशून् बलित्वेनोपकल्पयन्तोऽपि धार्मिका न लेशतोऽपि सौनिकसमकक्षतावगाहन्त इति। तथाचोक्तं कविकुलचूडामणिना कालिदासेन—

सहजं किल यद्विनिन्दितं न हि तत् कर्म विवर्जनीयम्।
पशुमारणकर्मदारुणोऽप्यनुकम्पामृदुरेव श्रोत्रियः॥ इति।

साम्प्रतं किल बङ्गीयशिक्षासचिवमहोदयेन राजकीयसंस्कृतमहाविद्यालयः कलिकातामाद्रासा च प्रेसिडेन्सीमहाविद्यालयस्यैव शाखाप्रशाखारूपेणावस्थापयितुमिष्येते इति बहुलीभूतेयं किंवदन्ती। तथाच प्रत्ययिततमेन केनचन वृत्तान्तपत्रेणोद्घोषितम् इत ऊर्ध्वं संस्कृतमहाविद्यालये केवलं संस्कृतभाषाया एवाध्यापनं भविष्यति, विषयान्तराणि पुनस्तत्रत्यैश्छात्रैः प्रेसिडेन्सीमहाविद्यालय एव अध्येतव्यानीति। एवञ्च उष्ट्रपादप्रसारणन्यायेन क्रमेण संस्कृतविद्यामन्दिरस्य सत्तैव विलुप्येत इति बहुभिराशङ्क्यते। एतच्च thin end of the wedge इति व्यपदिश्यते पाश्चात्यैरिति तेषामभिमतम्। यद्यपि न खल्विदानीं राजकीयसंस्कृतमहाविद्यालयः पुरेव छात्रानावर्जयति, न वा हिन्दूनां धर्मगतसंशयच्छेदे हेतुतामधिग
धर्मविषयकव्याख्यानादिभिश्छात्राणां मनःसु धर्मभावं समुद्बोधयितुं प्रयतते तथाप्येतस्य खर्वीकरणमत्यन्ताय वा समुच्छेदनं हानय एव भारतवर्षस्येति नो बुद्धिः। प्रेसिडेन्सीमहाविद्यालयेन संयोगमनुप्राप्तस्यास्य विद्यालयस्य कांस्यघटेन संयोगमनुभवतो मृद्घटस्य दशा व्यवस्थितैव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आशास्यते च शिक्षासचिवमहोदयेन यथा राजकीयसंस्कृतमहाविद्यालयस्य गौरवं लेशतोऽपि न क्षुण्णं भवेत् तथैव विधास्यते।

भारतवर्षस्य प्रदेशविशेषेषु ग्रामविशेषेषु वा चातुर्वर्ण्येन पञ्चमवर्णो भृशं निगृह्यते इति तारस्वरेणोद्घोष्यत इदानीं बहुभिर्मनीषिभिः। एतस्य निग्रहस्य वा निग्रहाभासस्य वा प्रतीकाराय पञ्चमवणनायकेन अम्बेदकरमहोदयेन जीर्णमिव वसनं सनातनो धर्मः परित्यक्तुमुद्युज्यते। परमेतावतैव पञ्चमवर्णेन चातुर्वर्ण्यस्य साम्यं लभ्येत वा? आस्तां तावादाध्यात्मिकहिताहितविचारः, लौकिकमपि हितमेभिरधिगम्येत वा? सर्वथायं प्रयासः वृश्चिकभिया पलायमानस्याशीविषमुखे निपातन्यायं स्मारयति। साम्यं तावच्छशविषाणगगनकुसुमादिसब्रह्मचारि शब्दमात्रमेव। अत्र च भगवती श्रुतिरेव स्वयं साक्ष्यमावहति। तथाच दाशतयोषु श्रूयते—

समौ चिद्धस्तौ न समं विविष्टः
संमातरा चिन्न समं दुहाते।
यमयोश्चिन्न समा वीर्याणि
ज्ञाती चित् सन्तौ न समं पृणीतः॥

अस्यार्थः—समौ चिद्धस्तौ समानावपि पाणी। चिदिति निपात एवार्थे वर्तते। समं समानं न विविष्टः कार्यं न व्यापृतः। सर्वथा समानाकारमपि पाणिद्वितयं न खलु समानेन नैपुण्येन कर्म सम्पादयितुं प्रभवति। एकतरस्य उत्कर्षः अन्यतरस्य चापकर्षः प्रत्यक्षसिद्ध एव। संमातरा चित् वत्सस्य मातरौ धेनू अपि समं समानं पयो दुग्धं न दुहाते न यच्छतः। एकस्या धेनोर्दुग्धं सारतः परिमाणतश्च धेन्वन्तरस्य पयसो भिद्यत एव। यमयोश्चित् सहजातयोः पुत्रयोरपि एकस्मिन्नेव मातृगर्भे समानकालं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्टयोः प्रायेणैककालमेव भूमिष्ठयोरपि बालयोः वीर्याणि पराक्रमादीनि समा समानि न भवन्तीति शेषः। यमयोराकारगतस्य सादृश्यस्य जागरूकत्वेऽपि पराक्रमादिगतं वैलक्षण्यं स्फुटमेव प्रतीयते। ज्ञाती चित् सन्तौ एकस्मिन्नेव कुले जातावपि समं न प्रीणीतः समं न प्रयच्छतो धनम् इति।

———

अहो गरीयान् प्रभावः कालस्य येनाश्रुतचराण्येव वृत्तानि श्रूयन्ते, अदृष्टचराणि च वस्तूनि प्रत्यक्षीक्रियन्ते। तथाहि वर्षेऽस्मिन् क्वचिद् ब्राह्मणेतरपुरोहितैर्निर्वर्तिता शारदीया महापूजेति वृत्तान्तपत्रतोऽवगम्यते। महाभागाः, यद्याहोपुरुषिकामात्रेण चरणतलेनावमर्दयितुमिष्यन्ते श्रुतिस्मृतिपुराणादीन्यार्यधर्मशास्त्राणि तर्हि किमिति तत्प्रतिपादितदिन एव विधीयते पूजनं देव्याः। आर्यैर्देव्याः पूजनं क्रियते, आयुष्मद्भिर्दानवस्यार्हणं सम्पाद्यताम्, आर्याणामुत्सवः शुक्लसप्तम्यामनुष्ठीयते, श्रीमतां महः कृष्णचतुर्दश्यामनुष्ठीयताम्। इत्थञ्च सर्वेष्वेव विषयेषु सनातनविधीनां वैपरीत्यं विधीयताम्, अलमर्धजरतीयन्यायाश्रयणेन।

——

सहृदयाः, मुहूर्तं तावद्विचार्यतां साम्प्रतिकी परिस्थितिरार्यसमाजस्य। यस्तावत् पूर्वं श्रुतिस्मृतिसदाचारादिभिः सुनियन्त्रित एवासीत् स एवेदानीं स्वेच्छाचारस्य लीलालयः संवृत्तः। एतावन्तं कालं यावद्रामस्य तदनुचरस्य च पूजा प्रचलितासीद्भारते वर्षे, साम्प्रतं पुनः पाश्चात्त्यसंस्कारव्यामोहितमानसैरसुराधीशस्य रावणस्य पूजनं साडम्बरमनुष्ठीयते। अहो मौढ्यमालङ्कारिकाणाम्, यत्ते "रामादिवद् वर्तितव्यं न रावणादिवत्" इति प्रलपन्ति। सर्वविपर्यासकरः कलिरिदानीं जेगीयते, अत एव सर्वत्रैवौत्तराधर्यं प्रवर्तते इति किमिवात्र चित्रम्!

श्रीक्षितीशचन्द्रशर्मणः।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभातप्रयाणम्

नास्ति खलु प्रभातचन्द्रचक्रवर्त्ती ! परलोकं प्रस्थितः प्रभातचन्द्रचक्रवर्त्ती ! बृहस्पतेरर्धासनमधिरूढः प्रभातचन्द्रचक्रवर्त्ती ! शिवलोकमनुप्राप्तः प्रभातचन्द्रचक्रवर्त्ती ! किमिदमापतति कर्णविवरं ज्वलदनलशिखासम्भारसदृक्षमक्षरजालम् ! हा हन्त ! अवसीदन्त्यङ्गानि, म्लायन्तोन्द्रियाणि, मुह्यति च मानसम् । भूताविष्ट इव पिशाचोपहत इव स्तम्भित इव उत्कीर्ण इव शृणोमि शब्दान् न पुनः प्रभवामि परिग्रहीतुं तेषामर्थान । अहो ! कथं नामैतत् सम्भवेत् ! कथं नाम सौम्यसुन्दरश्रीण्यङ्गानि कालिमानं भजेयुः, कथन्तरां साधुशब्दसमुच्चारणपवित्रं स्मितसुधासमुद्भासितं वदनमण्डलं विच्छायतामुपगच्छेत्, कथन्तमां वा क्षुरस्य धारेव निशिता बुद्धिर्वर्षास्विव वासन्ती सुषमा चिरायैव विलीयेत । सर्वथा नैव प्रत्येति तस्य मरणवृत्तान्तं हृदयम् । इदानीमपि परिस्फुरति पुरस्तान्नयनयुगलस्य तस्योपचितसत्त्वं प्रशस्तललाटं वपुः । इदानीमपि श्रवणविवरमनुप्रविशति कौमुदीपङ्क्तिं व्याचक्षाणो महाभाष्याशयं परिष्कुर्वाणो रसतत्त्वं विवृण्वानः सांख्यरहस्यं विभिन्दानस्तन्त्रोपनिषदं निषेवमाणोऽस्य कण्ठस्वरः । इदानीमपि प्रत्यक्षीक्रियत आशुतोषाध्यापकपदमध्यासीनो नानादिग्देशागतविद्वद्वृन्दविद्यार्थिनिवहसंस्तूयमानोऽगाधसत्त्वो महाभागः । अद्यापि निपीयते तस्योपदेशपरम्परोपोषिताभ्यामिव श्रवणयुगलाभ्याम् । विरलाः खलु तादृशा देवभाषायां मातृभाषायां राजभाषायां च सममेव समधिगतनैपुण्याः कोविदवराः । विरलतराश्च तादृशाश्चुलुकीकृतभाष्याब्धयो विपश्चितः । विरलतमाश्च तादृशा विश्वार्त्तिप्रशमनसमर्पितजीवना महात्मानः ।

न जानीमः कीदृशेन वचनोपन्यासेन सान्त्वयेम तस्य स्वजनवर्गम् । स्वयमेव तावत् कथञ्चित् समुपलब्धवृत्तान्तो नालमस्म्यात्मानं पर्यवस्थाप-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यितुम्। "उपनिषदः परिपीता गीताऽपि हन्त मतिपथं नीता" तथापि न प्रभूयते संस्तम्भयितुं गरीयानयं शोकावेगः। किं करोमि! क्व गच्छामि! कुत्र वेदशोऽग्रजकल्पः स्नेहनिर्भरो लभ्येत बन्धुः? कुत्र वैवंभूतस्तृणीकृतस्वार्थो लभ्येतोपकारकः? कुत्र वैतादृशः सकलशास्त्रार्थकुशलो लोकतन्त्रनिष्णातो लभ्येतोपदेशकः? अतः परं प्रतिपत्तिमूढः कमुपाश्रयिष्ये, विपज्जालसमाकुलः कं शरणं प्रपत्स्ये, उत्तमर्णनिवहप्रपीडितः कं वोपन्नमवलम्बिष्ये? सर्वथा प्राक्तनसुकृतातिशयेन जाज्वल्यमानप्रतापोऽयं विबुधवरो विबुधराजसदः समलङ्कर्तुं प्रस्थितः परलोकम्, वयमेव विपर्यस्तभागधेया निरन्तरं दन्दह्यामहे शोकानलेन। अथवालं शोकेन। अवितथं किलोक्तमाङ्गलकविना Those whom the gods love die young. येषु स्निह्यन्ति देवास्त एवाकाले कालकवलतामुपयान्ति। सर्वथा स्वस्ति विदधातु भगवान् भूतभावनः पुत्रकलत्रादिस्वजनवर्गाय महाभागस्येति शम्।

श्रीक्षितीशचन्द्रशर्मणः

स्वर्गतः प्राणाचार्यो हाराणचन्द्रचक्रवर्त्ती

विलसति वङ्गेषु पावनाख्यः प्रदेशः। तत्रैवान्वर्थनामनि जनपदे जनुषी लेभाते हाराणचन्द्रचक्रवर्त्ती च माधवचन्द्रभट्टाचार्यश्च। उभावपि धर्मधनौ ब्राह्मणौ, उभावपि विदितवेदितव्यावधीतसर्वशास्त्रौ सर्वतन्त्रस्वतन्त्रधिषणौ। एकस्तावत् सुश्रुततन्त्रेऽप्रतिद्वन्द्वी, अपरश्च चरकशास्त्रेऽप्रतिमः। एकस्तावच्छस्त्रविद्यासु निपुणस्तृणीकृतजगत्त्रयसत्त्वसारो मूर्त्त इव रुद्रो "जलाषश्च भेषजश्च," अपरश्चौषधितन्त्रे सुव्युत्पन्नोऽतिसौम्यः शिव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इव प्रपन्नार्तिप्रशमनपरः। एवञ्च प्रवृद्धेऽपि कलावार्यवंशपुण्योपचयेन स्वर्लोकात् समवतीर्य भूर्लोकम् उच्चावचामयजालसमाक्रमणखिन्नान् विविधाधिपटलैर्निरन्तरं प्रक्षीयमाणान् जीवनिवहाल्लीलयैव प्रत्यापन्नप्रकृतिकान् विधाय चिरं विरेजतुरश्विनाविमौ साम्प्रतिकेऽपगतसोमकथेऽपि नरलोके। न केवलं सोमरसे स्पृहयालव एव देवा अमर्त्यलोकं प्रविहाय मरलोके पदमर्पयन्ति, अपि तु भक्तजनपरित्राणायापन्नापत्प्रतिकाराय व्याधितव्याधिविमोचनाय स्वत एव परित्यज्य स्वर्गसुखं भुवस्तलमवतरन्ति। अत एव नैतदाश्चर्यं यत् पुरा नासत्याभ्यां सागरात् समुद्धृत्य त्रिभिरहोरात्रैर्भुज्युः पितुः समीपं प्रापितः, साम्प्रतं पुनर्व्याधिसागरात् समुत्तार्यैकेनाप्यहोरात्रेण परोलक्षाः प्राणिनः स्वजनसमीपं नीताः, पुरा किल महर्षिरत्रिरेक एव पीडायन्त्रगृहेऽसुरैस्तुषाग्निना ताप्यमानोऽमृतवर्षणेनानलोपशमनपूर्वकमविकलेन्द्रियवर्गो निर्गमितः, साम्प्रतं पुनः परःसहस्राः पुरुषाः पीडागृहे विविधोपसर्गासुरैः सन्ताप्यमाना भेषजामृतनिषेकेण प्रशमिताखिलसन्तापा अविकलेन्द्रियवर्गा उल्लाघतामनुप्रापिताः, पुरा किल गोतमस्यैकस्यैव महर्षेः पिपासा प्रतिकृता, साम्प्रतं पुनर्दाहज्वरमनुभवतां परिशुष्कतालूनां परःकोटीनां तर्पस्विनामामयापसारणेन प्रतिकृता दुरन्ता पिपासा, पुरा किल राजर्षिर्मृज्राश्व एक एवान्ध्याद्विमोचितः, साम्प्रतं पुनरेकेन शस्त्रेणापरेण च भेषजेनागण्यमाना नेत्ररोगिणो दृष्टिशक्तिं प्रतिपादिताः, पुरा किल च्यवन एक एव वार्धकेऽपि विजरीकृतः, साम्प्रतं पुनः सहस्रश एव पुरुषा जराजर्जरितकलेवरा अभिनवयौवनशालिनो विहिताः, पुरा किल विश्पलाया एकस्या एव पादवैकल्यं प्रतिकृतम्, साम्प्रतं पुनः परःशतानां नराणां च नारीणां च पङ्गुभावः प्रतिकृतः। किं बहुना, प्रपन्नानां प्राणिनां प्राक्तनदुष्कृतप्रशमनाय स्वयमेव सुराभ्यामाभ्यां स्वीकृतस्तेषां पातकभारः। तथाहि लोकशिक्षार्थं पातकानाममोघत्वप्रतिपादनार्थं च कालं कञ्चिदेकेनाङ्गीकृतं खञ्जत्वम्, अपरेण चोररीकृतमन्धत्वम्। इत्थञ्च सर्वतोगामिना प्रभावातिशयेन विश्वार्तित्राणं प्रविधायापुण्यतया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मर्त्यानां विधुरतया च देवानां पुनरप्येकः स्वर्गवासं सुरेन्द्रसाहचर्यं चाकामयत। अपरः पुनरिदानीमप्यपगतक्रमो नक्तन्दिवं व्याधितेभ्यो हितं विदधानो वर्तते। चिरं तिष्ठत्वयं मर्त्यलोके चिरं च विशतु भीतिरन्तकस्याप्यन्तरे चिरं च विन्दतु कलिकलुषपूरितोऽपि मरलोकोऽमरलोकतामिति साभिनिवेशमभिप्रार्थ्यत इति शम्।

श्रीक्षितीशचन्द्रशर्मणः

नदीपूरः*

[निबन्धकः—श्रीमहालिङ्गशास्त्री एम. ए ; बि. एल]

वन्दिनो मम पुरः कलकण्ठाः पञ्चमैर्विदधति स्तुतिपाठम्।
मार्गमादिशति पश्चिमवायुर्नूतनाम्बुभरितः प्रवहामि ॥१॥
वल्गु वल्गितगतिर्नतपातं फेनिलाग्रिमतरङ्गतुरङ्गः।
पार्श्ववीरुदवकीर्णसुमौघैर्यामि मण्डितवपुर्मृदुघोषः ॥२॥
मीनकर्कटकडुण्डुभमेकैर्मत्परिच्छदवरैरनुयातम्।
गृध्रताक्ष्यबकसारसमुख्या मामुपासितुममी निपतन्ति ॥३॥
हालिका मम परिष्कृतमार्गाः सर्वतो भुवमसंस्तुततन्द्राः।
लाङ्गलोल्लिखितभूमिविभागाः स्वागतान्यवचसा कथयन्ति ॥४॥
नूतनाम्बुपृषतैस्तटवृक्षान् जीवयामि परिशुष्कपलाशान्।
ग्रामसन्ततिमसह्यनिदाघं वीजयामि शिशिरानिलपूरैः ॥५॥

---

* कवेः सर्वाधिकारः स्वायत्तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूरपातरभसेन करोमि श्वभ्रसैकतदशापरिवृत्तिम् ।
पूरयन्सुषिरवर्त्म कुलीरैर्निर्गतैरुपचिनोमि विनोदम् ॥६॥
हासपूरितविफुल्लकपोलावर्त्तसुन्दरमुखांबुजशोभाः ।
योषितो नवजलाहरणार्थं मामुपेत्य विहरन्ति दिनान्ते ॥७॥
वीचिबाहुमभिनस्समुदस्यत् फेनपूर्णहसितः कृतकेलिः ।
जातमर्मररवो भ्रमिचक्रैरञ्चितोऽनुविदधाम्यहमेताः ॥८॥
विभ्रमामि विलुलामि विसर्पाम्युत्पतामि तुमुलं विनिवर्त्त ।
शीकरानवकिरामि तरङ्गानुत्क्षिपामि तरसा प्रवहामि ॥९॥
सारणीभुजशतैः क्षितिखण्डान् सीमबन्धहलपद्धतिक्लप्तान् ।
प्रापयाम्यगतटोद्धृतधातून् पौष्टिकान् बहलसस्यसमृद्धेः ॥१०॥
क्वापि सङ्कमपथप्रविभक्तः क्वापि कूलरचितावतरालिः ।
क्वापि सेतुभिरपि प्रतिबद्धो यामि च क्वचन नौमुखदीर्णः ॥११॥
ग्रामघोषनिबिडोभयकूलः पार्श्वयुग्मविनिविष्टसुहर्म्यः ।
देववेश्ममठिकादिभिरारादाश्रितः परिवहामि यथेच्छम् ॥१२॥
कुत्रचित् सखिभिराहृतपूरैर्यामि संपदुपबृंहणयोगम् ।
अन्यतश्शतमुखं ह्रदवापीपल्वलेषु विभजामि समृद्धिम् ॥१३॥
काननेषु निबिडेषु निलीनो निर्गतश्च भुवि शाद्वलवत्याम् ।
क्वापि संहततनुर्न च गाधः क्वापि यामि विपुलो न गभीरः ॥१४॥
लीलया पथि लतासुमगुच्छानामृशन्नवनतान् स्वगरिम्णा ।
उद्वतोर्मिरपसारितभृङ्गस्तन्मधून्यभिनवानि पिबामि ॥१५॥
सन्नताग्रतटपादपशाखाचुम्बितः परिमृशंस्तरुमूलम् ।
रोधसि क्वचन पीनविशाले प्रस्खलद्गतिरुपैमि विलम्बम् ॥१६॥
पातयामि शिथिलं यदि कूलं स्रस्तमूलविकलैः सह वृक्षैः ।
आहरामि यदि सेतुवृतीर्वः क्षन्तुमर्हथ लघुं मम मन्तुम् ॥१७॥
वेतसः प्रवणतां मयि यातः फेनकेतुमति किं न विमृश्य ।
वाहिनीं मम निरोद्धुममी क स्तब्धतां विटपिनः कलयन्तः ॥१८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन्मया क्वचन दुर्भरपाथोरंहसा सतरुकुञ्जनिकेतम् ।
भूतलं नवमिव क्रियते तन्नाहमस्मि गदितुं प्रवणो वः ॥१९॥
मन्दमन्दमुपसन्नरथाङ्गं मीनवालहतिभिस्सविभङ्गम् ।
संपतन्मुखरलोलविहङ्गं पश्य मामुषसि विभ्रमतुङ्गम् ॥२०॥
मज्जनागतवधूजनलापाभ्यन्तरोऽहमपवार्य कथास्ताः ।
कौतुकादपिशुनः प्रलपामि स्तोकमर्मरवैरविभाव्यैः ॥२१॥
सन्तरत्सुवदनोरुविमर्दैर्मज्जदास्तिकशिरोलुठनैर्वा ।
हृष्यतोऽपि मम शल्यमिवान्तर्धीवरेण बडिशं समुदस्तम् ॥२२॥
अर्चितस्तिथिषु कामितसिद्ध्यै भामिनीकरसुमाञ्जलिपूरैः ।
विप्रवृन्दविहितार्घ्यपवित्रः कस्य नास्मि महनीयचरित्रः ॥२३॥
बुद्बुदैस्समुदितैस्तपनांशून् दर्शयन् विविधवर्णविचित्रान् ।
उद्वहन्निशि च तारकसङ्गं यामि वीचितरलीकृतशोभम् ॥२४॥
व्योम केशनिचयं विदुरीशं सोऽहमस्मि गलितस्तत एव ।
पावनं हरकपर्दनिवासाद् गाङ्गमंबु यदि किं न तथा मे ॥२५॥
सन्ततं चरति वायुकुरङ्गः सन्ततं सरति कालभुजङ्गः ।
सन्ततं भ्रमति सोऽपि पतङ्गः सन्ततं त्वहमये सतरङ्गः ॥२६॥
गिरिवरकटकेष्वहं प्रजातः किमपि लुठन्नवशैशवेन मुग्धः ।
अवनतशिरसा पतन्नगाधे प्रदरमुखे क्षणमासमाकुलोर्मिः ॥२७॥
भ्रमिशतलुलितस्ततः कथञ्चित् कलकलकृत् प्रतिवेलमुत्पतिष्णुः ।
वनहरितदरीमुखेषु तुल्यैः परिमिलितस्समवातरं धरित्रीम् ॥२८॥
तनुरिति न विषादमभ्यगच्छं प्रतिहतिभिः पथि नाभवं निराशः ।
अकृतपदनिवृत्तिरभ्यधावं विविधविधाभिरतोऽभवं विशालः ॥२९॥
गिरिकुहरदरीवनान्तरेषु भ्रमणवशात् खरसत्त्वमात्रजुष्टः ।
तदनु परिचितोपपन्नमार्गो जगदुपकारविधेर्वहामि पूरम् ॥३०॥
अचलकुचतटीविमुक्तसङ्गं सिचयमिव प्रविकीर्णदीर्घमुर्व्याः ।
व्यतिकरितशिलोच्चयाम्बुराशिं विबुधगणो वियति प्रलोकते माम् ॥३१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृढतरपरिरम्भसंहतोर्मिर्जनपदजीवनदानजातकार्श्यम् ।
सलिलनिधिरमोघजन्मलाभं प्रतिसमुदेति कृतोपसर्पणं माम् ॥३२॥
दशरथ इव कौशिकस्य हस्ते तनयमदाज्जलदाय मां पयोधिः ।
रघुपतिरिव चाभवंस्ततोऽहं जगदुपकारयशःपवित्रपात्रम् ॥३३॥
सर्वासां प्रभवमपां गतिं च तासां पयोधिं चरितविचित्रजन्मलीलः ।
आत्मेव प्रकृतिमहन्महस्तदेकं ब्रह्माख्यं निखिलनिदानमभ्युपैमि ॥३४॥
दिव्यात्मा भुवि विचरञ् जगद्विभूतेराधारं पुनरखिलं विशन्नपां तम् ।
उद्गच्छन्नपि च पुनः पुनस्तथैव भ्राजेऽहं परिणतिभाङ् न तु प्रलीये ॥३५॥

इति श्रीमन्महालिङ्गकवेः कृतिषु मणिमालाख्ये गुम्फे द्वितीयं नदीपूराख्यं लघुकाव्यं समाप्तम् ॥

अपि नाम याज्ञिकी पशुहिंसा प्रामाणिकी

[निबन्धकः—"श्रपण्डित धर्मराज"]

[प्रबन्धेऽस्मिन् प्रमाणोपन्यासपुरःसरं यन्मतं प्रतिपादयितुमिष्टं तत् सर्वथाननुमतमप्यस्माकमाधुनिकयुक्तिजालस्य निदशनत्वेन पूर्वपक्षरूपेणात्र प्रकाशितम् । अस्य चोत्तरपक्षप्रतिपादनाय सादरमभिप्रार्थ्यन्ते सनातनधर्म-प्रणयिनो विदितवेदितव्या विपश्चितः । स० सा० प० स० ।]

अयि भीः स्मृत्यान्नाथपुराणोपपुराणनिरुक्तव्याकरणछन्दःकल्पमीमांसा-न्यायसांख्ययोगादिसमग्रवेदाङ्गोपाङ्गपरिस्फुटमुक्ताफलहारहारिप्रभाच्छादित--साहित्याम्भोधिसलिलाभिषेकसुकृतिनो महीमण्डलमहनीयमहिमानो दया-दाक्षिण्याद्यपरिमितोदारगुणोदधिसमाकृष्टवृन्दारकवृन्दवन्दितचरणा ग्राह्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राह्यशास्त्रार्थपरीक्षणप्रमाणितमतयो नीरक्षीरविवेकिनः साहित्यसरीविहारिराजहंसा मान्याः सहृदयमहाभागा वाचकाः, पुरा किल लोकोत्तरचमत्कारिमहनीयचरित्रपवित्रीकृतधरित्रीवलये सततयागादिक्रियाकलापनिरतयजमानजने पुण्येऽस्मिन भारतमहीतले समस्तसत्यव्रतयज्ञव्यवहारपरम्पराचारपूतप्रथितकीर्त्तौ कृतयुगे प्रत्यक्षीकृतमन्त्रैरपास्तसमस्तसंशीतितमस्कैर्महर्षिभी राजर्षिभिश्च याः शास्त्रमर्यादा व्यवस्थापितास्ताः खल्वस्माकं दौर्भाग्यदोषोदयान्मध्ययुगे स्वार्थसाधनपरैरपण्डितैरपि पण्डितंमन्यैर्नाविरुद्धार्थप्रतिपादनपरतयाऽखिलश्रुतितत्त्वप्रकटलुण्ठकैः पाखण्डिभिः सर्वा अपि पदे पदे दूषिताः स्वमाहात्म्यात् प्रच्याविता अतितरां व्यलीयन्त।

तस्मिन खल्वन्धानुसरणपरम्पराकीलितकाले कुङ्कुमकेसरागुरुचन्दनकस्तूरीकर्पूरद्राक्षाक्षोटमुस्तातिलचरुपुरोडाशाज्यप्रभृतिविधिविहितसुगन्धिहोमद्रव्यैराशुशुक्षणिमतर्पयन्तो मांसासृङ्मेदोवपाहुतिभिर्हुतवहं जुह्वतः पूतगन्धवाहिभिर्वायुभिर्न केवलं स्वकीयमेव निरयनिपातमनिष्टमुपचिक्युः परं सर्वप्राणिनोऽपि निरतिशयकृच्छ्रदावदहने पातयन्तो महापातकाध्यवसायमङ्गीचक्रुस्तदानीन्तना महामोहमलीमसचेतसो याज्ञिकसम्प्रदायाः। नैतदेवालम्, किन्तु स्वकीयमिदमपसदकृत्यं शास्त्रानुमोदितं व्याहरन्तस्ते परमपवित्रशास्त्रेष्वपि कलङ्ककालिमानं विलिम्पन्तो नातिजिह्रियुः।

न नूनं नो सन्ति सम्प्रत्यपि ये केचित्साक्षाच्चतुर्मुखमुखकमलसम्भूता अपि, सरस्वतीकण्ठाभरणभूता अपि, धर्मधूर्धुरन्धरा अपि महाव्रता विप्रप्रवरा अद्य पाश्चात्त्यप्रभावपरिभूतप्रतिभत्वाद्वा, निसर्गनिरर्गलनियतिनिदेशनिमीलितनेत्रत्वाद्वा, सकललोककल्याणप्रवणस्य सत्यसनातनधर्मस्यैतादृगवधीरणे दृढाध्यवसायस्याविधेयस्य विधेर्वैधुर्याद्वा, स्वार्थकदर्थितयथार्थचिन्तनसामर्थ्याद्वा, अपहृतमतय इवाऽऽनुश्रविकीं यज्ञपद्धतिं तिरस्कुर्वन्तो विगर्हिताश्च सतःकुर्वन्तोऽवलोक्यन्ते।

परन्तु भद्राः, भवद्भिरेव निरीक्ष्यतां निखिलशास्त्रार्थरहस्यविचारणाचणैर्विचक्षणैर्यद्वोमेधपशुमेधादिविविधाख्यानैः पशुव्यापादनपरं वैदिकी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मर्यादाऽतिक्रम्यते न वेति, 'यजमानस्य पशून् पाहि' 'स्वधिते मैनं हिंसीः' 'पशूँस्त्रायेथाम्' 'अभयं नः पशुभ्यः' 'शमसद् द्विपदे शं चतुष्पदे' 'स्वस्ति गोभ्यो जगते पुरुषेभ्यः' इत्यादयः पशुरक्षाप्रेरिकाः पावन्यः श्रुतयः सर्वा विहन्यन्ते यज्ञे पशुहिंसानुमोदनेनेत्यत्र कः प्रतीकारोपायश्चिन्तनीयः स्यात् ?

गोमेधे हि मानवानां मातृतुल्याया दधिक्षीरघृतादिभिः सकलप्राणिनोनुगृह्णया गोहिंसनं केषाञ्चिदभिमतम्। परम् 'अघ्न्या' 'अहीः' 'अदिति'रित्यादीनि गोशब्दापरपर्यायभूतानि पदानि प्रकृतिप्रत्ययद्वारेण तस्या अहन्तव्यतामेव प्रख्यापयन्तीत्युक्तम्—

"अघ्न्या इति गवां नाम क एतां हन्तुमर्हति।
बृहच्चकाराकुशलं वृषं गां वालभेत्तु यः॥"

किञ्च, 'मा गामनागामदितिं वधिष्ट' 'मा नो गामश्वं पुरुषं वधीः' 'गां मा हिंसीरदितिं विराजम्' इत्यादयो गोवधप्रतिषेधपराः श्रुतयोऽपि श्रुतिमतां कथमुपेक्षणीयाः स्युः ?

अथ च,

'किं ते कृण्वन्ति कीकटेषु गावो
नाशिरं दुहे न तपन्ति घर्मम्।'

इति वैदिकमन्त्रपरिपाट्या पयस्विनीनामग्निहोत्रधेनूनां सर्पिःक्षीरक्षारित्वाद् यज्ञोपयोगित्वमेव सिद्ध्यति न तु तन्मांसखण्डाहुतिकदर्थितकृत्यप्रयोजनम्।

यैरश्वमेधयागव्यपदेशेन राष्ट्ररक्षणैकव्रतानां राजन्यानां रणरङ्गैकसुहृदस्तुरङ्गमा हिंस्यन्ते तेषां कृते तु—

'इमं मा हिंसीरेकशफं पशुं
कनिक्रदं वाजिनं वाजिनेषु'

इति यजुःसमाख्यानम्, 'एकशफो वा एष पशुर्यदश्वस्तं मा हिंसी'रिति शतपथप्रशासनम्, 'देवा आशापाला एतं देवेभ्योश्वं मेधाय प्रोक्षितं रक्षन्ते'ति यजुर्निर्देशश्च सत्यासत्यतत्त्वनिकषणाय प्रस्तूयते। एतेषु स्पष्टमेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाजिहिंसाविकत्थनापरेषु शास्त्रेषु सत्सु कथमध्वररूपं पवित्रकर्म पशुशोणितकर्दमप्रवाहैरमेध्यं कर्त्तुं न्याय्यमिति स्वयमेव सुधियो विभावयन्तु।

अथ क्षितिपस्य यस्य क्षित्येकदेश एतादृशाः सत्त्वध्वंसाध्यवसायेनाध्वरफलध्वंसं प्रतीपाचरणैर्नीचाभिजनत्वं चोच्चिन्वन्तः कलुषीकृतचेतसः स्युस्तस्य तेषां सर्वप्राणिकदनैककर्मणः करालकालस्य विकरालवक्त्रयन्त्रातिथीकरणमेव दण्डशासनं प्रशास्यते श्रुतिशासनैः। तथा चोक्तं यजुषि 'अन्तकाय गोघात'मिति।

'यः पौरुषेयेण हविषा समङ्क्ते, यो अश्व्येन पशुना यातुधान ॥
यो अघ्न्याया भरति क्षीरमग्ने, तेषां शीर्षाणि हरसापि वृश्च ॥"

इति च सर्वतन्त्रप्रधानभूते ब्रह्मवेदे।

इमां पशुहिंसाप्रतीकारभूतां दण्डाज्ञामुपश्रुत्य कस्य न लोमानि जायेरन् निरन्तरनिबद्धसाध्वसतयाऽङ्कुरितकण्टकान्यरुन्तुदानि ? कस्य वा हृदयं दारुणाप्रतिफलमिदं स्मारं स्मारं तीव्रतरतापग्रस्तं भूयो भूयो न वेपेत ?

श्रीमद्भागवतस्य चतुथस्कन्धे प्राणिवधस्य कीदृशं निरतिशयनिरयशतसन्तापवहं रोमोल्लोचकं चित्रं चित्रीकृतमित्यपि सकलकलाकलापकोविदैः श्रीमद्भिः प्रत्यक्षीकतव्यम्—

'भो भोः प्रजापते राजन पशून् पश्य त्वयाऽध्वरे।
संज्ञापिताञ्जीवसंघान् निर्घृणेन सहस्रशः ॥
एते त्वां संप्रतीक्षन्ते स्मरन्तो वैशसं तव।
सम्परेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः ॥'

(श्रीमद्भागवत, स्कन्ध ४)

तथा च पद्मपुराणे—

'यस्तु यज्ञे पशून्हत्वा कुर्याच्छोणिततर्पणम्।
स पचेन्नारके तावद् यावल्लोमानि तस्य वै ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किंञ्च,

'जानाति को वेदपुराणतत्त्वं ये कमणः पण्डितमानयुक्ताः ।
लोकाधमास्ते नरकं पतन्ति कुर्वन्ति मूर्खाः पशुघातनं चेत् ॥

के ते य एतादृशा वज्राज्ञां श्रुत्वापि पशुघातं पुण्यन्तो न वेपन्ते, न त्रपन्ते, न वा निरयनिपातमवलोकन्ते !

अयि अशेषशास्त्रशाणकोणकर्षणनिस्तुषीकृतशेमुषीजुषः पाठकमहाभागाः, एतर्हि अविमेधाजमेधप्रभृतीनामपि कर्णपथातिथीक्रियतां कथा । क्रतौ प्राणिहिंसासमर्थकैरजमेधाविमेधादिप्राचीनप्रचलितशब्दैश्छागादिप्रतिघातनमेव समर्थ्यते । किन्तु

बीजैर्यज्ञेषु यष्टव्यमिति वै वैदिकी श्रुतिः ।
अजसंज्ञानि बीजानि छागं नो हन्तुमर्हथ ॥'

इति स्फुटार्थैव शास्त्रघोषणा तत्पक्षप्रतीपतां द्योतयितुमलम् ।

एतेऽपि ये याज्ञिका यज्ञकर्मणि पशून्व्यापादयन्ति ते मूर्खाः परमार्थं श्रुतेर्न जानन्ति, तत्र किलैतदुक्तम् 'अजैर्यष्टव्यम्' इति, अजात्रीह्यस्तावत् सप्तवार्षिकाः कथ्यन्ते न पुनः पशुविशेषाः ।

इत्यशेषनीतिशास्त्रपण्डितमण्डलीमण्डनः श्रीविष्णुशर्मापि संगृहीतनखिलनीतितन्त्रे पञ्चतन्त्रे यागेषु प्राणिघातपराणां याज्ञिकानामज्ञातशास्त्रार्थरहस्यानां मोहध्वान्तापहितप्रतिभाप्रसारत्वमेवानुमोदते ।

सकलविद्याकलाकलापागारभूतेषु वेदेष्वपि :—

इमामूर्णायुं वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदाम् ।
त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिंसीः परमे व्योमन् ॥

इत्यविहिंसनप्रतिषेध एव तात्त्विकीं गतिमधिरोहति ।

एवञ्च पशुकदननिन्दनपरास्वपरिमितासु श्रुतिषूपलभ्यमानासु नितान्ततमस्तिरोहितप्रज्ञानामविज्ञानां न शास्त्रविज्ञानां भवादृशां वाचकानां पुरतस्तेषामिदं धूलिसमुद्धूलनं समाकुलयितुमलम् ।

अथ चैवं सति सर्वं जगत् कालक्रमाननुरोधेनैव करतलामलकवत्पश्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्भिर्महामहिमभिर्योगिभिर्ब्रह्मर्षिभिश्च प्रशमपथपथिकप्रशस्याः सरहस्या ये गोमेधादिविधयः प्रकाशितास्तेषामपि कोऽन्तर्हितार्थ इत्यपि परिपन्थिप्रहार-निराकरणाय विवेचनीयमेव।

अजादीनां यः सुविज्ञसम्मतोऽर्थः स प्रतिपादित एव। सम्प्रति पश्वादि-शब्दानामपि मम श्रुतिपथे निवेशनीयम्।

'अग्निः पशुरासीत्तेनायजन्त', 'वायुः पशुरासीत्तेनायजन्त', 'सूर्यः पशु-रासीत्तेनायजन्त।' इत्यथर्ववेदस्य,

"पशुर्ह वा एष आलभ्यते यत् पुरोडाशः,"

"पुरोडाशो हि सर्वेषां पशूनां मेध उच्यते।" इति शतपथब्राह्मणस्य च पक्षोऽत्र कक्षीकर्त्तव्यः। महाभारतेऽपि दृश्यते—

'श्रूयते हि पुराकल्पे नृणां व्रीहिमयः पशु' रिति।

अत्रैव प्रसङ्गे श्रीमहर्षिगार्ग्यायणिप्रतिपादितः पशुयज्ञस्याऽऽध्यात्मिकोऽ-र्थोऽपि विद्वद्भिरवधेयः। तथाहि

'गोमेधस्तावत् शब्दमेध इत्यवगम्यते। गां वाणीं मेधया संयोजनमिति तदर्थात्। शब्दशास्त्रज्ञानमात्रस्य सर्वेभ्यः प्रदानमेव गोमेधो यज्ञः। तद्भवनं च शाब्दिकसन्निधानपदार्थानामेवेति विज्ञेयम्।'

'अश्वो हि ज्ञानम्। अश्यन्ते सर्वाणि भूतान्यनेनेति तदर्थात्। मेधा तावज्ज्ञानक्रिया भवति। अश्वस्य मेध इति व्युत्पत्तिमङ्गीकृत्य सर्वमिद-मकारात्मकं ज्ञानकरणमिति अश्वमेधक्रिया भवति। अत एवाश्वानां पदार्थानां हवनमपि प्रयुज्यते। अश्वस्तावज्ज्ञानजन्यः पदार्थस्तेषां हवनञ्चैतद् ब्रह्माग्नौ सम्प्रदानमेव इति हि तदर्थः। अत एव

'ज्ञात्वा ब्रह्म यथायोग्यं यश्चान्येभ्यश्च दापनम्।
अश्वमेधः परो यज्ञः सर्वमुक्तिप्रदायकः॥'

इत्यादि प्रवचनम्। एवं 'ब्रह्मपो हि ब्रह्मसराष्ट्रतां याति' इत्यपि च। अत्र हि ब्रह्मज्ञानं ज्ञानप्रदानमेवेति सम्भवात्। तदेवमश्वमेधाख्यं कम यावज्ज्ञानबद्धं तावन्मोक्षप्रदमेवेति फलितं भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अश्वमेधश्च सवज्ञानोपलक्षकः, अन्यपरस्वार्थो भवति। सर्वं स्वात्मानं मत्वा चेति तदाशयो विज्ञेयः।

'नरमेधश्चेच्छापरस्त्ययोः सम्बन्धरूपो बोध्यः। नर इति सर्वाश्रय-भूतस्यैव संज्ञा। सर्वाश्रयं सर्वमित्येतद्बोधमात्रं तदेवेति बोध्यम्।'

'समाहारश्चाजमेधः सर्वधर्मानुवर्त्तनः।
जायते म्रियते नैव चेति मिथ्यायुतो भवेत्।
स एवमजमेधोऽयं समाहारस्तदात्मकः।'
'ततश्च महिषो मेधः पञ्चमः सर्वसंस्थितः
ब्रह्मणा क्रियते नित्यम्।'

इत्येवं गोमेधादिपञ्चमेधस्य सुनिरूपितोऽर्थस्तात्त्विकपक्षप्रतिक्षेपणाय विपश्चिद्भिः प्रतिग्राह्यः।

अश्वमेधप्रसङ्गे च—

'अश्नुते व्याप्नोति सर्वं जगत् सोऽश्व ईश्वर इत्युक्तत्वादीश्वरस्यैवात्राश्व-संज्ञाऽस्ति। अन्यच्च 'राज्यमश्वमेधसंज्ञं भवति, क्षत्रमेवाश्वमेधसंज्ञकं भवती'ति ऋग्वेदादिभाष्यभूमिकायामार्यसमाजप्रवर्त्तकस्य वेदविरुद्ध-नानायावन्नष्ठीष्टादिसम्प्रदायखण्डनैकवीरस्य वेदधूर्धौरेयस्य महर्षेर्दयानन्द-स्यापि व्याख्यानं विशकलयन्तु विद्वांसः।

अपि श्रुतितत्त्वानभिज्ञजनविगर्हिताचारविततावखण्डपाखण्डपाटच्चराः सुतीर्थेश्वरसमाराधनसंहृताशेषकल्मषाः सकलशास्त्रपारदृश्वानो वाचकमहा-भागाः, अद्य हि सत्यसनातनवैदिकधर्मप्लवो नो विप्लवायते, सकलमपि सुकृतं सकृदेव दुष्कृतायते। यो हि धर्मोऽद्यावधि सततं सयत्नमस्मत्पूर्वजैरसुभिरपि परिरक्षितस्तस्यैव कण्ठेऽद्य यत्सत्यं निर्घृणं प्रह्रियते। तदप्यस्मद्बन्धुभिरथ च धर्मस्य नाम्नि। किमन्यत् तैरत्र प्रमाणान्यपि प्राप्यन्ते। का गतिः। कलेरयं प्रभावो यदश्रुतं श्रावयति, यदस्मृतं स्मारयति, यददृष्टं दर्शयति। का परिवर्णना। एतस्य कीर्त्तनमात्रादेव दूरमपतिष्ठति रसना। हन्त सकल-संसारसपर्याभाजनेऽस्मिन् भारतभूतले परममेध्यतीर्थेषु असङ्ख्यजन्मिनोऽ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभिर्वियोज्यन्ते, मूर्त्तावारोह्यन्ते। न किं यज्ञवहौ पशुहोमस्यैव कालचक्र-परिवर्त्तितमिदं विकृतं रूपम ?

अये ! किमुच्यते, अस्मत्पूर्वजानामियं परिपाटीति ? अहह ! शान्तं पापम्, प्रतिहतममङ्गलम्। यत्कृते परमभूतदयाविष्टो महर्षिः पतञ्जलि-र्व्याहरति—

'आदिकाले खलु यज्ञेषु पशवः समालम्भनीयाः—कुङ्कुमादिना गात्रेषु विलेपनीयाः—बभूवुर्नारम्भणाये'ति। यदर्थं च मञ्जुलमहाभारतकथोपनि-बन्धनचारित्र्येण संगृहीतं सकलश्रुत्यर्थस्य महर्षिव्यासस्योक्तिः प्रथीयसी—

'सर्वकर्मस्वहिंसां हि धर्मात्मा मनुरब्रवीत्
कामचारा हि हिंसन्ति वहिर्वेद्यां पशून्नराः'॥ इति। (शान्तिपर्व)

तत्रैवं लाञ्छितानि जल्पितानि जल्पतां कथं न रसनैव ज्वालाकुलीभवति ?

पाठकाः, श्रूयतामियं ब्राह्मणकथा—

"तद्धैतज्जनको ह वैदेहो याज्ञवल्क्यं पप्रच्छ।
"वेत्थाग्निहोत्रं याज्ञवल्क्य ?" इति
"वेद सम्राडिति।"
"किम्" इति।
"पय एव" इति।
"यत्पयो न स्यात् केन जुहुया" इति।
"व्रीहियवाभ्याम्" इति।
यद् व्रीहियवौ न स्यातां केन जुहुया" इति।
"या अन्या ओषधय" इति।
"यदन्या ओषधयो न स्युः केन जुहुया" इति।
"यदारण्या ओषधय" इति।
"यदारण्या ओषधयो न स्युः केन जुहुया" इति।
"अद्भि" रिति।
"यदापो न स्युः केन जुहुया" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स होवाच न वा इह तर्हि किञ्चनाऽऽसीदथैतदाहूयतैव सत्यं श्रद्धायाम्' इति। 'वेत्थाग्निहोत्रं याज्ञवल्क्य। धेनुशतं ददामी'ति होवाच।"

अहो स्मृतिविभ्रमो वा, दृष्टिदोषो वा, अनुभवशून्यता वा, अर्थापरिज्ञानं वा, प्रज्ञाविलोपो वा? किमेतदापन्नम्? मांससंकेतं नोपलभामहे। तत्किन्विदमस्मद्दोषवत्त्वमेव? उत परीक्षाकौशलम्। भवद्भिरेव परिचीयताम्। किं सन्देहेन। पिशितशोणितवसाप्रभृतीनां मुखनासोदरादिकानां चानुपलम्भने कोऽन्यो हेतुर्भवेद्? उक्तमेव—

'यदि यज्ञांश्च वृक्षांश्च यूपांश्चोद्दिश्य मानवाः।
वृथा मांसानि खादन्ति नैष धर्मः प्रशस्यते॥'
'सुरां मत्स्यान् मधु मांसमासवं कृशरौदनम्।
धूर्तैः प्रवर्त्तितं ह्येतन्नैतद्वेदेषु विद्यते॥'
पायसैः सुमनोभिश्च तस्यापि यजनं स्मृतम्।
याज्ञपाश्चैव ये वृक्षा वेदेषु परिकीर्त्तिताः॥' (शान्तिपर्व, मोक्षधर्म)

किमन्यदपि प्रमाणजातमर्थ्यते?

'ध्रुवं प्राणिवधो यज्ञे नास्ति यज्ञस्त्वहिंसकः।
ततोऽहिंसात्मकः कार्यः सदा यज्ञो युधिष्ठिर॥' (शान्तिपर्व)
'यस्तु प्राणिवधं कृत्वा देवान् पितॄंश्च तर्पयेत्,
सोऽविद्वाँश्चन्दनं दग्ध्वा कुर्यादङ्गारलेपनम्॥' (पराशरस्मृति)

एतादृशीं प्रमाणपरम्परां श्रुतिपथातिथीकृत्यापि ये मूढमनसो दुराग्रह-ग्रहगृहीतमतयोऽध्वरेषु सत्त्वप्रतिहिंसनाग्रहं न त्यजन्ति तेषां कृते त्वेत एव शब्दा बलान्मुखतो निःसरन्ति—

"प्रज्ञा शर्करिला तथाऽस्ति हृदयं पाषाणसारं नु किम्?"

अतो यज्ञेषु प्राणिहिंसासमर्थनार्थप्रस्तुतहेतवस्तु प्रमाणाभासत्वेन गजभुक्तकपित्थवन्निस्तथ्या उपेक्ष्याश्च प्रेक्षावताम्।

इति शम्-ॐ तत्सत्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषद् ऊनविंशवर्षीयकार्यविवरणम्

[निबन्धकः—श्रीअमरेश्वरठाकुर-वेदान्तशास्त्री]

आदौ तावद्विधिविष्णुशिवादिभिर्देववृन्दैर्निरन्तरमभिवन्दितां निखिल-विद्याधिष्ठात्रीं भगवतीं वाग्देवतां भूयो भूयोऽभिवाद्य तथा संस्कृत-साहित्य-परिषदः संरक्षकान् अनुग्राहकान् सदस्यवर्गांश्च यथायोग्यमभिवादन-प्रमोदपरिष्वङ्गादिकं विज्ञाप्य सश्रद्धमाभाष्य च संस्कृत-साहित्यपरिषद ऊनविंशवार्षिकाणि कार्याणि विवरीतुमुद्युक्ताः स्मः ।

प्रथमत एव परिषदः परमबन्धूनां प्रथिताभिधेयानां केषाञ्चिन्महा-पुरुषाणां वियोगवार्त्ता शोकभारपर्याकुलेन चेतसा भवतां पुरतः समवतार्यते । वर्षेऽस्मिन् परिषदः परमहितकारिणो वङ्गजनन्याः कृतिसन्तानाः कलिकाता-विश्वविद्यालयस्य "भाइस्च्यान्सेलार" इतीदं पदमधिरूढपूर्वाः स्यर् देवप्रसादसर्वाधिकारि सि-आइ-इ, सिवि-इ, एस-ए, एल एल-डि, सूरिरत्न-महोदयाः, उदार-हृदयाः कलिकाताविश्वविद्यालय-संस्कृत-विभागीय-प्रधाना-ध्यापका भूरिशास्त्रपरिशीलनलब्ध-प्रतिष्ठाः डा० प्रभातचन्द्रचक्रवर्त्ति एम् ए, पि आर एस, पि एच् डि महोदयाः, सुपण्डित-कविप्रवर-राखालदास-दर्शन-तीर्थमहोदयाः, आजीवनं परिषत्सदस्यभूताः स्वधर्मनिष्ठाः शरच्चन्द्र-चट्टोपाध्यायमहोदयाः, परिषद आजीवनं सदस्यभूता वदान्यप्रवराः शेठ-तुलारामजी गोयेन्का महोदयाः, परिषदः कार्यनिर्वाहकसमितेः सदस्यभूताः सुपण्डित-भुवनमोहनसांख्यतीर्थमहोदयाः तथा परिषत्सदस्याः परम-सुधियः प्रसिद्धचिकित्सकाः एकेन्द्रनाथघोष एम्-ए, एम्-डि महोदयाश्च परलोकमधिरुह्य परिषत्संसृष्टानस्मान् शोकमहाम्बुधौ निमज्जितवन्तः ।

महात्मनाममीषामभावेन परिषदो येयं गुर्वी क्षतिः संवृत्ता तस्याः पुनः पूर्त्तिर्नैव सम्भाव्यते । वयममीषां कर्मोचितां शुभां गतिं कामयामहे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिषद उद्देश्यम्—श्रुति-स्मृति-पुराणादिजनन्याः कविकुललालभूतानां कालिदासादीनां चिराराधनसमृद्धायाः सुरभारत्याः सम्यक् प्रसारकामनया प्रतिष्ठापितेयं संस्कृत-साहित्य-परिषत् संस्कृतभाषायास्तथा तदुपनिबद्धभारतीयसाहित्यानां च गौरवसंरक्षणे निरतैव विंशे वर्षे पदमर्पयति।

संस्कृतभाषायाः संस्कृत-शास्त्रस्य च प्रसाररूपमुद्देश्यं साधयितुं परिषदियं प्राधान्येन सप्तोपायानवालम्बितवती—

(१) साधारणसभाधिवेशनेन संस्कृत-भाषोपनिबद्धानां निबन्धानां पाठः।

(२) चतुष्पाठीसंस्थापनेन शास्त्राध्यापनम्।

(३) परिषत्पुस्तकालये मुद्रितानां हस्तलिखितानां च संस्कृत-ग्रन्थानां संरक्षणम्।

(४) अप्रकाशितानां संस्कृतग्रन्थानां प्रकाशः।

(५) संस्कृतभाषया मासिकपत्रप्रचारः।

(६) संस्कृत-रूपकाभिनयः।

(७) प्रतिष्ठानान्तरसहयोगश्चेति।

मान्या महाभागाः, उपायानिमानुपजीव्य परिषदियं विगते वर्षे केन केन कर्मणा कियत् साफल्यं लब्धवतीति भवतां विज्ञानार्थमुपन्यस्यते—

वार्षिकसभा—विगतवर्षीयसौराश्विनस्य विंशदिवसे परिषदोऽष्टादशवार्षिकमहोत्सवो यथारीत्यन्वष्ठीयत। तदुपलक्ष्य "कलिकाता इउनिभार्सिटी-इनष्टिटिउट्"भवने परिषदो वार्षिकाधिवेशनं समवर्तत। तत्र सुगृहीताभिधाना विद्यानुरागिणः श्रीमन्तः किरणचन्द्र-दे--एम्-ए सि-आइ-इ आइ-सि-एस् महोदयाः सभापतिपदमलंकृत्य सुरभारत्यामात्मनः परमश्रद्धाशीलताभिव्यञ्जकेन अभिभाषणेन सभासदः प्रीणितवन्तः। विविधविद्याविशारदानां संस्कृतसाहित्यरसास्वादलुब्धचित्तानां बहूनां विदुषां समागमेन परिषदोऽपूर्वं गौरवं समुपाचीयत। सभापतिमहोदयेन स्वर्गत-रायबाहादुरशरच्चन्द्रदास सि-आइ-इ महोदयानां प्रतिकृतेरावरणमुन्मोचितम्। ततश्च महात्मनाममीषां संस्कृतानुरागं विविधगुणावलीं च सश्रद्धमुत्कीर्त्य बहवः सुविद्वांसः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सभासदामपि चेतांसि श्रद्धायुक्तान्यकुर्वन्। अन्ततश्च नाट्य-कलाकुशलैः परिषत्सदस्यैः श्रीहर्षकविकृतायाः प्रियदर्शिकाया नवीनकवि-श्रीयुक्त-कालीपद-तर्काचार्यकृतस्य स्यमन्तकोद्धारस्य च साध्वभिनयेन सर्वेषां चेतांसि विमलानन्दास्वादनया समावर्जितानि समुपार्जिताश्च भूयांसः साधुवादाः।

कार्यनिर्वाहकसमितिः—विगतवर्षे परिषदः कार्यनिर्वाहकसमितेर्द्वादशाधिवेशनानि वृत्तानि। तत्र तदधिकृताः सर्व एव सदस्याः साग्रहं सम्भूय विचारपूर्वं परिषदः कृत्याकृत्यनिरूपणरूपं कर्त्तव्यमप्रमादेन परिपालितवन्तः।

साधारणसभा—दशसु साधारणसभाधिवेशनेषु विविधविद्यानुशीलनलब्धप्रावीण्यानां विमलमनीषाणां बहूनां विपश्चितां—"न्याय-तत्त्वकणिका" "उपनिषत्कथा" "धर्मपरिस्थितिः" "पाणिनितन्त्रं कातन्त्रं च" इत्याद्यभिधानां बहवः सारगर्भा निबन्धाः पठिताः पर्यालोचिताः समनन्तरं परिषत्पत्रिकायां प्रकाशमुपनीताश्च सन्तोऽनुसन्धित्सूनां विद्यार्थिनां महोपकारमसाधयन्।

विशेषाधिवेशनम्—एतदतिरिक्तानि गोवर्द्धनमठाधीश-श्रीभारतीकृष्णतीर्थ-शङ्कराचार्य-महोदयानां तथा रामानुज-मठाध्यक्ष-जगद्गुरु-श्रीरामानुजाचार्यमहोदयानां चागमनं परिषदोऽन्यतमसहकारिसभापतिकविराजशिरोमणि-श्यामादासवाचस्पतिमहोदयानां च परलोकप्रयाणम्, परिषदो विशिष्टसदस्यानां विचारपतिस्यर-श्रीमन्मथनाथमुखोपाध्यायमहोदयानां कलिकातास्थप्रधानविचारालये प्रधानविचारकपदप्राप्तिः परिषत्सदस्येभ्यः सुविज्ञविचारकेभ्यः श्रीमद्भ्यः प्रबोधचन्द्रदे आइ-सि-एस् महोदयेभ्य उपाधिप्रदानम् इत्यादीनि संघटनानि निमित्तीकृत्य परिषदो विशेषाधिवेशनान्यपि कानिचित् संवृत्तानि।

चतुष्पाठी—प्रधानाध्यापकश्रीयुक्त-सीतानाथ-सिद्धान्तवागीशमहोदयानामध्यापनकौशलेन गौरववती परिषद् विगत-वर्षे वेदपुराण-दर्शन-काव्यव्याकरणादिशास्त्रेषु त्रिंशत्संख्याकांश्छात्रान् गृहीतविद्यानकार्षीत्। तेषु संस्कृत-एसोसियेशन-गृहीतपरीक्षामवतीर्णानां सप्तानां पञ्चैवोत्तीर्णाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यार्थिनः खलु गुरुगृहमाश्रित्य गुरोरेव सकाशादभ्यवहार्यं वासस्थानं च आसाद्य विद्याग्रहणसौकर्यं लभन्ते इति सुप्राचीनेयं रीतिः। अधुना अध्यापकानां दारिद्र्यातिशयात् क्रमशो विलोपमापद्यमानाया रीतेरस्याः संरक्षणार्थं परिषदियं प्रतिवर्षं छात्रेभ्यो यथाशक्ति वृत्तिं प्रददाति। परन्त्विदानीमपि प्रयोजनानुरूपार्थागमविरहाद् वृत्तेः परिमाणं वर्धयितुं नैव शक्नोति। अत्यन्तापेक्षितं छात्रावासनिर्माणं चिरादभीप्सितमप्यर्थाभावान्नैव घटते। अत्रार्थे उदासीनानां वदान्यतमानामात्मकर्त्तव्ये समवधानं कामयामहे।

ग्रन्थागारम्—परिषदो ग्रन्थागारे इदानीं प्रायः पञ्चसहस्रसंख्यका मुद्रितग्रन्थाः त्रिसहस्राधिका हस्तलिखितग्रन्थाश्च वर्त्तन्ते। अस्मिन् वर्षे चतुःषष्ट्यधिकद्विशतसंख्यका मुद्रितग्रन्थाः पञ्चसंख्यका हस्तलिखितग्रन्थाश्च संगृहीताः। साम्प्रतम् अनुसन्धाननिरताश्छात्रा अध्यापका अन्ये च विद्वांसः परिषद्ग्रन्थागारात् स्वाभिमतग्रन्थप्राप्तिविषये प्रायो वैफल्यं नैव भजन्ते इत्यनल्पमिदमानन्दपदं परिषदनुरागिणां सर्वेषामेव। मनीषिणः सर्व एव ग्रन्थसंग्रहकर्मणि परिषदः साहायकमवलम्ब्य ग्रन्थागारस्यास्य समुन्नतिं विदध्युरित्याशंसामहे। "कलिकाता कर्पोरेशन" इत्येतस्मात् परिषदियं ग्रन्थागारोन्नयनार्थं (१९३४-३५) वर्त्तमानवर्षे रौप्यकाणां सार्द्धषट्शतीं प्राप्नवती। अतस्तदधिकृतेभ्यो धन्यवादान् वितरामः।

परिषत्पत्रिका—अष्टादश वर्षान् यथारीति प्रचरद्रूपं संस्कृतसाहित्यपरिषत्पत्रिका नाम परिषदो मासिकं मुखपत्रं भारतवर्षीयनानाप्रदेशवास्तव्यैः सुधीभिः परिप्रेषितं निबन्धजातमुपादाय विनोदयति विदुषां चेतांसीति विदितमेवैतत् सर्वेषाम्। षड् वत्सरान् यावदियं कलिकाताविश्वविद्यालयाध्यापकानां श्रीमतां क्षितीशचन्द्रचट्टोपाध्याय एम्. ए महोदयानामान्तरिकप्रयत्नेन यथाकालं प्रचरन्ती, व्याकरण-साहित्यदर्शनादिविविधविषयानुरसि वहन्ती सम्पादकमहोदयानाञ्चानितरसाधारणं वैदुष्यमाविष्कुर्वती पत्रिकाजगति मूर्धा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिषिक्तायते। सम्पादकमहोदयाः स्वममूल्यं समयमविगणय्य अन्यदपि संस्कृताङ्गलभाषयोः पत्रिकाद्वितयं स्वव्ययेन परिचालयापि यदिमां नावधीरयन्ति प्रत्युत प्रियतमामिव चिरं श्रद्दधति ततस्तेभ्यो धन्यवादशतं वितरामः। नूनमुपलक्षितमेव श्रीमद्भिः पत्रिकाया अस्या भूयांस एवांशाः सम्पादकानां स्वीयेनैव लेखेनालङ्कृता वर्त्तन्त इति।

रूपकाभिनयः—परिषदियं सुरभारतीं प्रति जनानामनुरागसञ्जननार्थं यानुपायान् अवलम्बितवती—संस्कृतरूपकाभिनयस्तेषामन्यतमः। अद्य यावत् परिषत्सदस्या यानि षड्विंशतिसंख्यकानि नाटकप्रहसनान्यभिनीय सामाजिकानां मनो रञ्जितवन्तस्तेषामनेकान्येवानभिनीतपूर्वाणि। प्राचीननाट्यकलायाः समुत्कर्षसम्पादने सर्वत्रैव परिषत्सदस्या अपूर्वं नैपुण्यविशेषमाविष्कृतवन्तः—येन वङ्गविषयेभ्यो बहिरपि तैरासादितः समादरातिशयः।

साम्प्रतं राष्ट्रव्यापिन्यर्थकृच्छ्रता, तेन परिषदोऽतिमात्रमायलाघवं सञ्जातम्। गृहकोषादृणमादाय परिषदिदानीं कृत्यजातं निर्वाहयति। पूर्ववर्षे इव विगतवर्षेऽपि परिषद् गभर्णमेण्ट्सकाशात् साहायकरूपेण केवलं मुद्राणां पञ्चशतीं प्राप्तवती। स्वल्पमेवेदं साहायकं प्रयोजनापेक्षया। कतिपयेभ्यो वर्षेभ्यः प्राङ् मुद्राणां सहस्रत्रयमपि परिषद् गभर्णमेण्ट्सकाशादलभत। नातिचिरमेव कृत्यगौरवमुपलभ्य "गभर्णमेण्ट्" अत्रार्थे सानुग्रहां दृष्टिं पातयिष्यतीत्याशास्महे अधिकृतेभ्यो राजपुरुषेभ्यः श्रद्धापूरितचेतसा कृतज्ञतां च ज्ञापयामः।

ये तावन्महात्मानो वदान्यप्रवरा विगतवर्षे अर्थप्रदानेन ग्रन्थागारसमृद्ध्यर्थं पुस्तकप्रदानेन च परिषदमनुगृहीतवन्तस्तेभ्यस्तथा यानि वृत्तान्तपत्राणि सामयिकपत्रिकादीनि च परिषदुदन्तजातप्रकाशनेनास्माकमुपकृतवन्तस्तदधिकृतेभ्यश्च कृतज्ञताविज्ञापनपूर्वकं शतशो धन्यवादान् वितरामः।

अर्थाभावाद् विगतवर्षे परिषदो ग्रन्थप्रकाशविभागे समुल्लेखयोग्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमपि कृत्यं नैव निष्पन्नम्। परिषदः स्वकीयभवननिर्माणमपि अर्थाभावादद्यापि मनोगतमेव वर्त्तते। भवनाभावाच्च दिने दिने परिपोषमाप्यमानस्य सुविशालग्रन्थागारस्य तथा चतुष्पाठीविभागस्य च कृत्यावलीपरिचालना क्रमशो दुष्करतामवगाहते। महता प्रयत्नेन संगृहीतानां मुद्रितामुद्रितमहामूल्यग्रन्थरत्नानां तथा महतो द्रविणराशेर्विनियोगेन विनिर्मितानां तैलचित्राणां च संरक्षणं सम्भविष्यति न वेति महतीयं चिन्ता समाक्रामत्यस्माकं चेतांसि। 'मनोहरपुकुर'वर्त्मस्थायां परिषदः स्वीयभूमौ गृहनिर्माणार्थं समितिरेका परिकल्पिता। तत्र श्रीमन्तः प्रबोधचन्द्रदे आइ, सि-एस्, महोदया अध्यक्षत्वेन निरूपिताः। वयमाशंसामहे—यद् विद्यानुरागिणः सज्जनाः सर्व एव कोषस्यास्य परिपूरणमपरिहार्यकर्त्तव्यकक्षायां निक्षिप्याचिरमेव तत्रावधानं प्रयच्छेयुरिति।

अयि मान्या महाभागाः, श्रुतिस्मृतीतिहासपुराण-तन्त्रज्योतिषायुर्वेदच्छन्दःसाहित्यन्यायमीमांसासांख्यवेदान्तादिशास्त्राणां जननीस्वरूपा येयं सुरभारती सर्वजगतां विस्मयमादधाना सगौरवं चिरादात्मानं प्रतिष्ठापितवती, या च प्रायः सर्वासामेव भारतीयानां भाषाणां जननी, यत्साहाय्येन वयमस्माकम् अतिप्राचीनानां व्यवहाराणां गौरवमण्डितं स्वरूपमुपलभामहे, पूर्वजानां चापूर्वं महिमानमनुभवामः, यद्यौदासीन्यादुपेक्षया वा तां प्रत्यश्रद्धां प्रदर्शयामस्तर्हि ध्रुवोऽस्माकमचिरादेव समाजविध्वंसः। भारतीयानां प्राणभूता सुरभारती येषां ममत्वानुरागं नोपार्जयेत्, अनर्हा एव त एकान्ततो "भारतीय"संज्ञायाः। तदमुष्याः प्रसारसाधनाय परिकल्पितेयं परिषद् यथा सर्वावयवपरिपोषमासाद्य अनवद्येषु प्रतिष्ठानेष्वात्मप्रतिष्ठामर्जयन्ती अनल्पाकल्पोज्ज्वलकान्त्या धरातलमुद्भासयन्ती चाकल्पमात्मस्थितिमासादयेत् तथैव सर्वे संस्कृतानुरागिणः कल्पयन्त्विति अध्येषयामः।

ननु भद्राः, एतावदर्थकष्टकरालेऽपि कालेऽस्मिन् दीनतमाऽपीयं परिषद् यत् कथमपि आत्मानं धारयति तत्र हेतुः सानुकम्पानां भवतामेवार्थसाहा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यकम्, कर्मपरिचालकानां चात्यन्तिकी चेष्टा। परं दिने दिने नवं नवमभ्युदयमस्याः कामयमाना भूयोऽपि निवेदयामो भवत्सु यन्महाभागाः, प्रतिदिनमुपचितानुरागेण चेतसा कल्याणमस्या अनुक्षणमनुध्यायताम्, विधीयतां सदयदृष्टि,र्वसुवृष्टिश्चानुरूपेति शम्।

संस्कृत-साहित्य-परिषद् ऊनविंशवर्षीयमधिवेशनम्

व्यतीते सौराश्विनस्य सप्तमदिवसे परिषद ऊनविंशवर्षीयमधिवेशनं कलिकाता 'इउनिभार्सिटि इन्स्टिटिउट्' इत्याख्यभवने सुनिष्पन्नमासीत्।

तत्र महामहोपाध्याय-श्रीयुक्तदुर्गाचरणसांख्यवेदान्ततीर्थमहोदयस्य प्रस्तावक्रमेण महामहोपाध्याय-श्रीयुक्त-शितिकण्ठवाचस्पतिमहोदयस्य समर्थनक्रमेण च माननीया 'नसीपुरा'धीश्वराः श्रीमन्तो भूपेन्द्रनारायणसिंहबाहादुरमहोदयाः सभापतिपदमलमकार्षुः। सभायां महामहोपाध्यायप्राया भूस्वामिभूयिष्ठा आङ्ग्लशिक्षितबहुलाः सामाजिकाः सोत्साहं समवेताः समसूचयन् संस्कृत-साहित्य-परिषदः परिमाणपरिहीनामनन्यसाधारणां सफलताम्।

सभाकार्यप्रारम्भे परिषत्सम्पादकेन श्रीमता अमरेश्वरठाकुरवेदान्तशास्त्रिमहोदयेन परिषद ऊनविंशवर्षीयं कार्यविवरणं संस्कृतभाषया निबद्धं वाचितमभूत्। संक्षेपेण सर्वकार्यविवरणगर्भः सुललितोऽयं निबन्धः पत्रिकायामस्यां पत्रान्तरे पाठकैरवलोकनीयम्। परिषदः सहसम्पादकान्तरेण श्रीमता दीनबन्धुसाहित्यशास्त्रिणा सङ्कलितं परिषदः कार्यविवरणगर्भम्, सभाया अभिनयस्य कार्यसूचीरूपञ्च किञ्चन वङ्गभाषावङ्गाक्षरमयं मुद्रितं पुस्तकं सभ्येभ्यः समुपहृतमासीत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्ति चायं चिराचरितः समुदाचारः परिषदः—यदत्र वार्षिकमहोत्सवे कस्यचन विश्रुतयशसो विदुषो वा भूस्वामिनो वा परासोश्चित्रमुन्मोचयितव्यमिति। तन्नियमानुगत्या विद्यासागरमहाविद्यालयाध्यक्षस्य स्वर्गतस्य विद्वत्प्रवरस्य नानाग्रन्थप्रणेतुः सारदारञ्जनरायमहोदयस्य चित्रं सभापतिनोन्मोचितम्। तदुन्मोचनावसरे च कियद्भिश्चन वाग्मिभिः सभापतिभिश्च परासोस्तस्य गुणानप्युन्मोचयद्भिः सभ्यानां मानसान्यावर्जितानि। ततश्च सभापतिमहोदयेन स्वोपज्ञविज्ञत्वबहुज्ञत्वाद्यनुरूपं मधुरमधुरं वङ्गभाषामयं भाषणं पत्रारूढभूयोऽशं सरललालितया वाचा सभासदां पुरतो वाचितम्।

सभान्ते च नाट्यकुशलाः परिषत्सदस्या नवीनस्य 'नलदमयन्तीयम्' इत्याख्यस्य नाटकस्य प्रयोगेण सदस्यानां मनांस्यरञ्जयन्। तदिदं नाटकं परिषदः प्रारम्भत एव तदाचार्यरूपेण, मध्यतश्च तदाचार्य-तत्पत्रिकाध्यक्षरूपेण, अन्ततश्च तत्कार्यनिर्वाहकरूपेण बहून् कालान् परिषदं परिपोषयता मुक्तिवादादिविविधग्रन्थकर्त्रा कलिकातासंस्कृतमहाविद्यालयीयन्यायशास्त्राध्यापकेन नवीनकविना श्रीमता कालीपदतर्काचार्य-महोदयेनाध्ययनदशायां विरचितं मूलाजोडसंस्कृमहाविद्यालये 'सारस्वतमहोत्सवसम्भावनार्थं विद्यार्थिवृन्दैरभिनीतयं' विदर्भसमागमं नाम नाटकं 'निःशेषं परिवर्त्य कल्पनायाश्च रचनायाश्च' संस्कृतसाहित्यपरिषद्यध्यापनदशायां विरचितमभूत्। परतश्च मुद्रणेन तदिदं नाटकं कियतश्चित् कालात् पूर्वं परिषद्ग्रन्थमालायामन्तर्निविश्य मध्यमणिरिव द्योतते। इत्यस्य भूमिकापर्यालोचनया वैयक्तिकविशेषज्ञतया चास्माभिविज्ञायते। ततोऽपि बहोः कालात् परं दैववशात् कवेर्भाग्यवशाद्वा सुमनीषोदयेनाभिनेयवस्तुनि दत्तावधानैरभिनयकुशलैः परिषन्नाट्यपरिचालकनिवहैरिदानीं नवीनस्य कवेर्नाटक-मिदमभिनयसम्मानेन भूषितमिति महदेव प्रमोदस्थानमस्माकम्। दिष्ट्या वाच्यान्निर्मुक्ताः संस्कृतसाहित्यपरिषन्नाट्यपरिचालकाः कविनिस्पृहाः काव्येष्वेव धृतादराः परिलक्ष्यन्ते। आशास्यते इतः परमपि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिनययोग्यश्चेन्नाटकं नवीनमित्येव न प्रत्याख्यास्यते नाट्यपरिचालकैः। यद्यप्यस्यैव कवेः 'स्यमन्तकोद्धारा'ख्यः कश्चन व्यायोगः परिषदाऽसकृदभिनीतस्तथापि लघुकायस्य तस्य प्रयोगेऽनायाससाध्यतैव हेतुरस्माभिरनुमित इति महारम्भस्यास्य प्रशस्तिरुद्घोष्यते। अभिनयोऽयं कथंकारमासीदिति आगामिन्यां संख्यायां मुद्रितात् कस्यचन दर्शकस्य निबन्धादेव पाठकैर्ज्ञास्यते इति न तत्र वयं किञ्चन वदामः।

अभिनेतृषु च नल-विदूषक-कलिषद्मपाद-दमयन्तीन्द्रसेनभूमिकामारूढेभ्यो यथाक्रमं श्रीयुक्त-अमरेश्वरठाकुर-कालीपदतर्काचार्य-म० म० कुञ्जविहारितर्कसिद्धान्त-दक्षिणारञ्जनशास्त्रि-च०डीदेवी कुञ्जकिशारकविरत्न-महोदया एकैकं रौप्यपदकं दास्यन्त इति प्रयोगान्ते समुद्घोषितम्। तारतरकण्ठेनानुद्घोषिताऽपि रौप्यकाणां पञ्चविंशतिः—कलिकाता 'प्रेसिडेन्सि' महाविद्यालयाध्यापकेन श्रीमता उपेन्द्रनाथ-घोषालमहोदयेन परिषदे दास्यते इत्यस्मासु प्रतिश्रुतम्। 'दातारो नोऽभिवर्धन्ताम्।'

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषदः १३४२-वङ्गाब्दीय-

कार्यपरिचालकाः

सभापतिः

महामहोपाध्याय-श्रीयुक्तदुर्गाचरण-सांख्यवेदान्ततीर्थः

सहकारि-सभापतयः

१। महामहोपाध्याय श्रीयुक्त-अनन्तकृष्णशास्त्री
२। महामहोपाध्याय-श्रीयुक्त-शितिकण्ठ-वाचस्पतिः
३। महामहोपाध्याय-श्रीयुक्त-कुञ्जविहारी तर्कसिद्धान्तः।
४। डक्टर-श्रीयुक्त-आदित्यनाथमुखोपाध्यायः, एम.ए, पि-एइच.डि.
५। पण्डित-श्रीयुक्त-द्वारिकानाथन्यायशास्त्री
६। पण्डित-श्रीयुक्त-सीतानाथ-सिद्धान्तवागीशः
७। श्रीयुक्त-यतीन्द्रनाथ-वसुजः, एम.ए., एम.एल.सि.

सम्पादकौ

१। श्रीयुक्त-अमरेश्वर-ठाकुर-वेदान्तशास्त्री, एम.ए., पि.एइच.डि.
२। श्रीयुक्त-प्रबोधचन्द्र-वाग्‌ची, एम.ए., डि-लिट.

सहकारि-सम्पादकाः

१। पण्डित-श्रीयुक्त-दीनबन्धु-साहित्यशास्त्री
२। ,, ,, रसमयचट्टोपाध्यायः, एम. ए.,
३। ,, ,, रामकृष्ण-चक्रवर्त्ती, एम. ए.
४। ,, ,, अशोकनाथ-भट्टाचार्य-वेदान्ततीर्थः, एम.ए, पि, आर, एस

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्यनिर्वाहकसमितेरन्ये सदस्याः

१। पण्डित-श्रीयुक्त-जगदीशचन्द्रवेदव्यासः
२। ,, ,, जगन्मोहन-ज्योतिर्विनोदः
३। ,, ,, वामापद-विद्यारत्नः
४। ,, ,, दक्षिणाचरण-भट्टाचार्यः, एम.ए.
५। ,, ,, जानकीनाथ-साहित्यशास्त्री
६। ,, ,, कालीपद-तर्काचार्यः
७। ,, ,, वामाचरण-काव्यतीर्थः
८। ,, ,, चिन्ताहरण-चक्रवर्त्ती काव्यतीर्थः, एम.ए.
९। ,, ,, योगीन्द्रमोहन-विद्यारत्नः
१०। ,, ,, दक्षिणाचरण-भट्टाचार्यः
११। श्रीयुक्त-काशीनाथ-भट्टाचार्यः, वि.एस.सि. (Eng.)
१२। ,, जगमोहन-वसुजः, वि.एल. (काउन्सिलर)
१३। ,, राजेन्द्र-नारायण-वन्द्योपाध्यायः, वि.एल. (काउन्सिलर)
१४। पण्डित-श्रीयुक्त-दुर्गामोहन-काव्यसांख्यपुराणतीर्थः, एम.ए.
१५। ,, ,, कालीपदव्याकरणतीर्थः
१६। ,, ,, क्षितीशचन्द्र-चट्टोपाध्यायः, एम.ए.
१७। श्रीयुक्त-भूपतिरायचतुर्धुरीणकाव्यतीर्थः
१८। ,, सुनीतिकुमार-चट्टोपाध्यायः, एम.ए., डि.लिट.
१९। पण्डित-श्रीयुक्तचिन्तामणिसाहित्याचार्यः
२०। ,, ,, वनमालिवेदान्ततीर्थः, एम.ए.
२१। श्रीयुक्तक्षितीशचन्द्र-चक्रवर्त्ती, एम.ए., वि.एल.
२२। पण्डित-श्रीयुक्त-उपेन्द्रमोहन-सांख्यतीर्थः
२३। श्रीयुक्त-व्रजेन्द्र किशोर-भट्टाचार्यः
२४। पण्डित-श्रीयुक्त-चण्डीचरण-तर्कतीर्थः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२५। श्रीयुक्त-उपेन्द्र नाथ-घोषालः, एम.ए., पि.एइच.डि.
२६। ,, उमेशचन्द्र-भट्टाचार्यः, एम.ए.
२७। ,, रमाप्रसाद-मुखोपाध्यायः, एम.ए., वि.एल.
२८। ,, दामोदर-दास--खान्ना
२९। पण्डित-श्रीयुक्त-विमलानन्द-तर्कतीर्थः
३०। ,, प्रबोधचन्द्र दे, आइ.सि.एस., सिद्धान्त-सिन्धुः
३१। श्रीयुक्त-प्रबोधकुमार-दासः, एमःए., वि. एल.
३२। ,, गौरीनाथ-भट्टाचार्यः, एम.ए.

विभागीय-कर्मपरिचालकाः

पत्रिकासम्पादकः

पण्डित-श्रीयुक्त-क्षितीशचन्द्र-चट्टोपाध्यायः, एम.ए.

पत्रिका-सहकारि-सम्पादकः

पण्डित-श्रीयुक्त-उपेन्द्रमोहन-सांख्यतीर्थः

ग्रन्थाध्यक्षः

पण्डित-श्रीयुक्त-जानकीनाथ-साहित्यशास्त्री

आचार्यः

पण्डित-श्रीयुक्त-सीतानाथ-सिद्धान्तवागीशः

नाट्यसम्पादकौ

पण्डित-श्रीयुक्त-जगन्मोहन-ज्योतिर्विनोदः
,, ,, वामापद-विद्यारत्नश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नाट्य-सहकारि-सम्पादकाः

श्रीयुक्त-क्षेत्रनाथ-विद्यारत्नः
,, कार्त्तिकचन्द्र-चक्रवर्त्ती
,, व्रजेन्द्रकिशोर-भट्टाचार्यश्च

सङ्गीताचार्यः

श्रीयुक्त-सतीशचन्द्र दत्त जः

आय-व्यय-लिपिरक्षकः

पण्डित-श्रीयुक्त-रामकृष्ण-चक्रवर्त्ती, एम. ए.

आय-व्यय-लिपिपरीक्षकौ

श्रीयुक्त-मलयकुमार-देवः, वि.एस.सि., जि.डि.ए.
,, अनाथनाथ-घोषजश्च

गृहनिर्माणसमितेः सदस्याः

१। श्रीयुक्त-प्रबोधचन्द्र-दे, आइ.सि.एस. सिद्धान्तसिन्धुः (सभापतिः)
२। म० म० श्रीयुक्तकुञ्जविहारी तर्कसिद्धान्तः
३। श्रीयुक्त रसमय-चट्टोपाध्यायः, एम.ए.
४। ,, अशोकनाथ-भट्टाचार्यवेदान्ततीर्थः, एम.ए. पि.आर.एस.
५। ,, प्रबोधकुमार-दासः एम.ए.वि एल
६। ,, दीनबन्धु-साहित्यशास्त्री
७। ,, वामाचरण-काव्यतीर्थः
८। ,, क्षितीशचन्द्र-चक्रवर्त्ती, एम.ए., वि.एल.
९। अमरेश्वर-ठाकुर-वेदान्तशास्त्री, एम.ए., पि-एइच.डि.

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Some Opinions on 'Pavanadutam'

Edited by

Prof. Chintaharan Chakravartty, M.A., Kavyatirtha.

(Published by the Sanskrit Sahitya Parishad. Price—**12***as* ; for Members—**10** *as*. only.)

Indian Antiquary, Vol. LVI—December, 1927, p. 234 :-

"It is a great improvement upon its predecessor..... The editing and publishing of the poem are both creditable and we congratulate Mr. Chakravarti on the result of his labours."

Calcutta Review, October, 1927, pp. 124-125 :—

".....He has tried to correct many of the inaccuracies found in the earlier version...: On the whole, the book has been excellently edited and we can congratulate the author on his success.....

Modern Review, June 1928 :—

".....The editor has collated all the available materials including the version published by the late M. Chakravarti in the J. A. S. B. and has added this useful introduction discussing all the issues about the poet and his work, and short notes in Sanskrit on difficult words and phrases. The different readings and emendations are generally happy. The collection of the verses of the poet from the anthologies will be found useful. We congratulate the editor and the Sanskrit Sahitya Parishat on the reliable edition of the poem."

Prof. M. Winternitz in **"Indologica Pragensia** (Vol. I. —1929, p.80) :—

".....The present edition.....gives a much more correct text. Its publication as a separate book is also very welcome. A valuable introduction, an index of first lines and an index of proper names of historical or geographical importance are useful additions to the text. The verses ascribed to Dhoyi in the Anthologies are given in a supplementary note after the Introduction."

Prof. Keith in his **History of Sanskrit Literature,** p. 567 :—

.....Best edition.....

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषा

अभिनवा संस्कृतमासिकपत्रिका ।

अत्र प्रतिमासमेव परममनोरमया सुरभारत्या रम्याणि आख्यानानि, विविधदेशीया आभाणकाः, तत्तद्विषयकनिबन्धजातानि, **जैमिनिसूत्राख्यस्य जौतिषग्रन्थस्य** तृतीयाध्यायादिभागोऽप्रकाशितपूर्वटीकासमुल्लसितः भोजदेवविरचितातिसरला **परिभाषावृत्तिः, आशाधरभट्टविरचिता पूर्वपक्षावली** प्रकाश्यते । प्रतिमासं चाङ्गलभाषातः संस्कृतभाषायामनुवदार्थो लेखः प्रकाश्यते, समीचीनेभ्यो भाषान्तरारोपकेभ्यश्च पारितोषिकाणि प्रदीयन्ते । वार्षिकं मूल्यं केवलं रूप्यकमात्रम् । प्रतिमासमेव यथावसरं प्रकाश्यते । अद्यैव Moneyorder द्वारा रूप्यकमेकं संप्रेष्य ग्राहकत्वमङ्गीक्रियताम् ।

मञ्जूषाकार्यालयः

६१ ए रामकान्त बसु ष्ट्रीट, बाग्‌बाजार, कलिकाता

61 A, Ram kanta Bose Street, Baghbazar, Calcutta.

Printed at

CALCUTTA ORIENTAL PRESS

9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri